अनन्तर पितर उद्धारकारी ध्रुवक्षेत्र है। जो महाफल को देने वाला है। प्रेतयोनि प्राप्त, जिनका पिण्ड लोप होगया, अपुत्र, नरकगामी पितरगण यहाँ श्राद्ध प्राप्त करके प्रेतयोनि छोड़ कर देवयोनि को प्राप्त होते हैं। अनन्तर ध्रुवक्षेत्र स्नान प्रार्थनामन्त्र—हे गदाधर! आपको नमस्कार। आप पितरगणों की मोक्ष बढ़ाने वाले हैं। हे ध्रुवक्षेत्र! आप श्रेष्ठ हैं, ध्रुवजी को अटल पद देने वाले हैं। इस मन्त्र के ६ बार पाठ पूर्वक मज्जन नमस्कार स्नान करें तो अवश्य विष्णुप्रसाद से ध्रुवलोक को प्राप्त होता है। ध्रुव संहिता में—यहाँ श्रीध्रुव १०० वर्ष यावत् निश्चल तपस्या कर भगवत् दर्शन लाभ पूर्वक अटल पदवी को प्राप्त हुए हैं॥ ६२॥

अनन्तर ओदनस्थान का वर्णन करते हैं—जहाँ कृष्णपूजन में तत्पर गोपिकागण भगवान के भोजन के लिये विविध प्रकार ओदनादि लेकर विविध गानादि पूर्वक मनोरथ देने वाली कृष्ण पूजा को करती थीं। गोपिकागण ओदन लाती थीं। इसलिये इसका नाम ओदन स्थान है। यहाँ विविध ओदन द्वारा विधि पूर्वक पूजा करने से धनधान्य प्रभृति वैभव के साथ कामना समूह प्राप्त होते हैं। मथुरा के अन्दर मार्ग में वृन्दावन के गमन आगमन के लिये यह स्थान देवतागण कर्तृक निर्मित है। ओदनस्थल प्रार्थनामन्त्र—बृहन्नारदीय में—हे वासुदेव! गोपिकावल्लभ आपको नमस्कार। आपने गोपीगण कर्तृक सुन्दर सुस्वाद ओदन प्राप्त किये हैं। हे कृष्ण! आपको नमस्कार। इस मन्त्र के ६४ बार पाठ पूर्वक स्थान को प्रणाम करें॥ ६३॥

अनन्तर कुवलयापीड़ वधस्थानमन्त्रः—हे भग्नदन्त! आपको नमस्कार। श्रीबलदेव और श्रीकृष्ण

सप्तभिर्मन्त्रमुच्चार्य्य स्थानं च प्रणमेत्सुधीः । हस्तितुल्यबलं लब्ध्वा यमपुरात्स जीवति ॥६४॥
चाणूरमुष्टिकौ मल्लौ बलकृष्णकृतांजसौ । तयो र्बधस्थल श्रेष्ठ विवीर्य्यबलप्रदं ॥

ततो चाणूरमुष्टिकमल्लबधस्थानप्रार्थनमन्त्रः—

नमश्चाणूरमल्लाय मुष्टिकाय तथा नमः । बलभद्रहतायैव कृष्णखण्डकृतायते ॥
इति मन्त्रं चतुर्भिस्तु द्वयोः स्थानं नमश्चरेत् ॥ ६५ ॥

ततो कंसशयनस्थलप्रार्थनमन्त्रः—

कृष्णोद्भव विचिन्त्याय कंसशयन वेश्मने । नमो नारदमन्त्राय भगवज्जन्महेतवे ॥
इति मन्त्रं त्रिभिरुक्त्वा नमस्कारं त्रयं चरेत् । वैकुण्ठपदमाप्नोति सुशील इव रूपधृक् ॥ ६६ ॥

ततो उग्रसेनीकारागृहस्थानप्रार्थनमन्त्रः । दशमे—

गायन्ति ते विशदकर्मगृहेषु देव्यो राज्ञां स्वशत्रुबधमात्मविमोक्षणं च ।
गोप्यश्च कुंजरपतेर्ज्जनकात्मजाया. पित्रोश्च लब्धशरणा मुनयो वयं च ॥
इति मन्त्रमुदाहृत्यैकादशैर्विभिर्नमेत् । यत्र स्थाने प्रयोगेण निगडेन परिप्लुते ॥
दशसाहस्रसंख्याकै मुक्तः कारागृहाद् भवेत् । सत्यं सत्यं पुनः सत्यमुग्रसेनिप्रणोदितः ॥६७॥

ततो उग्रसेनिराज्याभिषेकस्थानप्रार्थनमन्त्रः । भविष्योत्तरे—

पुत्रबाधानिवृत्ताय राज्यस्थान नमोऽस्तु ते । अन्वायान्यस्वरूपाय कृष्णराज्याभिषेचनं ॥
इति मन्त्रमुदाहृत्य सप्तभिः प्रणमेत्सुधीः । ययाति शापतो कृष्णो राज्यसिंहासने न्यसेत् ॥
मातुश्च पितरं नत्वोग्रसेनमभिषेचयेत् । इत्येते मथुरायास्तु तीर्थाः देवाश्च सुस्थलाः ॥
स्नानप्रणतिपूजाभिः पूजनीया पृथक् पृथक् ॥ ६८ ॥

---

के द्वारा आप कृतार्थ हैं । हे कुवलयापीड बधस्थान ! आपको नमस्कार । इस मन्त्र के ७ बार पाठ पूर्वक स्थान की प्रदक्षिणा करे तो हस्ति सदृश बल को पाकर १२० साल पर्य्यन्त जीवित रहता है ॥ ६४ ॥

अनन्तर चाणूरमुष्टिक बधस्थल है—यह चाणूरमुष्टिक नामक श्रीकृष्ण के बल से उत्तेजित दो कंस के महामल्लों का बध स्थान है जो अत्यन्त वीर्य्यबल को बढ़ाने वाला है । प्रार्थनमन्त्र—हे चाणूरमल्ल ! हे मुष्टिकमल्ल ! आपको नमस्कार । आप श्रीकृष्ण कर्तृक खण्डित होकर बलदेव कर्तृक बध को प्राप्त हुए हैं । इस मन्त्र के ४ बार पाठ पूर्वक दोनों स्थलों को नमस्कार करे ॥ ६५ ॥

अनन्तर कंसशयन स्थल प्रार्थनमन्त्र—हे कंसशयन स्थल ! आप श्रीकृष्ण के उद्भव के लिये हैं । जहाँ भगवान् के जन्म के लिये नारद कर्तृक प्रतारित कंस विविध प्रकार मन्त्रणा करता था । इस मन्त्र के तीन बार पाठ पूर्वक ३ बार नमस्कार करे तो सुशील रूप को धारण करके वैकुण्ठ में गमन करता है ॥६६॥

अनन्तर उग्रसेनि कारागृह स्थान प्रार्थनामन्त्र—श्रीभागवत के दशम स्कन्ध में है । इस मन्त्र के ११ बार पाठ पूर्वक नमस्कार करें । इसको १०००० बार प्रयोग से निश्चय कारागृह से मुक्तिलाभ करता है । यह सत्य है, सत्य है, फिर सत्य है । उग्रसेनि का वचन है ॥ ६७ ॥

अनन्तर उग्रसेनि राज्याभिषेक स्थल प्रार्थनामन्त्र— भविष्योत्तर में—हे पुत्र ( कंस ) की बाधा निवृत्ति के लिये उग्रसेनि राज्याभिषेक स्थान ! आपको नमस्कार । आप अन्वरूप हैं । श्रीकृष्ण कर्तृक आप अभिषिक्त हैं । इस मन्त्र के ७ बार पाठ पूर्वक प्रणाम करे । ययाति के शाप से उन्मुक्त कर माता पिता

सकलगुणनिधानो भट्टनारायणाख्यः । प्रभुमयप्रचुरात्मा नारदस्यावतारः ॥
व्रजशुभगुणमध्ये संस्थितस्थानतीर्थं । विधिसमयप्रयोगं पूर्णमेतच्चकार ॥ ९९ ॥

इति श्रीभास्करात्मजभट्टनारायणविरचिते व्रजभक्तिविलासे परमसंहितोदाहरणे व्रजमहात्म्यनिरूपणे बनयात्राप्रसंगे मथुरोत्पत्तिमहात्म्यकथनदर्शनं नाम तृतीयोऽध्यायः ॥ १०० ॥

## ॥ चतुर्थोऽध्यायः ॥

अथ श्रीकुण्डबनादुत्पत्तिमहात्म्यदर्शनं । आदिवाराहे—

तत्रादौ श्रीकुण्डबनप्रार्थनमन्त्रः—

कृष्णक्रीडास्थलायैव नमस्तुभ्यं बनाय च । साफल्याख्यं वरं देहि कृष्णसौभाग्यदायिने ॥
इति मन्त्रं समुचार्य्य चतुर्भिः प्रणमेद्वनं ॥ १ ॥
गोपिका रमते यत्र कृष्णसार्द्धं यथेच्छया । यस्मात्तु गोपिकाकुण्डं सर्वसौभाग्यदायकं ॥

ततो गोपिकाकुण्डस्नानप्रार्थनमन्त्रः—

कृष्णवश्यकृते तुभ्यं गोपिकाविमलोज्ज्वल । पीतवर्णजलायैव गुप्तपुण्यफलप्रद ॥
इति मन्त्रं दशावृत्त्या मज्जनैः स्नपनं नमन् । धर्मार्थकाममोक्षादीन् लभते वै न संशयः ॥
यत्रव गोपीकानां च पूजनं वस्त्रभोजनः । सौभाग्यफलमाप्नोति सौभाग्यं वर्द्धनं भवेत् ॥
त्रयोदश्यां तु सप्तम्यां भाद्रकार्त्तिकयोस्तथा । कृष्णपक्षे शुभयोगे कुर्यात्सांगंप्रदक्षिणां ॥ २ ॥
बनस्य व्रजयात्रायाः प्रसंगेऽनुक्रमेन च । । अरिष्टासुरनामासौ यत्रैव बसते सदा ॥
यदरिष्ट बनं नाम वहुवानरसंकुलं ।

---

को नमस्कार कर पूर्वक श्रीकृष्ण ने उग्रसेनि को राज्य सिंहासन पर बैठाया है और अभिषिक्त भी किया है। इति यह सब मथुरा के तीर्थ तथा देवता हैं। स्नान, प्रणाम और पूजादि द्वारा पृथक् २ पूजा करें ॥९८॥

समस्त गुणों की खान, विशालात्मा, नारदावतार श्री नारायणभट्ट जी व्रज सम्बन्धी शुभ-गुणों से परिपूर्ण स्थान तथा तीर्थों का यह विधि समय के प्रयोगमय प्रबन्ध पूर्ण करते हैं ॥ ९९ ॥

इति श्रीमद्भास्कर आत्मज श्रीनारायणभट्ट गोस्वामी विरचित व्रजभक्तिविलास का माहात्मनिरूपण बनयात्राप्रसंग मथुराउत्पत्ति-महिमाकथन दर्शन नामक तृतीय अध्याय का अनुवाद ॥१००॥

अब श्रीकुण्डबनादि उत्पत्ति महिमा का दर्शन कहते हैं—आदिवराह में—प्रथम श्रीकुण्डबन-प्रार्थनामन्त्र यथा –हे कृष्णक्रीड़ास्थलबन ! आपको नमस्कार। हे कृष्णसौभाग्य देने वाले ! साफल्य नामक वर दीजिये। इस मन्त्र के जप पूर्वक चार बार बन के लिये प्रणाम करें ॥ १ ॥

यहाँ गोपीगण श्रीकृष्ण के साथ यथेच्छा रमण करते हैं इसलिये यहाँ सर्व सौभाग्य देने वाला गोपिकाकुण्ड है। स्नान प्रार्थनामन्त्र—हे श्रीकृष्ण के वश्य के लिये विमल उज्वल गोपिकाकुण्ड ! पीतवर्ण जलमय आपको नमस्कार। आप गुप्त पुन्य फल देने वाले हैं। इस मन्त्र के १० बार पाठ पूर्वक मज्जन, स्नान, नमस्कार करें। धर्म्म, अर्थ, काम, मोक्षादिक प्राप्त होते हैं; इसमें कोई सन्देह नहीं। जहाँ गोपियों का वस्त्र, भोजन द्वारा पूजा का विधान है। सौभाग्य फल मिलता है। भाद्रमास की कृष्णा त्रयोदशी और कार्त्तिक की कृष्णा सप्तमी में शुभ योग पर सांग प्रदक्षिणा करे ॥ २ ॥

बनयात्रा क्रम से अरिष्टासुर नामक दैत्य जहाँ सर्वदा वास करता है। इसलिये इसका नाम

ततो ऽरिष्टप्रार्थनमन्त्रः—

अरिष्टरूपिणे तुभ्यं वनाय च नमो नमः । वानराकुलरम्याय ममारिष्टं विनाशय ॥
इति मन्त्रं समुच्चार्य्य पञ्चभिः प्रणमेद्वनं । अरिष्टे नैव पश्यन्ति बहुवैरिकृतेऽपि च ॥
वृषरूपं समाधाय कृष्णघाताय त्वागमत् । यतो वृषासुरो नाम विख्यातः पृथिवीतले ॥

स्कान्दे:—यत्र कृष्णहतो दैत्यौ धेनुकासुरदैत्यराट् । यत्रारिष्टाः समाख्याताः शत्रोर्वधज्वरादयः ॥
प्रयोगेनैव नश्यन्तु वधस्थानोत्तमोत्तमः । ज्वरमेकान्तरं चैवान्द्यहिक्यं च तृतीयकम् ॥
सप्तमासो परिभ्रामन् यत्रस्थानोत्तमोत्तमः । ज्वरमुक्तो भवेल्लोको परमायुः स जीवति ॥ ३ ॥

ततो धेनुकासुरवधस्थानप्रार्थनमन्त्रः—

कृष्णं प्रसादितायैव धेनुकासुर नाशक । सुस्थानाय नमस्तुभ्यं गोपिकाभयहारिणे ॥
इति मन्त्रमुदाहृत्य सप्तभिः प्रणमेत्स्थलम् । सर्वारिष्टविमुक्तोऽसौ सर्वदा सुखमाप्नुयात् ॥
ललितामोहनो यत्र वृषहत्यानिवृत्तये । अष्टषष्टिसमाख्याततीर्थानाहूय संस्नपन् ॥
वृषहत्याविमुक्तोऽसौ ख्यातौ द्वौ कुण्डविश्रुतौ । ललितामोहनौ कुण्डौ कृमिहत्याव्यपोहकौ ॥

ततो ललितामोहनकुन्डयोः स्नानप्रार्थनमन्त्रः—

नमो पातकविघ्नाघ्नौ ललितामोहनौ शुभौ । स्नापयेऽहं विमोक्षाय कुन्डौ नीरमनोहरौ ॥
इति मन्त्रं समुचार्य दशभिर्मज्जनैर्नमन् । आदौ तु ललिताकुण्डं स्नापयेद्दशमज्जनैः ॥
ततस्तु मोहनं कुन्डं सर्व हत्यान् विमुच्यति । भ्रूणहा कृमिहा गोहा ब्रह्महा स्वानहात्महा ॥
एताभ्यो षड् हत्याभ्यो स्नापनाच्च विमुच्यते ॥ ४ ॥

---

अरिष्ट बन है जो कि बहुत से बन्दरों से युक्त है । अनन्तर अरिष्ट बन प्रार्थनामन्त्र कहते हैं—हे अरिष्टरूपी बन ! तुमको नमस्कार २ । हे बन्दर समूह से मनोहर मेरा अरिष्ट नाश कीजिये । इस मन्त्र के ५ बार पाठ पूर्वक ५ नमस्कार करें । कदापि बहु शत्रु कर्तृक प्राप्त अरिष्ट नहीं रहता है । श्रीकृष्ण को मारने के लिये वृषरूप धारण कर आने के कारण पृथिवी में वृषासुर नाम से प्रसिद्ध हैं । स्कन्दपुराण में—जहाँ दैत्यराज धेनुकासुर कृष्ण द्वारा हत हुआ था । जहाँ प्रयोग करने से शत्रु कर्तृक बध का प्रयोग तथा ज्वरादिक अरिष्ट समूह नाश हो जाते हैं । यह उत्तम से उत्तम स्थान है । जहाँ एकैया, तँइया, चौथैया प्रभृति पुराना ज्वर नाश हो जाता है । ज्वर से मुक्त होकर प्राणी यावत् परमायु जीता है ॥ ३ ॥

धेनुकासुर बधस्थान प्रार्थनामन्त्र—हे कृष्ण कर्तृक नाश प्राप्त धेनुकासुर के बध स्थान ! हे गोपियों के भयहरण करने वाले सुन्दर स्थान ! तुमको नमस्कार । इस मन्त्र के ७ बार पाठ पूर्वक स्थल को प्रणाम करे तो समस्त अरिष्ट से मुक्त होकर सुख को प्राप्त होता है । ललितामोहन यहाँ वृषहत्या से निवृत्ति के लिये ६८ संख्यक तीर्थों को लाकर स्नान पूर्वक वृषहत्या से विमुक्त हुए इसलिये यह ललिता मोहन नामक दो कुण्ड पृथिवी में विख्यात हुए दोनों कुण्ड का स्नान प्रार्थनामन्त्र—हे ललिता, मोहन नामक दोनों कुण्ड ! आप पातक तथा विघ्नों का नाश करने वाले हैं । आपका मनोहर जल है । मैं मोक्ष के लिये स्नान करता हूँ । इस मन्त्र के पाठ पूर्वक १० बार प्रणाम करके मज्जन करें । पहिले ललिताकुण्ड में पश्चात् मोहनकुण्ड में स्नान करे । भ्रूणहत्या, कृमिहत्या, गोहत्या, ब्रह्महत्या, स्वानहत्या, आत्महत्या नामक छः प्रकार हत्या से मुक्त होता है ॥ ४ ॥

ततस्तु राधिकात्यक्तो ललितामोहनस्तदा । अस्माकं नैव संसर्गो वृषहत्यासमन्वितः ॥
नैव दृष्टा न ज्ञातव्यास्त्वस्मभितीर्थसंगता । न मन्तव्यं न मन्तव्यं वृषहत्याविमोचनं ॥
एतद्राधावचः श्रुत्वा कृष्णो विह्वलमानसः । ललितान्तु परित्यज्य राधापाणिं समाददे ॥
स्थित्वाग्रतः स्थले राजन् कुण्डे तीर्थान्समाह्वये । चक्रतुः स्नपनं यत्र राधाकृष्णौ सुनिर्मलौ ॥
यतस्तु पृथिवीलोके कुंडौ श्रीकृष्णराधिकौ । ललिता द्वयकुण्डाभ्यां जलं यत्रैवनीयते ॥
विमलौ सर्वपापघ्नौ ब्रह्महत्याविघातकौ । आदौ स्नानं तु राधायाःकुण्डे सर्वार्थदायकम् ॥
ततस्तु कृष्णकुण्डे तु सर्वपापप्रणाशनम् ।

ततो राधाकृष्णकुण्डयोः स्नानप्रार्थनमन्त्रः । वाराहे—

सर्वपापहरस्तीर्थं नमस्ते हरिमुक्तिद । नमः कैवल्यनाथाय राधाकृष्णाभिधायिने ॥
इति मन्त्रमुदाहृत्य अष्टषष्ठ्यादिमज्जनैः । स्नापयेद्विधिना पूर्वं नमस्कारं पृथक् पृथक् ॥
वृषहत्यादिपापानि प्रणश्यन्ति प्रभावतः । धनधान्यसुतोत्पत्तिश्चिराय सुखमाप्नुयात् ॥
द्वयोस्तु कुण्डयोश्चैव स्नानमेकविधं स्मृतम् ॥ ५ ॥
तयोस्तु संगमपार्श्वेसखीनां मण्डलं स्थलं । सरित्पूर्णविधानेन सखीनां सप्तम्यां निशि ॥
पूजनं विधिवत्कुर्यात् सरित्पूर्णफलं लभेत् । धनधान्यसमृद्धिं च सर्वदा सुखमाप्नुयात् ॥

ततो सखीमण्डलप्रार्थनमन्त्रः—

सखीनां मंडलायैव राधादिभ्यो नमो नमः । सर्वमंगलमांगल्यवरदाय नमो नमः ॥
इति मन्त्रं चतुषष्ठ्या वृत्तिभिः प्रणमेत्स्थलं । सर्वदा सुखमाप्नोति सर्वदा नेत्रशीतलः ॥ ६ ॥

---

श्रीराधा कर्तृक श्रीकृष्ण और ललिता त्यक्त होने लगे। क्योंकि आपने ब्रह्महत्या की, आपका संसर्ग हम सब में नहीं हो सकता है। आपने जो समस्त तीर्थों को बुला कर स्नान किया किम्वा तीर्थों को प्रकट किया सो हम सबने न देखा, न सुना, न मन में लाये। इस प्रकार राधिका के वचन को सुनकर श्रीकृष्ण विह्वल मन पूर्वक ललिता को छोड़ राधिका के हस्त धारण करने लगे। आगे स्थित कुण्ड पर समस्त तीर्थों के आह्वान पूर्वक श्री राधिका के साथ सखीगण को लेकर आपने स्नान किया। इसलिये पृथिवी में श्रीकुण्ड तथा कृष्णकुण्ड विख्यात हुए। उस समय श्री ललिता देवी लज्जिता होकर दोनों कुंडों से जल उठा कर अपने कुण्ड में डालने लगीं। दोनों कुण्ड विमल है तथा समस्त पाप और ब्रह्महत्या प्रभृति को नाश करने वाले हैं। पहिले समस्त अर्थ देने वाले राधाकुंड में स्नान करें, पश्चात् समस्त पाप नाश के लिये कृष्णकुंड में स्नान करें। अनन्तर दोनों कुंड का स्नान प्रार्थनामन्त्र कहते हैं। बाराह में—हे राधा कृष्ण नामक दोनों कुंड! आप समस्त पाप नाश करने वाले हैं। श्रीहरिप्राप्ति रूप मुक्ति कैवल्य को देने वाले हैं। इस मन्त्र के पाठ पूर्वक ६८ बार स्नान मज्जन नमस्कार करें तो ब्रह्म हत्यादि पाप समूह से मुक्त होकर धन, धान्य पुत्रादि के लाभ पूर्वक चिरायु होता है। दोनों कुंडों की स्नान विधि एक प्रकार है॥ ५॥

दोनों कुंड के संगम के पास सखीमण्डल स्थल है। सप्तमी की रात्रि में सरित्पूर्ण विधि से सखियों की पूजा विधि पूर्वक करने से सरित्पूर्ण फल प्राप्त होता है और धन, धान्य, समृद्धि लाभ पूर्वक सर्वदा सुख प्राप्त होता है। प्रार्थनामन्त्र—हे सखीयों के मण्डल स्थल! हे राधादिक! समस्त मंगल के मंगल

ततो यत्र कलाकेल्या सख्या वैवाहिकं स्थलं । दशवर्षस्वरूपेण कलाकेलिकृतो हरिः ॥
कृतं ललितया चैव प्रियग्रन्थि विनिर्मितम् । उच्चरन् बहुधा गीतं वैवाहिकसुमंगलम ॥
गानं सर्वसखिभिस्तु प्रियसौभाग्यवर्धनं । यतो वैवाहिकं स्थानं सर्वदैव वरप्रदम् ॥

ततो विवाहस्थलप्रार्थनमन्त्रः—

कलाकेलिविवाहस्थाशोकपुत्रीवरप्रदः । सुस्थानाय समानीय व्रजराजस्य हेतवे ॥
इति मन्त्रमुदाहृत्य सप्तभिः प्रणयेत्स्थलं । नारी सौभाग्यसंयुक्ताखण्डसौभाग्यमाप्नुयात् ॥७॥
तत्रैव संस्थितो कृष्णो राधया सहितो हरिः । राधावल्लभमूर्तिस्तु लोकानां वरदायकः ॥

ततो राधावल्लभप्रार्थनमन्त्रः । ब्रह्मवैवर्त्ते राधाखण्डे—

राधावल्लभरूपाय पुत्रपौत्रप्रदाय च । नमस्ते केशवायैव सर्वपापप्रणाशिने ॥
दशवर्षस्वरूपेण कलाकेलिं वृणोद्धरिः । इति मन्त्रं समुच्चार्य दशधा प्रणमेद्धरिम् ॥ ८ ॥
स्नानयात्राप्रसंगे तु स्थानमूर्त्योस्तु दर्शनम् । नैव कुर्यात् श्रमस्तस्य विफलस्तु प्रजायते ॥
यत्र तीर्थे स्थिताः विष्णो मूर्तयस्तु विराजिताः । नमस्कारैः पृथक् पूज्यास्तेऽपि सर्वे वरप्रदाः ॥
शापदा नैव पूज्याश्ते राधाकृष्णेन निर्मिता ॥ ९ ॥
ततो मदनगोपालमूर्तिर्भूत्वा स्थितो हरिः । लोकानां मोहनार्थाय गोपीनां च तथैव च ॥

ततो मदनगोपाल प्रार्थनमन्त्रः । विष्णुरहस्ये—

देवाय वासुदेवाय धर्मकामार्थदायिने । नमस्ते मोहनायैव श्रीमद्गोपालरूपिणे ॥
इत्येकादशभिर्मन्त्रं पठन्नत्र नमस्करोत् ! वैकुण्ठपदमाप्नोति पुण्यशीलसमो नरः ॥

---

सुन्दर वर को देने वाले ! आप सबको नमस्कार । इस मन्त्र का ६४ बार पाठ कर स्थल को नमस्कार करें ॥ ६ ॥

विविध गानों से वैवाहादि सुमंगल गाकर जहाँ सखियों के साथ उत्सव मनायें हैं और जहाँ कलाकेलि नामक सखी के साथ दस वर्ष स्वरूप श्रीकृष्ण का वरण हुआ था और श्री ललिता ने जहाँ पर दोनों की गाँठ बाँधी थी वही यह कलाकेलि नामक सखी का विवाह स्थल है । प्रार्थनामन्त्र यथा—हे कलाकेलि सखी के विवाहस्थल ! हे अशोक पुत्री को बर देने वाले, आप कृष्ण के लिये निर्म्मित सुन्दर स्थान हैं । इस मन्त्र के पाठ पूर्वक ७ बार नमस्कार करे तो नारी अखण्ड सौभाग्य को लाभ करती है ॥७॥

वहाँ श्रीकृष्ण राधिका के साथ राधाबल्लभ मूर्त्ति रूप से विराजित हैं और समस्त बर को देने वाले हैं । राधाबल्लभ प्रार्थनामन्त्र यथा—ब्रह्मवैवर्त्त के राधाखण्ड में—हे पुत्र पौत्र देने वाली श्रीराधा-बल्लभ मूर्त्ति ! आपको नमस्कार । हे सर्व पाप नाश करने वाले केशव आपको नमस्कार । इस मन्त्र के पाठ पूर्वक १० बार श्रीहरि को प्रणाम करे ॥ ८ ॥

स्नान, यात्रा प्रसंग में यदि स्थान और मूर्त्ति का दर्शन न करे तब उसका समस्त मनोरथ विफल हो जाता है । तीर्थों में जहाँ-जहाँ विष्णु मूर्त्ति विराजित हैं उन सब के नमस्कार पूर्वक पृथक् २ पूजा करे । वह समस्त श्रीराधाकृष्ण कर्तृक निर्म्मित तथा वर समूह को देने वाले हैं । यदि न पूजा करें तब शाप देते हैं ॥ ९ ॥

अनन्तर श्रीहरि मदनगोपाल रूप होकर विराजित हैं, जो गोपी और लोकों का मोहन के लिये

बनयात्राप्रसंगे तु विधिरेषा प्रकीर्तिता । इति श्रीकुण्डमाहात्म्यमुत्पत्तिस्नपनं यजं ॥
निरूपितं यथा सांगं त्रिषु लोकेषु मुक्तिदम् ।
इति श्रीकुण्डमाहात्म्यं ॥ १० ॥

अथ बनयात्राप्रसंगे नन्दग्रामतीर्थदेवोत्पत्ति माहात्म्यं । आदिपुराणे—

यत्र नन्दोपनन्दास्ते प्रतिनन्दाधिनन्दनाः । चक्रुर्वासं सुखस्थानं यतो नन्दाभिधानकं ॥
भाद्र कार्तिकयोः शुक्ले चतुर्थ्यामष्टमीदिने । बनयात्राप्रसंगस्तु सर्वकामार्थदायकः ॥११॥

ततो मधुसूदनकुण्डस्नानप्रार्थनमन्त्रः—

केशवाय नमस्तुभ्यं परमायुर्विवर्धने । मधुसूदन कृष्णाय देवानां हितकारिणे ॥
सप्तभिर्मंत्रमुचार्य स्नपनं मज्जनैर्नमन् । सर्वधर्मार्थकामादीन् लभते नात्र संशयः ॥ १२ ॥
मधुसूदनमूर्तिं च यशोदा यत्र स्थापयेत् ।

ततो मधुसूदनमन्त्रः—

यशोदाशासितायैव दैत्यदर्पविनाशिने । नमस्ते चिरजीवाय मधुसूदन केशव ॥
इति मन्त्रं दशावृत्या नमस्कारं समाचरेत् । परमायुः सजीविन्यां निरातंका निरीतयः ॥१३॥
यशोदा कुरुते स्नानं नित्यमेव दिनं प्रति । यतो संजायते कुण्डं यशोदासंज्ञकं शुभम् ॥
यत्र पयस्विनी नारी गवामधिपतिर्नरः । दर्शनात्स्नानतो वापि धनधान्यसुखैर्युतः ॥

ततो यशोदाकुण्डस्नानप्रार्थनमन्त्रः—

धनधान्यसुखं देहि तीर्थराज नमोस्तु ते । वैकुण्ठपदलाभाय प्रार्थयामि नमस्तु ते ॥
इति मन्त्रं समुचार्य मज्जनैर्दशधा स्नपन् । नमस्कारं प्रकुर्वीत पुत्रादिसुखमाप्नुयात् ॥१४॥

---

हैं । मदनगोपाल प्रार्थनामन्त्र विष्णुरहस्य में—हे देव ! हे वासुदेव ! हे धर्म, काम, अर्थ के देने वाले ! हे मोहन ! हे मदनगोपाल रूप ! आपको नमस्कार । इस मन्त्र के ११ बार पाठ पूर्वक नमस्कार करे । पुण्य-शील होकर मनुष्य वैकुंठ पद को प्राप्त होता है । बनयात्रा के प्रसंग में यह विधि कही गई है । इति श्रीकुंड का उत्पत्ति, महिमा, स्नपन, यजन यथा विधि सांग पूर्वक वर्णन किया गया है । जो तीन लोक में मुक्ति को देने वाले हैं ॥ १० ॥ इति श्रीकुंडउत्पत्तिमाहात्म्य ।

अब बनयात्रा प्रसंग में नन्दग्राम के तीर्थ, देवता की उत्पत्ति और माहात्म्य कहते हैं । आदि पुराण के अनुसार यहाँ नन्द, उपनन्द, प्रतिनन्द, अभिनन्द और सुनन्द ने वास किया है इसलिये यह नन्द-ग्राम नामक सुख स्थान है । भाद्रमास की शुक्ला चतुर्थी और कार्तिक मास की शुक्ला अष्टमी में बनयात्रा प्रसंग समस्त काम, अर्थादि देने वाला है ॥ ११ ॥

पहिले मधुसूदन कुंड प्रार्थनमन्त्र—हे केशव ! हे परमायु बढ़ाने वाले !, हे मधुसूदन, हे कृष्ण ! हे देवताओं के हित करने वाले ! आपको नमस्कार । इस मन्त्र का ७ बार पाठ कर स्नपन, मज्जन, नमस्कार करें तो समस्त धर्म्म, अर्थ, कामादि लाभ करता है इसमें कोई सन्देह नहीं है ॥ १२ ॥

श्री यशोदा कर्तृक मधुसूदन मूर्त्ति यहाँ स्थापित हैं । प्रार्थनामन्त्र यथा—हे यशोदाशासित दैत्य-दर्प विनाशी मधुसूदन ! आपको नमस्कार । आप चीरञ्जीवी हैं, केशव हैं । इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करें तो यावत्परमायु निर्भय होकर जीता है ॥ १३ ॥

श्री यशोदा प्रति दिन यहाँ स्नान करती हैं वह यशोदाकुंड है । यहाँ स्नान करने से नारी दुग्ध-

ततो हावप्रार्थनमन्त्रः—

नमः कृष्णेक्षकास्तुभ्यं धर्मकामार्थमोक्षिणः । पापाणरूपिणो देवाः यशोदाशीषसंस्थिताः ॥
इति मन्त्रं षडावृत्त्यापठञ्च प्रणमेन् च तान् । अभयं पदमाप्नोति परशंकाविवर्जितः ॥ १५ ॥
यत्रैव ललितायाता राधया प्रेषिता किल । सकेते कृष्णमानीय स्नपनं कुरुते स्थले ॥
यतस्तु ललिताकुण्डमभिधानमनोहरं । महातीर्थं समाख्यातं देवानामपि दुर्लभं ॥

ततो ललिताकुण्डस्नानप्रार्थनमन्त्रः—

ललिते स्नपने रम्ये स्वर्गद्वारविधायिने । नमो विमलतोयाय तीर्थराज नमोस्तु ते ॥
इति मन्त्रमुदाहृत्य सप्तभिर्मज्जनैः स्नपन् । नरो मोक्षमवाप्नोति ललिताकुण्ड संस्मरन् ॥ १६ ॥
ललिता स्नपनं कृत्वा मोहनेक्षणमिच्छति । ततस्तु तत्समीपे तु स्नापितं कृष्णमोक्षयेत् ॥
तत्रैव ललिता कुर्यात्कुण्डमोहनसंज्ञकम् । यत्र स्नायाद्विधानेन कृष्णदर्शनमाप्नुयात् ॥
साफल्यपदमाप्नोति जगन्मोहनकारकम् ।

ततो मोहनकुण्डस्नानप्रार्थनमन्त्रः—

नमो मोहनकुण्डाय जाह्नवीफलदायिने । नमः कैवल्यनाथाय कृष्णदर्शनहेतवे ॥
इति मन्त्रं दशावृत्या मज्जनैः स्नपनं नमन् ॥ १७ ॥
यत्र नन्दादयो गोपाः गवां दोहनमाददुः । नन्दाः श्वेतांश्च गांश्चैव दुदुहुरयुताधिकाः ॥
मणार्धं दुग्धतः पूर्णं त्वाभीरगोकुलोत्सवाः । प्रतिनन्दास्तथा पीता उपनन्दाश्च रक्तकाः ॥

---

यती और नर गौमान् होता है । दर्शन तथा स्नानादिक से धन, धान्य, सुख को प्राप्त होता है । अनन्तर प्रार्थनामन्त्र कहते हैं । हे तीर्थराज ! आपको नमस्कार । धन, धान्य सुख को दीजिये । वैकुण्ठ प्राप्ति के लिये आपको नमस्कार करता हूँ । इस मन्त्र के पाठ पूर्वक १० बार स्नान नमस्कार करे तो पुत्रादि सुख प्राप्त होता है ॥ १४ ॥

अनन्तर हाव प्रार्थनामन्त्र—हे कृष्ण दर्शन करने वाले ! हे धर्म्म, अर्थ, काम, मोक्ष देने वाले ! हे पाषाणरूपधारी, हे यशोदा के आशिष से वर्द्धित आप सबको नमस्कार । इस मन्त्र के ६ बार पाठ पूर्वक सबको नमस्कार करे तो अभय पद को प्राप्त होता है और भय से रहित हो जाता है ॥ १५ ॥

यहाँ राधा कर्तृक प्रेषित श्री ललिता ने श्रीकृष्ण को इस संकेत स्थल में लाकर स्नान कराया । इसलिये इसका नाम ललिता कुंड है । यह देवताओं को भी महादुर्ल्लभ महान् तीर्थ है । अनन्तर ललिता-कुंड स्नान प्रार्थनामन्त्र कहते हैं । हे मनोहर ! हे ललिता कर्तृक स्थापित स्थल ! हे स्वर्गद्वार देने वाले ! हे विमल जल वाले ! हे तीर्थराज ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ७ मज्जन, स्नान, नमस्कार करें । ललिताकुंड के स्मरण से मोक्ष मिलती है ॥ १६ ॥

ललिताजी श्रीकृष्ण मोहन को स्नान कराकर देखने लगीं और उस समय मोहन नामक कुंड की सृष्टि हुई, यहाँ विधि पूर्वक स्नान करने से श्रीकृष्ण का साक्षात् दर्शन होता है और प्राणी जगत् मोहनकारी सुन्दर पद को प्राप्त होता है । प्रार्थनामन्त्र—हे मोहनकुंड ! हे गङ्गा फल देने वाले ! हे कैवल्य नायक ! श्रीकृष्ण दर्शन के लिये आपको नमस्कार । इस मन्त्र के १० बार पाठ करके मज्जन स्नपन नमस्कार करें॥१७॥

अब दोहिनीकुंड का वर्णन करते हैं । जहाँ नन्दादि गोपगण गोदोहन करते थे । श्रीनन्द

अभिनन्दास्च धूम्राश्चासितवर्णविवर्जिताः । यत्र कुर्याद्गवां दानं पुण्यकोटिगुणं फलम् ॥
अशक्तौ तु गवां दाने स्वर्णरूप्यादिदोहनीम् । दद्याद्विप्राय विज्ञाप्य दशलक्षगुणं फलम् ॥
प्रतापमार्तण्डे—दुग्धकुंडे पयोदानं स्वयं पानमथाचरेत् । स्वर्णादिपात्रके धृत्वा शर्करोपरि संस्थितम् ॥
नमः प्रदक्षिणी कृत्य ब्राह्मणाय निवेदयेत् । गवामधिपतिर्भूयात् शतसंख्याभिधायिनाम् ॥
यतस्तु दोहनीकुण्डं नन्दग्रामे शुभप्रदम् ।

ततो दोहनीकुण्डस्नानप्रार्थनमन्त्रः—

नमो निर्मलतोयाढ्य देवानाञ्च सुधामय । नमस्ते द्रोह सम्भूत सर्वकामार्थदायक ॥
इति मन्त्रमुदाहृत्य दशभिर्मज्जनैः स्नपन् । नमन्सुफलमाप्नोति सकलेष्टफलं शुभम् ॥१८॥
यत्र नन्दादयो गोपा दुग्ध्वा दुग्धं समादधुः । दुग्धकुण्डं समाख्यातं यत्र दुग्धमयोऽभवत् ॥

ततो दुग्धकुण्डस्नानप्रार्थनमन्त्रः । धौम्योपनिषदि —

सुधामयस्वरूपाय देवमोक्षप्रदायिने । नमः कैवल्यनाथाय सर्वदारोग्यतां कुरु ॥
इति मन्त्रं चतुर्भिस्तु मज्जनैः स्नपनं नमन् । देवतुल्यं भवेत्कायं परमेशपदं लभेत् ॥१६॥
भुक्त्वासौ दधिभाण्डं तु कृष्णो यत्र दधिक्षिपेत् । मात्रा संतर्जयन् धावन दधिना भूमिपूरिता ॥
यतस्तु दधिकुंडस्तु देवानाममृताह्वयः । देवानां दुर्लभः श्रेष्ठः मुनिगन्धर्वयोगिनां ॥
दधिदानं च विप्राय दत्त्वाथ स्वयमश्नुते । दशकोटिगुणं पुण्यं फलमाप्नोति मानवः ॥

ततो दधिकुंडप्रार्थनमन्त्रः—

देवानां दुर्लभतीर्थं नमस्तेऽमृतरूपिणे । जलरूपहरस्तुभ्यं पयोराशि शुभप्रदं ॥
इति मन्त्रं त्रयस्त्रिंशैः पठन् स्नायात्तु मज्जनैः । साफल्यपदमाप्नोति गोरसैः सर्वदा सुखं ॥२०॥

---

श्वेत वर्ण, आधा मन दुग्ध देने वाली अयुत संख्या से अधिक गौओं का उसी प्रकार प्रतिनन्द पीला गौओं का, उपनन्द रक्तवर्ण गौओं का, अभिनन्द धूम्राट वर्ण गौओं का दोहन करते थे । जहाँ गौ दान करने से कोटि गुणा फल मिलता है । गौ का दान करने में अशक्त हों तब सुवर्ण की दोहनी बना कर निवेदन पूर्वक ब्राह्मण को दान करे । उससे लक्षगुण फल होता है । प्रतापमार्त्तण्ड में कहा है—दुग्धकुंड में दुग्ध दान करे । अनन्तर स्वयं पान करें । सुवर्णादिक पात्र में शक्कर मिलाकर दुग्ध रख नमस्कार प्रदक्षिणा पूर्वक ब्राह्मणों के लिये निवेदन करे तो शत संख्यक गौओं का अधीश्वर होता है । इसलिये नन्दीश्वर में शुभप्रद दोहिनीकुंड है । प्रार्थनामन्त्र यथा—हे निर्म्मल जल वाले ! हे अमृतमय ! आपको नमस्कार है । आप दोहन से उत्पन्न हैं और समस्त काम अर्थ देने वाले हैं । इस मन्त्र के पाठ पूर्वक १० बार मज्जन, स्नान, नमस्कार करें तो समस्त इष्ट फलों की प्राप्ति करता है ॥ १८ ॥

अनन्तर दुग्धकुंड का वर्णन करते हैं । जहाँ नन्दादिक गोप दुग्ध दोहन कर रखते थे, वहाँ दुग्ध-कुंड है जो इस कारण से उत्पन्न हुआ है । स्नान प्रार्थनमन्त्र यथा—धौम्य उपनिषद् में—हे अमृतमय स्वरूप ! हे देवताओं को मोक्ष देने वाले ! हे कैवल्य नायक ! आपको नमस्कार । आप सर्वदा आरोग्य दीजिये । इस मन्त्र के ४ बार पाठ पूर्वक मज्जन, स्नान, नमस्कार करे तो देवता के सदृश शरीर लाभ कर विष्णु पद को प्राप्त होता है ॥ १६ ॥

अब दही कुंड का वर्णन करते हैं । श्रीकृष्ण ने दधि भोजन कर दधि के बर्त्तन यहाँ फेंके हैं ।

भवन्ति देवता: सर्वे पवित्रश्च सरोवरम् । तस्मात्पावननामासौ लोकानां पावनीकृतम् ॥
पवित्ररूपिणं तीर्थं ब्रह्महत्यादिनाशनम् । तिलादिपुण्यधान्यानां स्वर्णादीनां च पावनं ॥
दानं विप्राय दातव्यं काचनांगद्युतिप्रदम् ।

ततो पावनसर: स्नानप्रार्थनमन्त्र:—

नम: पावनरूपाय देवानां कल्मषापहम् । नन्दादिपावनायैव तीर्थराज नमोस्तु ते ॥
इति मन्त्रं समुच्चार्य षोडशैर्मज्जनैर्नमन् । स्नपनं चक्रिरे लोका वैकुण्ठपदमाप्नुयात् ॥२१॥
तत्रैव सरसो मध्ये यशोदाकूपमुत्खनत् । यत्र कूपं पिवेत्तोयं कृष्णतुल्यं सुतो भवेत् ॥
घटैर्दुग्धं प्रदातव्यं नन्दग्रामाधिशालिने । पितृणामक्षयं दत्तं फलमाप्नोति मानव: ॥

ततो यशोदाकूपस्नानाचमनमन्त्र: । आदिवाराहे—

कामसेनीसुताकूप सुपुत्रफलदायक । नम: पावनतीर्थाय गोपिकायै नमस्तु ते ॥
सप्तभि: पठते मन्त्रं मज्जनाचमनं चरेत् । सुपुत्रफलमाप्नोति धनधान्यादिसम्पदम् ॥२२॥
तत्समीपेऽकरोन्माताकृष्णविक्रीडनायसा । कदम्बानां बनं श्रेष्टं गोपिकाप्रियवल्लभं ॥
कदम्बखण्डिमाख्यातमतिसौभाग्यवर्धनं ।

ततो कदम्बबनप्रार्थनमन्त्र: —

गोपिकाबल्लभायैव कृष्णगोपालरूपिणे । नमस्ते सुखरूपाय यशोदानन्दनाय च ॥

---

माता कर्तृक तर्जित होकर प्रभु भागे और दधि के साथ बर्त्तनों को भी धरती में दबा दिया। इसलिये यह दधि कुंड है। देवता, गन्धर्व, मनुष्य, मुनि, ऋषि, योगियों को भी यह स्थान दुर्लभ है। मनुष्य यहाँ यदि ब्राह्मण को दधि दान करें एवं स्वयं दधि भोजन करें तब दशकोटि गुण फल प्राप्त होता है। स्नान प्रार्थना-मन्त्र यथा—हे देवदुर्लभ तीर्थ! अमृत स्वरूप आपको नमस्कार। हे जलरूप! हे शुभद! पाप राशि समूह का हरण कीजिये। इस मन्त्र के ३३ बार पाठ पूर्वक मज्जन, स्नान, नमस्कार करे तो साफल्य पद को प्राप्त होता है और गोरस से सवदा सुखी रहता है ॥ २० ॥

अब पावन सरोवर का वर्णन करते हैं—देवतागण भी यहाँ पावन होते हैं, इसलिये मनुष्यों को पवित्र करने वाला यह पावन सरोवर है। यह परम पवित्र है और ब्रह्म हत्यादि के पाप का नाश करने वाला है। यहाँ तिल, धान्यादि प्रदान करने से बड़ा पुण्य होता है और सुवर्ण दान करने से सुवर्ण सदृश अङ्ग की कान्ति होती है। स्नानप्रार्थनामन्त्र यथा—हे पावनरूप! हे देवताओं के कल्मष नाशक! आपको नमस्कार। हे तीर्थराज! आपको नमस्कार। आप नन्दादिकों को पावन करने वाले हैं। इस मन्त्र के पाठ पूर्वक १६ नमस्कार करे तो नमस्कार स्नानादि से वैकुण्ठ पद प्राप्त होता है ॥ २१ ॥

उस सरोवर के मध्य में यशोदाकूप है। इस कूये का जल पान करने से कृष्ण तुल्य पुत्र होता है। नन्दग्राम के मनुष्यों के लिए द्रव्यों के साथ घट दान करे तो मनुष्य अक्षय पितृलोक फल को प्राप्त होता है। प्रार्थनामन्त्र—आदिवाराह में—हे कामसेनिकन्या के कूप! हे सुन्दर पुत्र फल को देने वाले! हे पावन तीर्थ! हे गोपिका! आपको नमस्कार। ७ बार पाठ पूर्वक मज्जन, स्नान, आचमन करें तो धन, धान्यादि सम्पत्ती के लाभ पूर्वक सुन्दर पुत्र प्राप्त होता है ॥ २२ ॥

उसके पास कदम्बखण्डि है जो माता यशोदाजी ने अपने पुत्र श्रीकृष्ण के क्रीड़ा सुख के लिये

इति मन्त्रं चतुर्भिस्तु नमस्कारं समाचरेत्। घटिमात्रं विलम्ब्यात्र वैकुण्ठपदमाप्नुयात् ॥२३॥
दधि मंथनमाचक्रे यशोदायुतकं दधि। चतुर्थांशायुतं सर्पि दधिमाखनभाजनौ ॥
लघुदीर्घौ विराजन्तौ नन्द वेश्मसमीपतः।

ततो दधिभाजनप्रार्थनमन्त्रः—
कामसेनिसुताकार्य सुमिष्टदधिभाजनौ। नमस्त्वमृतरूपाय देवानां मोक्षहेतवे ॥
इति मन्त्रमुदाहृत्य दशधा च नमस्करोत्। दशाचमनमाचक्रे तक्रं संकुशमीकृतम् ॥
चिरजीवी भवेल्लोको गवामधिपतिर्भवेत्। धनधान्यसुताद्यैश्च परिवारसुखं चिरं ॥२४॥
ततो नन्दीश्वरं रुद्रं नाम्ना संस्थापयेत्प्रिया। नन्दीश्वरं नन्दपत्नी स्थापितं मंगलार्थये ॥
परिवारसुखार्थाय कुलाभीर संवृद्धये।

ततो नन्दीश्वरप्रार्थनमन्त्रः। स्कान्दे—
नन्दीश्वराय देवायाभीरोत्पत्तिहिताय च। यशोदासुखदायैव महादेवाय ते नमः ॥
शक्राद्गत्यापठनमन्त्रं नमस्कुर्याच्चतुर्दशैः। चिरायुर्भवति लोको धनधान्यसुखं लभेत् ॥२५॥
इति प्रासादितो रुद्रो यशोदायै वरं ददौ। स्वकीयाय कृतार्थाय वरं प्रार्थयते हरः ॥
यत्राहं पर्वतो भूये बलकृष्णसुते नमः। नन्दधातृसमेतस्त्वं ममोपरि विराजते ॥

ततो नन्दधाममन्दिरे नन्दयशोदाकृष्ण बलभद्रप्राथनमन्त्रः। ब्रह्मवैवर्त्ते—

---

लगायी रखी थी। यह गोपिकाबल्लभ श्रीकृष्ण का परम प्रियस्थल है। जो अत्यन्त सौभाग्य वर्द्धक है। प्रार्थनामन्त्र—हे गोपिकाबल्लभ! हे कृष्णगोपालरूप! आपको नमस्कार। आप सुखरूप हैं। यशोदा को आनन्द देने वाले हैं। इस मन्त्र के ४ बार पाठ पूर्वक नमस्कार करे और घड़ी मात्र यहाँ विश्राम करे तो वैकुण्ठ पद अवश्य प्राप्त होता है ॥ २३ ॥

अब दधिमन्थन स्थान का वर्णन करते हैं। यहाँ श्री यशोदाजी दधि मंथन करती थीं। यह दधिमंथन स्थान है। दो बर्त्तन थे एक तो दही का बर्त्तन दूसरा दधि से उत्पन्न चतुर्थांश घृत का बर्तन। एक बड़ा दूसरा छोटा है। नन्दगृह के सन्मुख भाग में दोनों रक्खे जाते थे। दोनों का प्रार्थनामन्त्र—हे दधिबर्त्तन! हे घृत वर्त्तन! आप दोनों अमृत रूप हैं। जो देवताओं की मोक्ष के लिये हैं। आप यशोदा द्वारा साधे गये हैं। आपको नमस्कार। इस मन्त्र के पाठ पूर्वक १० नमस्कार और १० आचमन करे। वहाँ तक्र पान करें तो मनुष्य चिरञ्जीवी होकर गौओं का स्वामी होता है। धन, धान्य, सुत व परिवारादि के लाभ पूर्वक सुखी होता है ॥ २४ ॥

अनन्तर यशोदा कर्तृक स्थापित नन्दीश्वर नामक शिवलिंग है। जो नन्दग्राम के मंगल के लिये है और परिवार के साथ समस्त आभीरगणों के सुख के लिये है। नन्दीश्वर प्रार्थनामन्त्र। स्कान्द में—हे नंदीश्वर! हे देव! हे आभीरगणों के सुख के लिये उत्पन्न! हे यशोदा को सुख देने वाले! हे देवाधिदेव महादेव! आपको नमस्कार। १४ बार मन्त्र पाठ पूर्वक १४ नमस्कार करे तो मनुष्य चिरायु लाभ करके धनधान्य व सुख को प्राप्त होता है ॥ २५ ॥

इस प्रकार प्रसन्न होकर श्रीरुद्र ने यशोदा के लिये बर दिया। अब रुद्र भी अपने कृतार्थ के लिये प्रार्थना करने लगे। मैं पर्वत रूप से विराजित हूँ। आप पति नन्दजी के साथ तथा पुत्र कृष्ण, बलदेवजी

नन्दधात नमस्तुभ्यं यशोदायै नमो नमः। नमः कृष्णाय बालाय बलभद्राय ते नमः ॥
इति मन्त्रं चतुर्भिस्तु चतुर्धा प्रणमेन्नरः। सर्वदा सुखमाप्नोति चिरकालस्य सम्पदा ॥ २६ ॥
यशोदायाः महान्पुत्रो नन्दपत्न्याः समुद्भवः। ज्येष्ठो युगलमूर्तिस्तु यशोदानन्दनाभिधः ॥
कृष्णरामान्वितान्मातुः पृथक्संस्थो बृहत्सुतः।

ततो यशोदानन्दनयुगल प्रार्थनमन्त्रः। भविष्योत्तरे—

यशोदानन्दनायैव युगलाय स्वरूपिणे। नमस्तु नन्दसत्पुत्रभूमिदीप्तिकृताय च ॥
इति मन्त्रं चतुर्भिस्तु पठञ्च प्रणतीश्चरेत्। चतुराचमनं दुग्धं यत्र कुर्यात् सुधी नरः ॥
सर्वदा तृप्तिमाप्नोति चिरंजीवी भवेत्किल ॥ २७ ॥
सीमायां ग्रामतो स्थित्वा नन्दादिभ्यो नमश्चरेत्।

ततो षड्त्रिंशनन्दोपनन्दप्रतिनन्दाधिनन्दप्रार्थनमन्त्रः—

नमो नन्दोपनन्देभ्यो प्रतिनन्दाय ते नमः। नमोभिनन्दगोपेभ्यो सुपुत्रेभ्योऽर्थसिद्धये ॥
इति मन्त्रं तु षड्त्रिंशैः पठंस्तु प्रणतीश्चरेत्। नन्दस्य परिवारे च परिवारोऽस्य जायते ॥
इत्येते देवताः ख्याता नन्दग्रामव्रजौकसः। तीर्थाः पुण्यफलाः प्रोक्तास्त्रिवर्गफलदायिनः ॥
इति सदेवतीर्थं नन्दग्राम उत्पत्ति माहात्म्य निरूपणं ॥ २८ ॥

अथ बनयात्राप्रसंगे सदेवतीर्थनामाख्यबनोत्पत्तिमहात्म्यनिरूपणं। ब्राह्मे—

भाद्रशुक्ले तु पूर्णायां बनयात्रा समाप्यते। गढ़ नाम्नो बनस्यापि माहात्म्यं च प्रदर्शयेत् ॥
आसीद्व्योमासुरो नाम बलदेवरिपुर्बली। वासं यत्र चकारासौ महद्वप्रे मनोहरं ॥

---

के साथ मेरे पृष्ठ के ऊपर बिराजें। अनन्तर नन्दधातृमंदिर में नंद, यशोदा, कृष्ण, बलदेव के प्रार्थनामंत्र-ब्रह्मवैवर्त्त में—हे नंदधातृ! तुमको नमस्कार। हे यशोदे! आपको नमस्कार। हे बालक श्रीकृष्ण तथा बलदेव! आप दोनों को नमस्कार। इस मन्त्रके ४ बार पाठ पूर्वक ४ नमस्कार करें तो सर्वदा सुखके लाभ पूर्वक चिरकाल तक धनी होकर रहता है ॥ २६ ॥

यशोदा के महान पुत्र हैं, जो नंदपिता से उत्पन्न हैं। यशोदानंदन नामक युगल मूर्त्ति है। ज्येष्ठ बलराम कनिष्ठ श्रीकृष्ण हैं। भविष्योत्तर में—हे यशोदा आनंदक! हे युगल स्वरूप! हे नंद सत्पुत्र! आप भूमि को उज्वल करने के लिये हैं; आपको नमस्कार। इस मंत्र के ४ बार पाठ पूर्वक नमस्कार करें। वहाँ सुधी मनुष्य दुग्ध द्वारा ४ बार आचमन करे तो सर्वदा तृप्ति लाभ पूर्वक चिरञ्जीवी होता है ॥ २७ ॥

ग्राम की सीमा पर रह कर नन्दादिक को नमस्कार करे। नमस्कार की संख्या ३६ बार है। अनन्तर नन्द, उपनन्द, प्रतिनन्द, अधिनन्द, सुनन्द का प्रार्थनमन्त्र यथा—हे नन्द! हे उपनन्द! हे प्रतिनन्द! हे अभिनन्द! हे सुनन्द! आप सबको नमस्कार। पुत्र, पौत्र, परिवार गणों के साथ आप सबको नमस्कार। इस मन्त्र के ३६ बार पाठ पूर्वक प्रणाम करे तो अवश्य श्रीनन्द के परिवार में जन्म लेता है। इति यह सब तीर्थ, देवता, वर्णन किये गये हैं जो सब त्रिवर्ग फल को देने वाले हैं। इति देवता के साथ तीर्थ नन्दग्राम उत्पत्ति महात्म्य निरूपण किया गया है ॥ २८ ॥

अब बनयात्रा प्रसंग में सदेव तीर्थ बनों की उत्पत्ति व महिमा कहते हैं। ब्रह्मपुराण में—भाद्र

वज्रकीलं गिरिं यत्र स्थापयेद्रक्षणाय च । हलायुधविघाताय मुसलखण्डनाय च ॥
लघुप्रकार विस्तारं ग्रन्थभूयस्त्व शंकया । वक्ष्येऽहं रम्यं ग्रन्थं व्रजभक्तिविलासकं ॥इति भट्टोक्ति॥२६॥

ततो व्योमासुरप्रार्थनमन्त्रः । लैंगे—

बलदेवारिहर्म्याय शक्रादीनां परिग्रह । देवरूपाय देवाय सुस्थलाय नमो नमः ॥
इति मंत्रं नगावृत्या नमस्कारं समाचरेत् । पदं मोक्षमवाप्नोति सर्वबन्धात्प्रमुच्यते ॥३०॥

ततो वज्रकीलप्रार्थनमन्त्रः—

वज्रकीलायते तुभ्यं नमस्तु गिरये नमः । बलभद्रार्थिने तुभ्यं देवानां वरदायिने ॥
इति मन्त्रं समुचार्य सप्तभिस्तु नमश्चरेत् । पदमैन्द्रमवाप्नोति पुनर्जन्म न विद्यते ॥ ३१ ॥

भविष्ये—

गोकुले सः समागत्य व्योमासुरो नभोगतिः । स्कन्धमारुह्य शेषाख्यं नभसि तु स्थले भ्रमन् ॥
तत्रैव बलदेवस्तु पातयन्तं भुवस्थले । खण्ड खण्डं हलेनापि चकार मुसलायुधो ॥
दशयोजनविस्तीर्णं शरीरं तस्य संस्थितं । यत्र ब्रह्मादयो देवा बलभद्राभिषेचनं ॥
चक्रुस्ततो बभूवात्र बलभद्रसरः शुभम् ।

ततो बलभद्रसरः स्नानप्रार्थनमन्त्र—

नमो भद्रस्वरूपाय सुभद्राय शुभप्रदः । अभद्रनाशिने तुभ्यं नमः संकर्षणाय ते ॥
इति मन्त्रमुदाहृत्य सप्तभिर्मज्जनैः नमन् । स्नानं कुर्याद्विधानेन चिरजीवी भवेन्नरः ॥ ३२ ॥

---

शुक्लपक्ष की पूर्णिमा में बनयात्रा समाप्त होने पर गढ़ नामक बन का महात्म्य भी दिखावें । व्योमासुर नामक बलदेवजी का शत्रु महान् बली दत्य था । जिसने यहाँ आकर सुन्दर गुफा का निर्म्माण करके वास करने लगा । उसने रक्षा के लिये वज्रकीलगिरी को स्थापन किया था । हलधर के विनाश के लिये तथा मूसल खण्डन के लिये वह निरन्तर चेष्टा करता था इस कारण से यहाँ व्योमासुर का गृह है । मैं संक्षेप भाव से ग्रन्थ का वर्णन करता हूँ । विशेष वर्णन से ग्रन्थ विस्तार का भय होता है । यह मेरा सुन्दर व्रजभक्तिविलास नामक ग्रन्थ है ( स्वयं भट्टजी के वचन ) ॥ २६ ॥

व्योमासुर गृह प्रार्थनामन्त्र-लिंगपुराण में—हे बलदेव के शत्रु व्योमासुर के गृह ! हे देवदुर्ल्लभ ! हे देवरूप ! हे देव ! सुन्दर स्थल आपको नमस्कार । इस मन्त्र के ७ बार पाठ पूर्वक नमस्कार करे तो उसको मोक्ष पद अवश्य मिलता है तथा पुनर्जन्म नहीं होता ॥ ३० ॥

अनन्तर बज्रकीलगिरि का प्रार्थनमन्त्र—हे वज्रकीलगिरि ! बज्रकीलक रूप आपको नमस्कार । आप बलदेवजी के लिये निर्म्मित किये गये हैं और देवताओं को वर देने वाले हैं । इस मन्त्र के ७ बार पाठ पूर्वक नमस्कार करे तो उसको इन्द्र पद मिलता है और पुनर्जन्म नहीं होता है ॥ ३१ ॥

भविष्य में—व्योमासुर, आकाश गति से गोकुल में आकर शेष देव को कन्धे पर चढ़ाकर अपने स्थल में आकाश पर घूमने लगा । अनन्तर मूषलधारी बलदेव ने उसको पृथिवी के ऊपर गिराकर हल द्वारा उसका शरीर टूक २ कर दिया । दशयोजन विस्तार का उसका शरीर था । जहाँ ब्रह्मादि देवताओं ने आकर बलदेव जी का अभिषेक किया । इसलिये यहाँ बलभद्र सरोवर हुआ है । प्रार्थनामन्त्र—हे भद्रस्वरूप ! हे सुभद्र ! हे शुभ को देने वाले ! हे अशुभ नाशक ! हे संकर्षण ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ७ बार नमस्कार करे । विधि पूर्वक स्नानादि करने से चिरञ्जीवी होता है ॥ ३२ ॥

तत्तीरे पूर्णिमारात्रौ कृष्णो गोपिभिः संयुतः । रासक्रीडां करोत्यत्र वहुधा विमलो भवन् ॥
भ्रातुर्विजयसंस्थानव्योमासुरबधस्थले ।

ततो रासमण्डलप्रार्थनमन्त्रः—

बल्लभाय च गोपीनां नमस्ते रासमण्डल । भूमिभारावताराय प्रसीद परमेश्वर ॥
इति मन्त्रं दशावृत्या पठंञ्च प्रणमेद्धरिम् । सर्वदा सुखमाप्नोति विचरन् पृथिवीतले ॥ ३३ ॥
बज्रकीलोपरि कृष्णो राधया सहितो गमन् । मीनलग्नोदये जाते दानलीलां च भोजनम् ॥
प्रसादं दत्तवान्नत्र सर्वेभ्योच्छिष्टमोदकान् । राधाबल्लभमूर्तिस्तु मन्दिरे प्रवभूवह ॥

ततो राधाबल्लभमन्दिरालोकप्रार्थनमंत्रः । वृहत्पाराशरे—

नमस्तु बल्लभायैव राधाप्रिय मनोहर ! । गोलोकपदरूपाय नमस्तेच्युतशोभने ॥
इति मन्त्रमुदाहृत्यैकादशप्रणतीन् चरेत् ॥ ३४ ॥
पर्वतोपरि संस्थित्य वाक्यैः कृष्णः समाह्वयन् । गोपालांञ्च सखीनत्र वाक्यनामा भवद्वनम् ॥

ततो वाक्यबनप्रार्थनमन्त्रः—

कृष्णवाक्यसमुद्भूत वधिरान्धविनाशन । सर्वदारोग्यलाभाय वाक्यनाम्ने नमस्तु ते ॥
इति मंत्रं समुचार्य दशधा प्रणमेद्वनम् । वधिरान्धो भवेत् यत्र मासत्रयतपश्चरेत् ॥
वधिरान्धद्वयद्रोगान्मुच्यते नात्र संशयः । इति वप्रब्रने देवास्तीर्थाः पुण्यफलप्रदाः ॥
पूर्णायां बनयात्रायां समापनं समाचरन ।
इतिबनयात्राप्रसंगे वाक्यवप्रबनोत्पत्तिमहात्म्यनिरूपणम् ॥३५॥

---

उस कीनार में पूर्णिमा की रात्रि में श्रीकृष्ण ने गोपियों के साथ बहु प्रकार की रासक्रीड़ा की है। अनन्तर रासमण्डल स्थल प्रार्थनामन्त्र—हे गोपीवल्लभ ! इस रासमण्डल में आपको नमस्कार। हे परमेश्वर ! प्रसन्न होइये। आप पृथिवी के भार नाश के लिये हैं। इस मन्त्र के १० बार पाठ पूर्वक हरि को प्रणाम करे तो सर्वदा सुख को पाकर पृथिवी में विचरण करता है ॥ ३३ ॥

बज्रकीलगिरि के ऊपर श्रीकृष्ण ने राधिकाजी के साथ जाकर मीन लग्न के उदय में दानलीला, भोजनादिक किया और समस्त गोपियों को उच्छिष्ट प्रसाद मोदकादिक प्रदान किये। मन्दिर में राधावल्लभ मूर्त्ति विराजित हुई। राधावल्लभ मन्दिर दर्शन प्रार्थनामन्त्र-वृहत्पराशर में—हे कृष्णवल्लभा ! हे मनोहर राधावल्लभ ! आपको नमस्कार। हे गोलोक पद स्वरूप ! हे अच्युत शोभना ! आपको नमस्कार । इस मंत्र के पाठ पूर्वक ११ प्रणाम करे ॥ ३४ ॥

पर्वत के ऊपर भाग में जाकर श्रीकृष्ण मनोहर वाक्य से गोपाल सखाओं को आह्वान करने के कारण यहाँ वाक्यबन है। प्रार्थनामन्त्र [यथा—हे कृष्णवाक्य द्वारा उत्पन्न ! हे वधिरता, अन्धता नाश करने वाले ! सर्वदा आरोग्यता प्राप्ति के लिये आपको नमस्कार। इस मंत्र के पाठ पूर्वक दस बार प्रणाम करे। यदि बधिर अन्ध हो तो तीन मास तपस्या करने से अवश्य दोनों रोगों से मुक्ति लाभ करता है। यह वप्रबन में पुण्यफल प्रदान करने वाले देवता, तीर्थों का वर्णन हुआ है। पूर्णिमा में बनयात्रा का समापन करें। इति बनयात्रा प्रसंग में वाक्य तथा वप्र अधिबन की उत्पत्ति महिमा निरूपण हुआ है ॥३५॥

अथ ललिताग्राम उच्चग्राम तीर्थ देवोत्पत्तिमहात्म्यनिरूपणम् । विष्णुरहस्ये—

यत्र गोपसुताः सर्वा ललितादिप्रभृतयः । क्रीड़ाश्चक्रुः समासेन श्रीकृष्ण गुण मोदिताः ॥
यस्मात्सखी गिरिर्नाम बभूव व्रजमण्डले ॥ ३६ ॥

तत्पार्श्वे खिसलीख्याता कृष्णक्रीड़ा शिलास्थिता । भाद्रे मासे सितेपक्षे तृतीयायां शुभदिने ॥
बनयात्राप्रसंगस्तु क्रोशत्रयप्रविस्तृतः ।

ततो खिसलिनीशिलाप्रार्थनमन्त्रः—

सह गोपालकृष्णाय स्खलनक्रीडनाय च । यशोदानन्दनायैव सुस्थलाय नमो नमः ॥
इति मन्त्रं दशावृत्या नमस्स्खलनमाचरेत् । स्वर्गश्रेणीं समारुह्य वैकुण्ठपदमाप्नुयात् ॥३७॥
यत्र कृष्णकृतोद्वाहे ललिता व्रज क्रीडकः । सप्तवर्षस्वरूपेण ललितां संवृणोद्धरिः ॥
यतो वैवाहिकं स्थानं शक्रादीनां वरप्रदम् ।

ततो वैवाहिकस्थलप्रार्थनमन्त्रः—

व्रजोत्सवाय कृष्णाय व्रजराजाय शोभिने । ललितायै नमस्तुभ्यं व्रजकेल्यै नमो नमः ॥
सप्तधा पठते मन्त्रं नमस्कारं समाचरेत् । दम्पत्योर्बहुधा प्रीतिः सर्वदा चिरवर्धिनी ॥
कुमारी वा कुमारोऽसौ कृष्णोद्वाहसुखं लभेत् । कृष्णतुल्यो भवेल्लोको नारी स्याल्ललितासमा ॥
वृद्धो मोक्षपदं लब्ध्वा देवदम्पतितां चरेत् ॥ ३८ ॥

ततस्त्रिवेणीतीर्थप्रार्थनमन्त्रः । कौर्म्ये—

कृष्णाज्ञासंप्रवर्त्तिन्यै त्रिवेण्यै सततं नमः । परं मोक्षपदं देहि धनधान्यप्रवृद्धिनी ॥

---

अब ललिताग्राम तथा ऊंचा गाँव के तीर्थ, देवताओं की उत्पत्ति व महिमा कहते हैं । विष्णु-रहस्य में—यहाँ श्रीकृष्ण के गुण समूह पर मुग्ध होकर ललितादि गोप कन्याओं ने सर्व प्रकार क्रीड़ा की है । इसलिये इसका नाम सखीगिरि करके व्रजमण्डल में प्रसिद्ध है ॥ ३६ ॥

उसके पास स्खलिनी नाम से प्रसिद्ध श्रीकृष्ण की क्रीड़ा शिला है । भाद्र मास के शुक्लपक्ष की तृतीया शुभ तिथिमें यहाँ बनयात्रा प्रसंग है । यह विस्तार में तीन कोस है । स्खलिनी शिला प्रार्थनामन्त्र—गोपालगणों के साथ श्रीकृष्ण की खिसनी क्रीड़ा के लिये सुन्दर शिलास्थान ! आपको नमस्कार । आप यशोदानन्दन रूप हैं । इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करें तो स्वर्ग की सीड़ी में चढ़ कर वैकुण्ठ को प्राप्त होता है ॥ ३७ ॥

यहाँ श्रीकृष्ण ने सात साल स्वरूप से ललिताजी का वरण किया यह वैवाहिक स्थान है, जो इन्द्रादि देवताओं को दुर्लभ है । प्रार्थनामन्त्र—हे व्रज के उत्सव स्वरूप ! हे कृष्ण ! हे व्रजराज ! हे शोभनस्वरूप ! आपको नमस्कार । हे श्री ललिते ! व्रज क्रीड़ा परायण आपको नमस्कार । ७ बार पाठ पूर्वक नमस्कार करें तो चिर काल पर्य्यन्त दम्पत्ति में बहुत प्रकार से प्रीति बनी रहती है । कुमारी और कुंवर होय तो श्रीकृष्ण के तुल्य विवाह उत्सव का लाभ प्राप्त करता है । नर श्रीकृष्ण के तुल्य और नारी ललिता के तुल्य हो जाती हैं । वृद्ध मोक्षपद को प्राप्त होता है ॥ ३८ ॥

अनन्तर त्रिवेणीतीर्थ प्रार्थनामन्त्र—कौर्म्म में—हे कृष्ण की आज्ञा से प्रवर्त्तिते त्रिवेणि ! आपको नमस्कार । श्रेष्ठ मोक्ष को दीजिये । धन, धान्य, सुख की वृद्धि कीजिये । श्रीकिशोरी रूपा श्रीललिता उच्च

उच्चग्रामनिवासिनीं भगवतीं वेणीं महास्वर्णदीं, स्नानार्थं ललिता गता शुभप्रदा नाम्नी किशोरीमता ।
स्नानार्थं समुपागता च रमणो श्रीरेवतीं वल्लभां, श्रीदेवो बलदेवः सन्निधिगतां स्नायात्प्रभोरग्रजः ।
इति मन्त्रं समुचार्य नमस्कारत्रयं चरेत् । त्र्यंगुलिभिः समादाय धूलिं धार्य ललाटके ॥
परमेशपदं लब्ध्वा कृतार्थः स्वाङ्गुवस्थले । नित्यं धूलिं ललाटे च वेणीस्नानफलं लभेत् ॥३९॥

ततो रासमण्डलप्रार्थनमन्त्रः—

सख्यान्विताय कृष्णाय रास क्रीडान्विताय च । वेणीरम्यकृतार्थाय सुस्थलाय नमो नमः ॥
इति मन्त्रं दशावृत्या नमस्कारं पठंश्चरेत् ॥ ४० ॥
कूपं चक्रुश्च ताः सर्वाः सख्यस्तु ललितादयः । अपः पानाय कृष्णस्यागमनायेक्षणाय च ॥
सखी कूपं समाख्यातं त्रिवेण्यां मण्डले स्थले ।

ततो सखिकूपस्नानाचमनमन्त्रः—

कृतार्थोऽसि सखीकूप देवानां मुक्तिहेतवे । ललितायाः स्वपानाय सखीकूप नमोऽस्तु ते ॥ ४१ ॥
इति मन्त्रं षडावृत्या मज्जनाचमनं नमन् । मुक्तो कृतार्थतां याति भगवद्भक्त वत्सलः ॥
यत्रैव नारदो मुक्तो भट्टनारायणस्तथा ॥ इति भट्टोक्तिः ॥ ४२ ॥

ततो श्रीबलदेवप्रार्थनमन्त्रः । पाद्मे—

रेवतीरमणायैव नमस्ते मुसलायुध । लाङ्लिेय समेताय हलायुध नमोऽस्तु ते ॥
इत्येकविंशवारैस्तु नमस्कारं समाचरेत् । कृतार्थो जायते लोको सर्वधान्यधनैर्युतः ॥ ४३ ॥

---

गाँव निवासिनी, महास्वर्गंगा भगवती, वेणी में स्नान के लिये गई और भी श्रीकृष्ण के अग्रज, रेवती-वल्लभ, श्रीदेव देव बलदेव ने आकर स्नान किया था । इस मन्त्र के पाठ पूर्वक ३ बार नमस्कार करे और तीन अंगुल से धूलि उठाकर ललाट में धारण करें तो परमेश्वर पद के लाभ पूर्वक पृथिवी में कृतार्थ हो जाता है । ललाट में नित्य धूलि धारण करने से त्रिवेणी स्नान का फल प्राप्त होता है ॥ ३९ ॥

अनन्तर रासमण्डल प्रार्थनामन्त्र—हे सखीयों के द्वारा युक्त श्रीकृष्ण ! हे रासक्रीड़ा परायण ! हे सुन्दर रासस्थल ! आपको नमस्कार । आप वेणी के मनोहर करने के लिये हैं । इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करे ॥ ४० ॥

अनन्तर ललितादि सखीगणों ने श्रीकृष्ण को आगमन की प्रतीक्षा में उत्कण्ठित होकर जल-पान के लिये कूआ बनाया, जिसका नाम सखी कूप है जो त्रिवेणी मण्डल में विराजित है । स्नानप्रार्थनामन्त्र-हे सखीकूप ! तुम कृतार्थ हो और देवताओं की मुक्ति के लिये हो । अपने जल पान के लिये ललिता कर्तृक निर्मित हो तुमको नमस्कार । इस मन्त्र के ६ बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करे तो मुक्त होकर कृतार्थ हो जाता है और भगवान् का प्रिय होता है ॥ ४१ ॥

यहाँ श्रीनारद जी और भट्ट नारायण जो मैं हूँ मुक्त हो गये-हैं ॥ ४२ ॥

अनन्तर बलदेव प्रार्थनामन्त्र । पाद्म में—हे रेवतीरमण ! मूशल-आयुधधर ! आपको नमस्कार । हे हलायूध ! लाड़िलेय सहित आपको नमस्कार ! इस मन्त्र के २१ बार पाठ पूर्वक नमस्चार करे तो कृतार्थ होकर धन, धान्य से युक्त होता है ॥ ४३ ॥

ततो ललितास्थलप्रार्थनमन्त्रः—

ललिताक्रीडनस्थान नमस्ते मोहनप्रिय ! । सखिरम्याय मोक्षाय हरिसांनिध्यहेतवे ॥
इति मन्त्रं समुच्चार्य प्रणामं त्वष्टभिश्चरेत् । सुशीलपदमाप्नोति भगवत्पार्श्वस्थोभवत् ॥४४॥
ततो पुष्करिणीख्याता गोपिकानां सखिगिरौ । यत्रैव ललिताद्यास्ताः सख्यः स्नानं समाचेरुः ।
गोपीपुष्करिणीख्याता देवानां दुर्लभा शुभा ।

ततो गोपिकापुष्करिणीस्नानाचमनमन्त्रः—

पुष्करिण्यै नमस्तुभ्यं मुक्तिदायै नमो नमः । साफल्यप्रदप्राप्त्यै सर्वकल्मषनाशये ॥
इति मन्त्रं समुचार्य्य पञ्चभिर्मज्जनैर्नमन् । स्नानं पठन् समाचक्रे वैकुण्ठपदमाप्नुयात् ॥४५॥

ततो उलूहलिमंत्रं उच्चरन्नभिषेचनपूर्वकं पठन् वैकुण्ठपदं लभेत्—

यत्र वदरिकां नीत्वा खंडिकुर्वंस्तु वर्चनं । उलूखलाः कुरु सख्यः दशधा च स्थिताः शुभाः ॥

उलूखलीप्रार्थनमन्त्रः—

उलूखल्यो नमस्तुभ्यं सखीनां प्रियवल्लभाः । मोक्षदाः शुभदाः नित्यं सखीगिरिशिखास्थिताः ॥
इति मन्त्रं त्रिभि रुक्त्वा कृत्वा वर्चनमाचरेत् । नमस्कारत्रयंकृत्वा क्षुधातृप्तः सदास्थितः ॥४६॥
यत्रैव ललितानां च सखिनां पादलिंगगाः । सप्ताब्दपरिवेषाणां मृगतृष्णेव दृष्टिगाः ॥
क्रीड़ाभिर्निर्मिता रम्या सखिगिरिशिखोपरि ।

ततो सखिचरण प्रार्थनमन्त्रः । मात्स्ये—

सखीनां चरणेभ्यस्तु नमस्ते मोक्षदायिनः । निर्धौत कल्मषांघ्रयस्तु पावनेभ्यो नमो नमः ॥
इति मन्त्रं समुचार्य्य स्पृष्ट्वा लोचनयोर्नमन् । विष्णोः शरणमाप्नोति पुण्यशीलसमो नरः ॥

---

अनन्तर ललितास्थल प्रार्थनामन्त्र—हे ललिता क्रीड़ास्थल ! हे मोहन प्रिय ! आपको नमस्कार । आप सखीगणों से वेष्ठित होने के कारण मनोहर हैं । आप हरि के सान्निध्य के लिये हैं । इस मन्त्र के उच्चारण पूर्वक ८ बार प्रणाम करे तो सुशील होकर भगवत्पार्षदत्व लाभ करता है ॥ ४४ ॥

अनन्तर गोपी पुष्करिणी है । जो परम मनोहर है और सखीगिरि में है । यहाँ ललितादि सखी-गणों ने स्नान किया था जो देवताओं को भी अति दुर्ल्लभ हैं । स्नानाचमन प्रार्थनामन्त्र—हे गोपी पुष्क-रिणी ! आपको नमस्कार । आप मुक्ति के देने वाली हैं । साफल्य पद प्राप्ति के लिये और समस्त कल्मष नाश के लिये आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ५ बार मज्जन करे स्नान करें और नमस्कार करे तो वैकुण्ठ पद को प्राप्त होता है ॥ ४५ ॥

यहाँ सखीयों ने वदरिका लेकर खण्ड-खण्ड पूर्वक उलूखल बना कर दस स्थलों पर रखा था वह वदरिका उलूखलि स्थान है । प्रार्थनामन्त्र—हे उलूखलियाँ ( ऊखल ) आप सबको नमस्कार । आप सब सखीयों की परम वल्लभा हैं । नित्य सखीगिरि पर बिराजिता हैं । शुभ और मोक्ष को देने वाली हैं । इस मन्त्र के तीन बार पाठ पूर्वक शिखर देश में अर्च्चना करें और तीन बार नमस्कार करें तो क्षुधा पिपासा नाश हो जाती है और सर्वदा तृप्त रहता है ॥ ४६ ॥

यहाँ ललितादि सखीयों के चरण चिन्ह समूह हैं । बहुत दिन पर्य्यन्त ढूँढ़ने से मृगतृष्णा की झाईं के न्याय दीख पड़ते हैं । वे सखीगिरि के शिखर देश में क्रीड़ा से निर्म्मित हैं । प्रार्थनामन्त्र—मात्स्य

ततो राधाकृष्णदर्शनप्रार्थनमन्त्रः—

नमः प्रियायै राधायै ब्रह्मणो वरदायिने । सर्वेष्टफलरम्याय राधाकृष्णाय मूर्तये ॥
इति मन्त्रमुदाहृत्य सप्तभिः प्रणमेत्प्रियाम् । वाञ्छितं फलमाप्नोति विचरन् व्रजमण्डले ॥
मुक्तिभागीभवेल्लोको नित्यदर्शनकारकः ॥ ५१ ॥

भाद्रशुक्लतृतीयायां बनयात्रा वरप्रदः । भाद्रकार्तिकयोर्मासे पक्षयोरुभयोरपि ।
न्यूनाधिक्ये दिने जाते न्यूनाधिक्यं न कारयेत् । बनयात्रा हरेर्लीला संख्या प्रोक्ता दिनान्तरे ॥
न्यूनाधिक्यदिनेष्वेषु न्यूनाधिक्यं न विद्यते । बनयात्राप्रसंगस्तु लीलाकृष्णकृताशुभा ॥
दिनमभ्यन्तरे कार्यं न्यूनाधिक्ये दिने यदि । यस्यां तिथौ यदाप्रोक्ता लीलावनप्रदक्षिणा ॥
या तिथिःक्षयमाप्नोति आगमिन्यां तिथौ चरेत् । वृद्धि प्राप्ते तिथौ वापि तामेव तु परेत्यजेत् ॥
न्यूनाधिक्यं न विद्यते दिनसंख्या समाचरेत् । भाद्रशुक्लतृतीयायामुषित्वाथ निशीथके ॥
वृषभानुपुरे यात्रा साङ्ग एव समर्थिता ॥ इति भविष्ये ॥ ५२ ॥

ततो वृषभानुपुरदर्शनप्रार्थनमन्त्रः—

महीभानुसुतायैच कीर्तिदायै नमो नमः । सर्वदा गोकुले वृद्धि प्रयच्छ मम कांक्षितां ॥
इति मन्त्रं दशावृत्या नमस्कारं समाचरेत् । सर्वदा गोकले वृद्धि धनधान्यसमाकुलः ॥५३॥

---

कृतयुग के अन्तभाग में ब्रह्माजी ने श्रीहरि की प्रार्थना की कि हे रासबिहारी ! आप मेरे ऊपर के भाग में ब्रज गोपीयों के साथ सदा रासबिहार करें। विशेष करके वर्षा काल में विविध लीला विलास द्वारा कृतार्थ करें। श्रीभगवान ने कहा कि हे ब्रह्मा ! तुम वृषभानुपुर में जाकर पर्वत रूप हो जाओ तो तुम पर्वत होकर मेरी विविध लीलाओं का दर्शन करोगे। इसलिये ब्रह्माजी पर्वत होकर बरसाने में विराजित हैं। ॥ ५० ॥

अनन्तर राधाकृष्ण दर्शन प्रार्थनामन्त्र—हे प्रिय ! हे श्री राधिके ! आपको नमस्कार है। आप ब्रह्माजी को बर देने वाले हैं। आप दोनों मनोहर हैं और श्री राधाकृष्ण स्वरूप हैं। इस मन्त्र के पाठ पूर्वक ७ बार प्रियाजी को प्रणाम करे तो वाञ्छित फल के लाभ पूर्वक ब्रजमण्डल में विचरण करे और मुक्तिभागी होकर नित्य दर्शन का लाभ करता है ॥ ५१ ॥

भाद्र शुक्ल तृतीया के दिन बनयात्रा श्रेष्ठप्रद है। भाद्र और कार्त्तिक के दोनों पक्षों में यदि तिथी घट बढ़ जावे तो भी घट बढ़ न मान कर दिन की गणना से बनयात्रा करें और लीला का अनुकरणादिक करावें। जिस तिथि में जो लीला और जो प्रदक्षिणा कही गई है उस दिन उस लीला को अवश्य माने और उसी दिन में वही प्रदक्षिणा करें। यदि तिथी क्षय प्राप्त होकर आगे की तिथि में हो किम्वा तिथि की वृद्धि हो तो दोनों का वर्जन करे। केवल दिन गिन कर लीला प्रभृति का समाधान करें। कारण इसमें न्यूनाधिक्य नहीं हैं। भाद्र शुक्ल तृतीया में वास पूर्वक निशीथ में वृषभानुपुर की सांगयात्रा करें। यह भविष्य में उल्लेखित है ॥ ५२ ॥

वृषभानुपुरदर्शनप्रार्थनामन्त्र—हे महीभानु सुता श्री कीर्त्तिदे ! आपको नमस्कार । आप सर्वदा गोकुल में मेरी आकांक्षा पूर्ण कीजिए। इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करे तो सर्वदा गोकुल में धन, धान्य, सुख लाभ करता है ॥ ५३ ॥

तवो राधा प्रियं कृष्णं वाक्यमूचे कृतार्थकृत् । मम पितृपुरे त्वं हि मया सह प्रतिष्ठतु ॥
ब्रह्मा कृतार्थतां याति मम प्रीतिकरो भव । तत्रैव श्रीराधा प्रियं श्रीकृष्णं ब्रह्मा विज्ञाप्य—
तस्य वृषभानुपुरे ब्रह्मनाम पर्वतोऽस्ति । तस्योपरि विहारार्थे स्वकीयं मन्दिरं कृत्वा हेमाद्रौ ह्येकदा
समये कृष्णेन राधायाः दानो याच्यते । तस्माद्दान प्रवासः स्याद्रास क्रीड़ास्थलो भवः ॥ ५४ ॥

ततो राधादिनवसख्यवलोकनप्रार्थनमन्त्रः । ब्राह्मे—
प्रियायै च नमस्तुभ्यं ललितायै नमो नमः । चम्पकाद्यै सखिभ्यस्तु चन्द्रावल्यै नमो नमः ॥
इति मन्त्रं दशावृत्या नमस्कारान् पृथक् चरेत् ॥ ५५ ॥

ततो दानमन्दिरप्रार्थनमन्त्रः—
दानवेषधरायैव दध्युपाम्याभिलाषिणे । राधानिर्भर्त्सितायैव कृष्णाय सततं नमः ॥
इति मन्त्रं समाहृत्य चतुर्धा प्रणमेत्स्थलं । दधिना पूजयेत् यत्र हिन्डोलसहितं स्थलं ॥
सर्वदा सुखमाप्नोति दम्पति मनसेप्सितम् ॥ ५६ ॥

ततो मयूरकुटीस्थलप्रार्थनमन्त्रः—
किरीटिने नमस्तुभ्यं मयूरप्रियवल्लभ ! । सुरम्यायै महाकुट्यै शिखण्डिपदवेश्मने ॥
इति मन्त्रं समुच्चार्य सप्तभिः प्रणमेत्स्थलं । यत्र स्थित्वा मयूरेभ्यो भोजनं विधिवच्चरेत् ॥
सुप्रियाभिः रमेन्नित्यं सर्वदानन्दवर्धनं ॥ ५७ ॥

( बनयात्रानिषेधः ब्रह्मयामले )—
बनयात्राप्रसंगेषु पार्श्वं स्थानि बनानि च । वामदक्षिणयोर्मार्गे सन्मुखपृष्ठभागयोः ॥

---

अनन्तर श्री राधा प्रिय कृष्ण से कहने लगीं कि तुम मेरे पिताजी के नगर में मेरे साथ सर्वदा बिराजिये । जिससे ब्रह्माजी भी कृत-कृत्य हो जायेंगे और मेरा स्थान प्रियकर होगा । वहाँ ब्रह्माजी पर्वतरूप होकर ब्रह्मगिरि नाम से विख्यात हुए । श्रीराधा प्रिय के साथ विविध बिहार के लिये अपने महल निर्म्माण पूर्वक रहने लगे । सुवर्ण पर्वतमें एक समय श्रीकृष्ण ने प्रियाजी से दान माँगा । इसलिये दान प्रवास नामक रासक्रीड़ा स्थल हुआ है ॥ ५४ ॥

अनन्तर राधादिक नौ सखियों का अवलोकन प्रार्थनामन्त्र—ब्राह्म में—हे प्रियाजी ! आप को नमस्कार । हे ललिते ! आपको नमस्कार । हे चम्पकलता प्रभृति सखीयो ! हे चन्द्राबलि ! आपको नमस्कार । इस मन्त्र के १० बार पाठ पूर्वक पृथक् २ नमस्कार करें ॥ ५५ ॥

अनन्तर दानमन्दिर प्रार्थनामन्त्रः—हे दानी वेषधारी ! हे दधि, दुग्ध अभिलाष करने वाले ! श्री राधाकर्तृक भर्त्सित श्रीकृष्ण आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ४ बार स्थान को प्रणाम करें और दधि लेकर हिण्डोला के साथ स्थान की पूजा करें तो सर्वदा सुख मिलता है और दम्पत्ति अपनी मनः कामना को प्राप्त होते हैं ॥ ५६ ॥

अनन्तर मयूरकुटी स्थल प्रार्थनामन्त्र—हे किरीटधारी मयूरप्रिय श्रीकृष्ण ! आपको नमस्कार । हे मयूरकुटी नामक मनोहर महाकुटी ! आपको नमस्कार । इस मन्त्र के ७ बार पाठ पूर्वक प्रणाम करे । यहाँ निवास करके मयूरों के लिये विधि पूर्वक भोजन प्रदान करने से सुन्दरी स्त्री प्राप्त होती है और सर्वदा सुख मिलता है ॥ ५७ ॥

बनयात्रा का निषेध ब्रह्मयामल में—बनयात्रा प्रसंग में पार्श्वस्थ बाम, दक्षिण, आगे, पीछे, बन

संस्कारबनयात्रा स्यात् कृतयात्राफलं लभेत् । कृतयात्राफलं लब्ध्वा सांगा तत्र प्रदक्षिणा ॥
गमागमनचिन्तायाः हेतुर्नैवोपजायते ॥ इति निषेधः ॥ ५८ ॥

ततो मयूरकुटीस्थले रासमण्डलप्रार्थनमन्त्रः । आदिवाराहे—

नमः सखीसमेताय राधाकृष्णायते नमः । विमलोत्सवदेवाय व्रजमंगलहेतवे ॥
इति मन्त्रं नवावृत्या मण्डलाय नमश्चरेत् । वैकुण्ठपदमाप्नोति धनधान्यादिभिः सुखी ॥ ५६ ॥

ततो लीलानृत्यमण्डलसांकरीखोरि दर्शन प्रार्थनमन्त्रः—

दधिभाजनशीर्षाः स्ताः गोपिकाकृष्णरुन्धिताः । तासां गमागमौ स्थानौ ताभ्यां नित्यं नमश्चरेत् ॥
इति मन्त्रं समुचार्य यथाशक्त्या नमश्चरेत् । नानाभोगविलासाढ्य : गोरसैः सौख्यमाप्नुयात् ॥६०॥

ततो विलासमन्दिरप्रार्थनमन्त्रः—

विलासरूपिणे तुभ्यं नमः कृष्णाय ते नमः । सखीवर्गसुखाप्ताय क्रीड़ाविमलदर्शिने ॥
इति त्रयोदशावृत्या पठन्मन्त्रं नमश्चरेत् । कलत्रादिधनैर्धान्यैश्चिरञ्जीवी सुखी सदा ॥ ६१ ॥

ततो गह्वरबनप्रार्थनमन्त्रः । बृहन्नारदीये—

गह्वराख्याय रम्याय कृष्णलीलाविधायिने । गोपीरमणसौख्याय बनाय च नमो नमः ॥
इति षोडशवृत्तिभि र्मन्त्रमुक्त्वा नमश्चरेत् । भगवच्छखीतां लब्ध्वा मुक्तिभागी भवेन्नरः ॥६२॥

ततो रासमंडलप्रार्थनामन्त्रः—

विलासरासक्रीडाय कृष्णाय रमणाय च । दशवर्षस्वरूपाय नमो भानुपुरे हरे ॥

---

समूह का संस्कार यात्रा होती है । जिससे कियी हुई यात्रा फल देती है । यात्रा फल के साथ सांग प्रदक्षिणा भी हो जाती है । जाऊं किम्बा न जाऊं इसकी चिन्ता नहीं रहती है । इसका नाम संस्कार बनयात्रा ॥ ५८ ॥

अनन्तर मयूरकुटी स्थल में रासमण्डल प्रार्थनामन्त्र—आदिबाराह में—हे सखीगणों के साथ श्री राधाकृष्ण ! आपको नमस्कार । विमल उत्सव देने वाले हे देव ! आप व्रजमण्डल के हित के लिये हैं । इस मन्त्र के ६ बार पाठ पूर्वक मण्डल को प्रणाम करे तो धन, धान्यादिक से सुखी होकर वैकुण्ठ पद को प्राप्त होता है ॥ ५६ ॥

अनन्तर लीला नृत्यमण्डल सांकरीखोरि दर्शन प्रार्थनामन्त्र—दही बर्त्तन मस्तक में बिराजित और श्रीकृष्ण कर्तृक रोक दी गयी गोपियों के यह आने जाने का रास्ता है । उसको नित्य नमस्कार करें । इस मन्त्र के पाठ पूर्वक यथाशक्ति नमस्कार करे तो नाना भोग विलास और गोरस सुख का अनुभव होता है ॥ ६० ॥

अनन्तर विलास मन्दिर प्रार्थनामन्त्र—हे विलास रूप श्रीकृष्ण ! आपको नमस्कार । आप सखी समूह के सुख के लिये और विमल क्रीड़ा देखने वाले हैं । इस मन्त्र का १३ बार पाठ करके नमस्कार करे तो धन, धान्य कलत्रादि लाभ पूर्वक चिरञ्जीवी होता है ॥ ६१ ॥

अनन्तर गह्वरबन प्रार्थनामन्त्र—बृहन्नारदीय में—हे गह्वरनामक रम्य श्रीकृष्ण लीला विधान के स्थान ! आपको नमस्कार ; आप गोपीरमण श्रीकृष्ण के सुख के लिये हैं । इस मन्त्र के १६ बार पाठ पूर्वक नमस्कार करे तो भगवान के सख्य भाव के लाभ पूर्वक मुक्तिभागी होता है ॥ ६२ ॥

अनन्तर रासमण्डल प्रार्थनामन्त्र—हे विलासि ! हे रासक्रीड़ा परायण ! हे कृष्ण ! हे रमण !

इति मन्त्रं दशावृत्या पठन्स्तु प्रणमेत्स्थलं । परिवारसुखेनापि सर्वदा सुखमाप्नुयात् ॥ ६३ ॥
यत्र राधा चतुः षष्ठि सखिभिः समुपागता । नित्य स्नानकृता साध्वी यतो राधा सरोऽभवत् ॥

ततो राधासरस्नानाचमनमन्त्रः—

देवकृतार्थरूपायै श्रीराधासरसे नमः । त्रैलोक्यपदमोक्षाय रम्यतीर्थाय ते नमः ॥
इति मन्त्रं दशावृत्या मज्जनाचमनैः स्नपन् । गोपीनां पूजनं कुर्यात् वस्त्रालंकरणादिभिः ॥
कृतार्थी भवति लोके देवयोनिमवाप्नुयात् ॥ ६४ ॥
वृषभानुश्च यत्रैव सर्वगोपैः समन्वितः । गोदोहनं समाचक्रे बल्लभीपूर्णकामभिः ॥
यस्मात्संजायते तीर्थं दोहनीकुण्डसुस्थलं ।

ततो दोहनीकुण्डस्नानाचमनप्रार्थनमन्त्रः—

रक्तनीलसिताधूम्रापीतागोदोहनप्रद ! । वृषभानुकृतस्तीर्थ नमस्तुभ्यं प्रसीद मे ॥
इति मन्त्रं चतुर्भिस्तु स्नानाचमनकैः स्नपेत् । सर्वदा बहुदुग्धैस्तु परिपूर्णमनोरथः ॥
यत्रैव दुग्धपूर्णां च दोहिनीं दानमाचरेत् । ततो स्वयंमुपोह्य ति त्रैलोक्याधिपतिर्भवेत् ॥
मोक्षाख्यपदवीं लब्ध्वा चिरञ्जीवी भवेन्नरः ॥ ६५ ॥
यत्रैव चित्रलेखा च नित्यस्नानं समाचरेत् । मयूरेभ्योऽशनं दत्वा क्रीडानं चैव पश्यति ॥
मयूरसरसाख्यं च चित्रलेखाविनिर्मितं ।

ततो मयूरसरस्नानाचमनप्रार्थनमन्त्रः—

मयूरक्रीडिने तुभ्यं चित्रलेखे नमोस्तु ते । त्रैलोक्यपदमोक्षाय मयूरसरसे नमः ॥
इति मन्त्रं समुच्चार्य पंचभिर्मज्जनाचमैः । नमस्कारं प्रकुर्वीत परं मोक्षपदं लभेत् ॥ ६६ ॥

---

आपको नमस्कार। आप दस वर्ष की अवस्था धारण करके वृषभानुपुर में बिराजित हैं। इस मन्त्र के १० बार पाठ पूर्वक स्थान को प्रणाम करे तो परिवार के साथ विविध सुख को प्राप्त होता है ॥ ६३ ॥

यहाँ साध्वी श्री राधिका ६४ सखीयों को लेकर स्नान करती थीं वहाँ राधा सरोवर है। स्नान प्रार्थनामन्त्र यथा—हे राधिका सरोवर ! देवतागणों को कृतार्थ करने वाले ! आपको नमस्कार। आप तीन लोक में मोक्ष देने वाले हैं और मनोहर तीर्थ हैं। इस मन्त्र के १० बार पाठ पूर्वक मज्जन, आचमन, स्नान करे और वस्त्र, अलंकार द्वारा गोपीयों की पूजा करें तो मनुष्य कृतार्थ होकर देवयोनि को प्राप्त होता है ॥ ६४ ॥

यहाँ वृषभानु जी समस्त गोपों के साथ मिलकर गोदोहन करते थे वहाँ दोहिनीकुण्ड है। गोपियों की कामना यहाँ पूर्ण हुई है। स्नानप्रार्थनामन्त्र यथा—हे रक्त, नील, शुभ्र, धूमाट और पीत रङ्ग की गौ के दोहन स्थल ! हे वृषभानु द्वारा निर्मित तीर्थ ! तुमको नमस्कार। प्रसन्न होइये। इस मन्त्र के ४ बार पाठ पूर्वक स्नान, आचमन, नमस्कार करें तो सर्वदा प्रचुर दुग्ध मिलता है। वहाँ दोहनी में दुग्ध पूर्ण कर दान करने से तीन लोकों का अधिपति होता है और चिरञ्जीवी होकर मोक्ष पद को प्राप्त होता है ॥ ६५ ॥

यहाँ चित्रलेखा सखी नित्य आकर स्नान करती है और मयूरों को भोजन देकर क्रीड़ा देखती है वह चित्रलेखा निर्म्मित मयूर सरोवर है। स्नानाचमनप्रार्थनामन्त्र—हे प्रिय मयूर ! हे चित्रलेखा ! आपको नमस्कार। आप तीन लोक और मोक्ष को देने वाली हैं। हे मयूरखोर ! आपको नमस्कार। इस मन्त्र के पाठ पूर्वक पाँच मज्जन, आचमन द्वारा नमस्कार करे तो परम मोक्ष पद को प्राप्त होता है ॥ ६६ ॥

यत्रैव वृषभानुश्च नित्यस्नानं चकारह । यत्रैव कृतदोषाश्च कायमानसवाचकाः ॥
स्नपनात्तोऽपि नश्यन्ति दानं शतगुणं फलं ।

ततो भानुसरोवरस्नानाचमन प्रार्थनमन्त्रः । विष्णुधर्मोत्तरे—
निर्धूतकिल्विषायैव गोपराजकृताय ते । वृषभानुमहाराजकृताय सरसे नमः ॥
इति मन्त्रं शतावृत्या मज्जनाचमनैर्नमन् । सर्वान्कामानवाप्नोति धनधान्यसुखैर्युतः ॥
कृष्णादर्शनमाप्नोति मुक्तिभागी भवेन्नरः । नित्यमेव कृताद्दोषान्मुच्यते नात्र संशयः ॥ ६७ ॥
कीर्तिश्च यत्र गोपीभिः सह स्नानं समाचरेत् । सौभाग्यसुतधान्यादिसुखमाप्नोति मानवः ॥
यतो कीर्त्तिसरःख्यातं सकलेष्टप्रदायकं ।

ततो कीर्तिसरः स्नानाचमनप्रार्थनमन्त्रः । वृहत्पाराशरे—
नमः कीर्तिर्महाभागे सर्वेषां गोव्रजौकसां । सर्वसौभाग्यदे तीर्थे सुकीर्तिसरसे नमः ॥
इति मन्त्रमुदाहृत्य नवभिर्मज्जनाचमैः । स्नपनं कुरुते लोको लभते मोक्षसम्पदम् ॥ ६८ ॥
वृषभानुसरःपार्श्वे महारुद्रं व्रजेश्वरं । ततो भान्वादयो गोपाः स्थापयेदिष्टसिद्धये ॥

ततो व्रजेश्वराख्यमहारुद्रप्रार्थनमन्त्रः । गौरीतन्त्रे—
व्रजेश्वराय ते तुभ्यं महारुद्राय ते नमः । व्रजौकसां शिवार्थाय नमस्ते शिवरूपिणे ॥
शक्रावृत्या पठेन्मन्त्रं सर्वकल्याणमाप्नुयात् । व्रजे वसन्सदा नित्यं भुंक्ते सौभाग्य सम्पदम् ॥६९॥
ललितामोहनो यत्र शूरभक्ताय दर्शनं । ददौ नेत्रं प्रफुल्लास्यो दर्शनेक्षणकं वरं ॥
यत्रैवान्धो कृतस्नानं परं मोक्षपदं लभेत् ।

---

यहाँ वृषभानु जी नित्य स्नान करते हैं वह भानुसरोवर है । स्नान मात्र से ही कायिक, वाचिक, मानसिक पाप समूह नाश हो जाते हैं । यहाँ दान देने से शत गुण फल मिलता है । भानुखोर स्नानाचमन प्रार्थनामन्त्र—विष्णुधर्मोत्तर में—हे कल्मष को धोने वाले ! हे गोपराज वृषभानु द्वारा निर्मित ! हे भानुसरोवर आपको नमस्कार । इस मन्त्र के १०० बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करे तो समस्त कामनाओं को प्राप्त होकर धन, धान्य, सुख परायण होता है और श्रीकृष्ण के दर्शन प्राप्त करके मुक्ति भागी होता है । वह नित्य किये गये दोषों से मुक्त हो जाता है इसमें कोई सन्देह नहीं है ॥ ६७ ॥

कीर्तिदा देवी जहां गोपियों के साथ नित्य स्नान करती थीं वह कीर्तिदा सरोवर हैं । सौभाग्य, सुत, धन, धान्यादि सुख और समस्त मनोरथ को देने वाला है । स्नानाचमन प्रार्थनमन्त्र यथा—वृहत्पाराशर में—हे कीर्त्ति महाभागे ! वृषभानु गोप और समस्त व्रजवासियों को समस्त सौभाग्य देने वाली ! हे कीर्त्ति सरोवर आपको नमस्कार । इस मन्त्र का पाठ कर ९ बार मज्जन, आचमन द्वारा स्नान करे तो समस्त सुख सम्पत्ति लाभ करता है ॥ ६८ ॥

भानु सरोवर के पास महारुद्र व्रजेश्वर शिवलिंग है । जिनको वृषभानु प्रभृति गोप समूह ने इष्ट सिद्धि के लिये स्थापन किया है । प्रार्थनामन्त्र-गौरीतन्त्र में—हे व्रजेश्वर ! हे महारुद्र ! आपको नमस्कार । आप व्रजवासियों के मंगल के लिये हैं । शिव रूप आपको नमस्कार । इस मन्त्र के १४ बार पाठ करने से समस्त कल्याण को प्राप्त होता है और व्रज में सर्वदा वास पूर्वक सौभाग्य सम्पत्ति लाभ करता है ॥ ६९ ॥

ललिता मोहन ने यहाँ भक्त सूरजी के लिये दर्शन देकर उन्हें नेत्र तथा सुन्दर मुख का प्रदान

तस्य बुद्धिर्भवेद्व्याप्ता सर्वशास्त्रेषु गोप्यतः । ललितामोहनो मूर्त्तियुगलो दर्शनं ददौ ।।

ततः शूरसरः स्नानाचमनप्रार्थनमन्त्रः—

कृतार्थरूपिणे तुभ्यं शूरस्य सरसे नमः । धर्मार्थकाममोक्षाणां वैकुण्ठपददायिने ।।

इति मन्त्रं दशावृत्त्या मज्जनाचमनं नमन् । स्नपनं विधिवत् कुर्यात् परमोक्षपदं लभेत् ।।

इत्येतच्च समाख्यातं वृषभानुपुरोद्भवं । राधातीर्थस्वरूपाणां माहात्म्योत्पत्तिदर्शनं ।।

इति वृषभानुपुरोत्पत्तितीर्थस्नानस्वरूपोत्पत्तिमाहात्म्यं ।। ७० ।।

अथ गोकुलदेवतीर्थस्नानोत्पत्तिमाहात्म्यं । वाराहे—

ततो भाद्रपदे मासि दशम्यां शुक्लपक्षगे । गोकुले वनयात्रा च गोलोकसमताफले ।।

वैकुण्ठं द्वितीयं रम्यं जन्मना विष्णुनिर्मितं । मथुरा नगरी रम्या केवलोत्पत्तिहेतवे ।। ७१ ।।

ततो गोकुलप्रवेशप्रार्थनमन्त्रः—

गोलोकरूपिणे तुभ्यं गोकुलाय नमो नमः । अतिदीर्घाय रम्याय द्वाविंशद्योजनाय ते ।।

इति मन्त्रं समुच्चार्य द्वाविंशद्भिर्नमश्चरेत् । गोलोकपदप्राप्ताय मुक्तिभागो भवेन्नरः ।। ७२ ।।

अभिमन्युसुतो यत्र स्वकीयं मन्दिरं करोत् । सुखवासमनोर्थाय वसुदेवागमाय च ।

शतवर्षप्रवासस्तथो सर्वगोपैः समन्वितः ।

ततो नन्दमन्दिरप्रार्थनमन्त्रः—

नन्दधाम्ने नमस्तुभ्यं त्रैलोक्यपददायिने । कृष्णवात्सल्यपुत्राय परमोत्सवहेतवे ।।

इति मन्त्रं समुचार्य नवभिः प्रणमेद्गृहम् । कृष्णतुल्यतनुर्यस्य सुखमाप्नोति सर्वदा ।।७३।।

---

किया है। यह सूरसरोवर है। यहाँ अन्ध स्नान करने से नेत्र दान प्राप्त होकर समस्त शास्त्र में तीव्र बुद्धि और पारंगत हो जाता है। ललिता मोहन मूर्ति ने यहाँ युगल रूप से दर्शन दिया था। अनन्तर सूरसरः स्नानाचमन प्रार्थनामन्त्र—हे सूरसरः कृतार्थ रूप आपको नमस्कार । आप धर्म्म, अर्थ काम, मोक्ष, और वैकुण्ठ पद को देने वाले हैं। इस मन्त्र के १० बार पाठ पूर्वक मज्जन, आचमन, नमस्कार, स्नान यथा-विधि से करें तो परमोक्ष को प्राप्त होता है। इति। यह सब वृषभानुपुर की उत्पत्ति स्थान, तीर्थ, देवताओं की महिमा दिखाई है ।। ७० ।।

अब गोकुल के देवता, तीर्थ, स्थानों की उत्पत्ति, महिमा वर्णन करते हैं। वाराह में—अनन्तर भाद्रपद मास की शुक्ला दशमी में गोकुल में आकर वनयात्रा करने से गोलोक के समान फल को लाभ करता है। यह दूसरा मनोहर वैकुण्ठ है। जन्मादि से लेकर लीला समूह करने के लिये यह विष्णु कर्तृक निर्म्मित है। मथुरा नगरी तो केवल उत्पत्ति के लिये मनोहरा है ।। ७१ ।।

अनन्तर गोकुल में प्रथम प्रवेश प्रार्थनामन्त्र कहते हैं। हे गोलोक रूप श्रीगोकुल! आपको नमस्कार। आप अति दीर्घ स्वरूप हैं, रम्य हैं, २२ योजन आपका आयतन हैं। इस मन्त्र के पाठ पूर्वक २२ नमस्कार करे तो गोलोक पद प्राप्त होकर के मुक्तिभागी होता है ।। ७२ ।।

यहाँ अभिमन्यु पुत्र ने सुख पूर्वक वास के लिये और वसुदेव के आगमन के लिये अपना मन्दिर बनाया था और समस्त गोपगणों के साथ शतवर्ष वास किया है। अनन्तर नन्द मन्दिर प्रार्थनामन्त्र—हे नन्दधाम! आपको नमस्कार। आप त्रैलोक्य पद को देने वाले हैं। पुत्र कृष्ण के वात्सल्य सुख और परम

यशोदा शयनस्थानं रचयेद् यत्र वेश्मनि । पुत्रोत्सवसुखार्थाय शतगोपीसमाकुला ॥

ततो यशोदाशयनस्थलप्रार्थनमन्त्रः । मात्स्ये—

यशोदाशयनायैव समस्तसुखदायिने । पुत्रसौभाग्यलाभाय नमस्ते शुभदो भव ।
इति मन्त्रं दशावृत्या पठंस्तु शयनं नमेत् । चिरञ्जीवी भवेद्बालोमृतवत्सो नरप्रिया ॥
पुत्रसौख्ययुतो नन्दस्तादृशो सौख्यमाप्नुयात् । कन्याजन्मो भवेद्गर्भे तथापि पुत्रमाप्नुयात् ॥७४॥
उलूखलस्थलं यत्र यशोदा रचयेत्स्वकं । पंचाशत्मणसंख्याकमन्नोज्वलसुहेतवे ॥

ततो उलूखलप्रार्थनमन्त्रः—

तन्दुलानेकधान्याय सर्वदा पूरणाय ते । नमस्ते सौख्यदायैवोलूखलाय नमो नमः ॥
इति मन्त्रं त्रयस्त्रिंशैः पठित्वा प्रणमेत्स्थलं । सर्वदानेकधान्यैस्तु परिपूर्णसुखं लभेत् ॥ ७५ ॥
यत्रैव नवनन्दानां चक्रसंस्था विदूरतः । धौरेययुगसंत्यक्ता सामग्रीभिः समाकुलाः ॥
तेषामभ्यन्तरे गोपा उपविश्युः समासतः । कुशभूमौ ततो दूरमुपनन्दनभूमयः ॥
ततस्तु प्रतिनन्दानामेवं षट् त्रिंशभूमयः । चक्रतीर्थास्त्वनेकाः स्युः गोकुले संस्थिताः पृथक् ॥
नन्दस्य चक्रतीर्थाधो यशोदा कृष्णबालकं । मासस्वरूपिणं तत्र स्थापयेत् क्षेत्रपूरणं ॥
कृपवृतीं करोन्माता तत्क्षणे शकटासुरः । चक्रतीर्थस्वरूपेण चक्रतीर्थं विवेशह ॥
ततस्तत्रागतं दैत्यं वधमिच्छन्समाश्रितं । नेत्रोन्मील्य हरिः साक्षात् दृष्ट्वा वामपदाहनत् ॥
चक्रतीर्थो विभज्येत खण्डंखण्डप्रमाणतः । चूर्णीभूतं तु तं दृष्ट्वा सर्वे गोपाः समागताः ॥

---

उत्सव के लिये हैं । इस मन्त्र के पाठ पूर्वक गृह के लिये ६ बार प्रणाम करें तो कृष्ण के बराबर पुत्र सुख प्राप्त होता है ॥ ७३ ॥

अनन्तर यशोदाशयनस्थल है । यहाँ शत-शत गोपीगणों से युक्त होकर यशोदा शयन स्थल रचना करती थी । जो पुत्र का उत्सव सुख के लिये हैं । प्रार्थनामन्त्र यथा--मत्स्य में—हे समस्त सुखदाता यशोदाशयनस्थल ! पुत्र सौभाग्य लाभ के लिये आपको नमस्कार । आप शुभ को दीजिये । इस मन्त्र के १० बार पाठ पूर्वक शयन स्थल को नमस्कार करे । मृतवत्स ( मरा हुआ ) बालक भी चिरञ्जीवी होकर सर्व प्रिय होता है । श्री नन्दराज ने जिस प्रकार श्रीकृष्ण के सदृश पुत्र सुख पाया है । गर्भ में तो कन्या थी तो भी पुत्र मिला ॥ ७४ ॥

अनन्तर ऊखल स्थल है । जो यशोदा जी ५० मन अन्न धरने के लिये बनाई है । प्रार्थनामन्त्र—हे सुख देने वाले ऊखल ! आप चाँवल और अनेक धान्य से परिपूर्ण हैं । इस मन्त्र के ३३ बार पार पूर्वक स्थल को नमस्कार करे तो सर्वदा अनेक धान्य से सुखी रहता हैं ॥ ७५ ॥

वहाँ आगे नौ नन्दों के चक्का गाड़ी ( बैलगाड़ी, वा शगड ) पृथक्-पृथक् रखे हुए हैं । उसमें विविध सामग्री रहती है । गोपगण उसके अन्दर बैठा उठा करते थे । चक्का स्थल अनेक हैं । ३६ चक्का गाड़ी वहाँ पृथक्-पृथक् कुछ कुछ दूर में रखे जाते थे । नन्दजी का चक्का तीर्थ है वहाँ एक गाड़ी के नीचे यशोदा जी एक मास अवस्था प्राप्त श्रीकृष्ण को शयन कराकर गृह कर्म्म में नियुक्ता थीं । अनन्तर शकटासुर नामक दैत्य ने कृष्ण को मारने के लिये चक्राकार होकर चक्रतीर्थ में प्रवेश किया था । तदनन्तर श्रीकृष्ण ने नेत्र खोलकर देखा और वाम चरण का प्रहार किया । उसमे चक्का गाड़ी खण्ड-खण्ड होकर चूरण हो गयी और दैत्य मर गया । अनन्तर गोपगण भाग कर आये । क्रीड़ा परायण श्रीकृष्ण को देख नन्दजी के

क्रीडमाणं सुतं दृष्ट्वा प्रशशुः नन्दभाग्यतां । पर्य्यस्तसकटस्थानं पुत्रायुश्चिरवर्द्धनं ॥
ततो पर्य्यस्तशकटस्थलप्रार्थनमन्त्रः । स्कान्दे —
मृतमासामृतोद्भूत चिरपुत्रायुर्दायिने । शकटासुरमोक्षाय सुस्थलाय नमोस्तु ते ॥
इति मन्त्रं समुच्चार्य सप्तभिः प्रणमेत्स्थलं । मासेनमृतवत्सापि नारी वा पुरुषोऽपिवा ॥
चिरञ्जीवीनमाख्यातं लभते तादृशं सुतं ॥ ७६ ॥
गन्धर्वौ नारदशापात् यमलार्जुनसंज्ञकौ । पृथिवीतलमायातौ वृक्षयोनिमुपाश्रितौ ॥
नन्दगोपोद्भवो कृष्णो युवामुद्धारयिष्यति । इति शापाद्वरं दत्वा मत्ताभ्यां प्रययौ मुनिः ॥
यशोदा दधिचौरेण कृष्णं बध्वा उलूखले । ताडयन् धावतीं दृष्ट्वा मातरं गोकुलेश्वरः ॥
उलखलेन सार्धं तावुत्पाटयति भूमितः । गन्धर्वयोनितां यातौ वृक्षयोनिपरित्यजौ ॥
कृष्णं प्रजग्मतुः स्तुत्वा स्वधाम परमं स्वकं । यत्रैव शापतो रोगी रोगमुक्तस्तु जायते ॥
विक्षिप्तो यदि वा कुष्ठी बहुरोगसमाकुलः । दामोदरप्रसादात्तु भुक्तिभागी भवेन्नरः ॥७७॥
ततोलूखलयोः स्थाने द्वौ कुण्डौ यमलार्जुनौ । महातीर्थौ समाख्यातौ दामोदरकृतौ शुभौ ॥
तयोः स्नानाचमनप्रार्थनमन्त्रः । आदिपुराणे—
यमलार्जुन देवाभ्यां नमो दामोदराय च । उलूखलकृतोद्धार वरदो भव सर्वदा ॥
इति मन्त्रं दशावृत्या मज्जनाचमनं नमन् । कृतार्थयोनिमाप्नोति विष्णुसांनिध्यगः सदा ॥७८॥
यमलार्जुनदेवाभ्यामुद्धाराख्यो ऽच्युतो हरिः । दामोदरमहामूर्तिं स्थापितो नन्दनन्दनः ॥

---

भाग्य की प्रशंसा करने लगे । पुत्र की आयु बढ़ाने वाला इस शकट स्थान को परिक्रमा करे । शकटस्थल प्रार्थनामन्त्र यथा—स्कान्द में—हे मरते हुए पुत्र को अमर करने वाले ! हे शकटासुर मोक्षस्थल ! हे सुन्दर तीर्थ ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ७ बार प्रणाम करे तो मरता हुआ पुत्र भी जीवित होकर चिरायु लाभ करता है । नर और नारी भी चिरायु होकर तादृश चिरायु पुत्र का लाभ करता है ॥७६॥

अब यमलार्जुन मज्जन स्थल है । यमल, अर्जुन नामक दोनों गन्धर्वों ने नारदजी के शाप से पृथ्वी में आकर वृक्ष योनि में जन्म लिया, किन्तु नारद जी का यह वचन था कि नन्द गोप से उद्भव श्री कृष्ण द्वारा तुम दोनों की मोक्ष होगी । एक समय दधि चोरी के कारण यशोदा जी ने श्रीकृष्ण को ऊखल में बाँध कर ताड़न करती हुई और कार्य्य के लिये गईं तो श्रीकृष्ण ने भय से सरते हुए, दोनों वृक्ष के पास पहुँच कर ऊखल के साथ उनको उखाड़ दिया । उस समय वह दोनों वृक्ष वृक्षयोनि को छोड़ कर दिव्य गन्धर्व रूप को धारण कर श्रीकृष्ण की स्तुति वन्दना पूर्वक मोक्ष धाम के लिये गये । यहाँ रोगी शाप द्वारा प्राप्त रोग से मुक्त हो जाता है । जिसको अनेक रोग हैं और जो कोढ़ी है वहाँ दामोदरजी के प्रसाद से मुक्त होकर मुक्ती भाग होता है ॥ ७७ ॥

वहाँ यमलार्जुन नामक दो कुण्ड श्रीकृष्ण कर्तृक निर्म्मित हुए हैं । वहाँ दोनों पेड़ उखेड़े गये थे । दोनों का स्नानाचमन प्रार्थनामन्त्र यथा—आदिपुराण में—हे यमलार्जुन देवता ! आप दोनों को नमस्कार । हे दामोदर ! हे ऊखल उद्धारकारी ! आपको नमस्कार । आप सर्वदा वर दीजिये । इस मन्त्र के १० बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करे तो कृतार्थ योनि प्राप्त करके विष्णु का सान्निध्य लाभ करता है ॥ ७८ ॥

श्रीनन्दनन्दन ने यमलार्जुन उद्धार के नाम से प्रसिद्ध होकर दामोदर महामूर्त्ति की स्थापना की ।

ततो दामोदरप्रार्थनमन्त्रः—

दामबद्धाय कृष्णाय मातृस्नेहसुताय ते । नमो दामोदरायैव बालकृष्ण नमोऽस्तु ते ॥
षडब्दरूपिणे तुभ्यं दामोदरस्वरूपिणे । इति षड्पदमन्त्रं च पठित्वा पंचभिर्नमेत् ॥
मुक्तिभागी भवेल्लोको जननीजनवल्लभः ॥ ७६ ॥

वृक्षोत्पाटनदोषस्य शान्तये नन्दनिर्मितं । नगसंख्यासमुद्रांश्च समानीतं च कूपकं ॥
सप्तसामुद्रिकं नाम वृक्षहत्यानिवारणं । हरिताद्रिच्छिणोद्वृक्षं वटाश्वत्थकदम्बकं ॥
सप्तकूपकृतात्स्नानान्मुक्तो भवति पातकात् ।

ततो सप्तसामुद्रिककूपस्नानाचमनप्रार्थनमन्त्रः । शौनकीये—

दधि-दुग्ध-घृत-क्षीर-मधु-तक्ररसादिभिः । सप्तसामुद्रकूपाय रचिताय नमो नमः ॥
इति मन्त्रं समुच्चार्य सप्तभिर्मज्जनादिभिः । स्नानाचमनपूर्वस्तु नमस्कारं समाचरेत् ॥
सप्त दुग्ध रसादीनां दानं दद्यात् विधानतः । गोदानं विधिवत् कुर्यात् देवयोनिमवाप्नुयात् ॥
सप्तगोत्रद्विजेभ्यस्तु सप्त दानं समाचरेत् । सप्तर्षिगोत्रजाः विप्रास्तेभ्यो दानं समाचरेत् ॥
सप्तप्रकारहत्याभि र्विमुक्तो यत्र मानव. ॥ ८० ॥

कामसेनीसुताद्यास्ताः गोप्यो बालोत्सवाय च । गोपीश्वरमहादेवं स्थापयेयुर्मनोरथैः ॥
पूर्णायुषो भवेत्बालाः धनधान्यादिसम्पदः । दिने दिने विवर्धते गोपीश्वरप्रदर्शनात् ॥

ततो गोपीश्वरप्रार्थनमन्त्रः । लैंगे—

गोपीश्वराय रुद्राय महादेवाय ते नमः । गोपीनां शिवदायैव भवाय शततं नमः ॥
इति मन्त्रं समुच्चार्यैकादशैः प्रणमेच्छिवं ॥ ८१ ॥

---

प्रार्थनामन्त्र यथा—हे दाम से बद्ध श्रीकृष्ण ! हे मातृ वात्सल्य ! हे दामोदर आपको नमस्कार । हे बाल-कृष्ण आपको नमस्कार । आप दामोदर हैं, छै साल की अवस्था के बालक हैं । इस षट्पद मन्त्र के पाठ पूर्वक ५ बार नमस्कार करने से जननी जन प्रिय होकर मुक्तिभागी होता है ॥ ७६ ॥

वृक्ष उत्पाटन दोष की शान्ति के लिये नन्दनिर्मित सप्त सामुद्रिक कूप हैं । जहाँ सात संख्यक समुद्र तीर्थ लाये गये थे । हरे वट, पीपल, कदम्ब काटने से जो महादोष होता है वह सप्त सामुद्रिक कूप में स्नान करने से नष्ट हो जाता है । अनन्तर सप्त सामुद्रिक कूप का स्नानाचमन प्रार्थनामन्त्र कहते हैं । शौनकीय में—हे दधि, दुग्ध, घृत, क्षीर, मधु, तक्र, रसादि सप्त समुद्र द्वारा निर्मित सप्त सामुद्रिक कूप ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ७ बार मज्जन, स्नान, आचमन पूर्वक नमस्कार करे । दुग्धादि सात वस्तुओं का यथा विधि दान करें । विधि पूर्वक गोदान करने से देवयोनि की प्राप्ति होती है । सातों गोत के सातों ब्राह्मणों को सात प्रकार दान करें । सप्तर्षि गोत्रोत्पन्न ब्राह्मणों को दान करने से सात प्रकार की हत्या से विमुक्त हो जाता है ॥ ८० ॥

कामसेनि के पुत्रादिक ने सकल गोप बालकों के आनन्द उत्सव के लिये गोपीश्वर महादेवकी स्थापना की है । नित्य गोपीश्वर की पूजा करने से बालक पूर्णायु होकर धन धान्यादि सम्पत्ति परायण हो जाता है । गोपीश्वर प्रार्थनामन्त्र—लैंग में—हे गोपीश्वर रुद्र ! महादेव आपको नमस्कार । आप गोपीयों के कल्याण के लिये हैं । आप भव हैं । इस मन्त्र के पाठ करके एकादश बार शिवजी को प्रणाम करे ॥८१॥

गोकुलचन्द्रमामूर्तेर्मन्दिरं यत्र राजते । बालस्य गोकुलेशस्य दर्शनं कुरुते नरः ॥
मुक्तिभागी भवेल्लोको धनधान्यसमाकुलः ।

ततो गोकुलेश्वरप्रार्थनमन्त्रः—

गोकुलेश नमस्तुभ्यं बालकृष्ण वरप्रद । व्रजमण्डललोकस्य रक्षणायागतो शिशून् ॥
पंचभिः पठते मन्त्रं नमस्कारं समाचरेत् ॥ ८२ ॥

सूरसेनीसुनो यत्र रोहण्युद्वाहमाचरेत् । मन्दिरं रमणायार्थे रचयेद्रोहिणी गृहम् ॥
दशवर्षेण वास्तव्यो बलदेवसमुद्भवः ।

ततो रोहिणीमन्दिरप्रार्थनमन्त्रः—

धर्मपत्नीगृहायैव वसुदेवसुखोद्भवः । रोहिण्यन्तपुरायैव नमस्ते गोकुलोत्सव ! ॥
इति मन्त्रं समुच्चार्य शक्रावृत्या नमश्चरेत् । बलदेवसमं पुत्रं चिरजीविनमाप्नुयात् ॥८३॥
तदभ्यन्तरगेहे च बलदेवोद्भवस्थलम् ।

ततो बलदेवजन्मस्थलप्रार्थनमन्त्रः । पाद्मे—

हलिने बलदेवाय नमस्ते शेषमूर्तये । जन्मस्थलाय गोप्याय कंसाभीतिवरप्रदः ॥
इति मन्त्रं पठेद्धीमान् सप्तभिः प्रणमेत्स्थलं । तस्यैव सर्वदा सौख्यं धनधान्यं प्रजायते ॥८४॥
यत्र नन्दोऽकरोद्‌गोष्ठीं सर्वगोपैः समन्वितः । नन्दादिभिश्च षड्‌त्रिंशैर्गोष्ठीरम्या ऽभवच्छुभा ॥

ततो नन्दगोष्ठीप्रार्थनमन्त्रः—

नन्दादिभ्यो नमस्तुभ्यं गोष्ठीस्थानाय धीमते । नित्यसौबुद्धिदायैव विष्णोः सान्निध्यहेतवे ॥
इति मन्त्रं समुच्चार्य षट्‌त्रिंशाद्भिः समासतः । कुबुध्या संयुतो लोको सुबुद्धिश्च प्रजायते ॥

---

जहाँ गोकुल चन्द्रमाजी का मन्दिर है । मनुष्यगण गोकुलनाथ के बाल स्वरूप का दर्शन करते हैं और धन धान्य से युक्त होकर मुक्तिभागी होते हैं । गोकुलेश्वर प्रार्थनामन्त्र—हे गोकुलेश्वर ! हे बालकृष्ण ! हे वरप्रद ! आपको नमस्कार । आप व्रजमण्डल के लोकों की रक्षा के लिये शिशु रूप से प्रगटित हैं । पाँच बार पाठ पूर्वक नमस्कार करें ॥ ८२ ॥

जहाँ सूरसेनि पुत्र ने रोहिणी जी को विवाह कर रमण के लिये रोहिणी गृह का निर्म्माण किया है । अनन्तर रोहिणी मन्दिर प्रार्थनामन्त्र—हे धर्म्म पत्नी रोहिणी जी के गृह ! हे वसुदेव सुत कर्तृक निर्म्मित ! हे रोहिणी के अन्तःपुर ! गोकुल उत्सव रूप आपको नमस्कार । इस मन्त्र के पाठ पूर्वक १४ बार नमस्कार करें तो बलदेव के तुल्य चिरायु पुत्र प्राप्त होता है ॥ ८३ ॥

उसके मध्यस्थल के भीतर श्री बलदेव जी का जन्म स्थान है । प्रार्थनमन्त्र यथा—पाद्म में—हे हलधारि ! हे बलदेव ! शेष मूर्त्ति आपको नमस्कार । हे गोप्य जन्मस्थान ! हे कंस को भय देने वाले ! आप को नमस्कार । इस मंत्र के पाठ पूर्वक बुद्धिमान् ७ बार स्थान को प्रणाम करे तो उसको निरन्तर धन, सुखादिक उत्पन्न होते हैं ॥ ८४ ॥

अब नन्द गोष्ठीस्थल कहते हैं । जहाँ नन्दराय जी समस्त गोपगण से युक्त होकर गोष्ठी करते थे । नन्दादिक ३६ मुख्य मुख्य व्यक्ति थे । वह मनोहर गोष्ठीस्थल है । प्रार्थनामन्त्र यथा—हे नन्दादिक ! आप सबको नमस्कार । हे गोष्ठीस्थान ! हे बुद्धि विकाश स्थल ! हे नित्य बुद्धि देने वाले ! आपको नमस्कार । आप विष्णु के सान्निध्य के लिये हैं । इस मंत्र के ३६ बार पाठ पूर्वक प्रणाम करे तो मंद बुद्धि वाले सुंदर

विक्षिप्तो यदि वा लोकः सुशीलः स्यान्नसंशयः । कुनीतिकारको लोको राजा वा धर्मसंयुतः ॥
सुनीतिकारको राजा सुधर्मो भवते नरः ॥ ८५ ॥
शतगोपीसमाकीर्णे सर्व्वाश्चैव तु गोपिकाः । विमोहयन् विवेशाथ पूतना नन्दसद्मनि ॥
देवांगनापवेषाढ्या राक्षसीरूपवर्जिता । अंके कृष्णार्भकं नीत्वा दिनसप्तस्वरूपिणं ॥
विषाढ्यं पयसापूर्णं स्नेहस्तन्यमपाययत् । दुग्धसार्धं पिबेत्प्राणमस्याः घोरेण पाणिना ॥
संगृह्य निविडं यत्र संत्यजेत्यतरेवदन् । नन्दवेश्म परित्यक्त्वा राक्षसीं तनुमास्थिता ॥
सा जगाम नभो मार्गे दुर्वासर्वैस्तु शिष्याणी । पातयद्धरणीलोके पूतनापयसाहनत् ॥
धात्रीव गतिमालेभे देवयोनीमनोहराम् । यस्मादेतत् समुद्भूतं पूतनास्तन्यपानकं ॥
ततो पूतनास्तन्यपानस्थलप्रार्थनमन्त्रः—
सप्तवासरवेषाय कृष्णाय सततं नमः । पूतनामोक्षदायैव पयः पानाय ते नमः ॥
इति मन्त्रं त्रिभिरुक्त्वा नमस्कारं समाचरेत् । मुक्तिभागी भवेल्लोको गनागमविवर्जितः ॥
इति गोकुलमाहात्म्यमुत्पत्तिः समुदाहृता । बनयात्राप्रसंगे तु सर्वाभीष्टवरप्रदा ॥
इति गोकुलोत्पत्तिसदेवतीर्थस्नानमाहात्म्यनिरूपणं ॥ ८६ ॥
अथ महाबनपार्श्वे सदेवतीर्थस्नानबलदेवस्थलोत्पत्तिमाहात्म्यनिरूपणम् । पाद्मे—
यत्र नन्दादयो गोपाः यदोनैमन्त्रणञ्चरेत् । दशायुतगवां दुग्धं समानीयात्रप्रक्षिपुः ॥
दुग्धपूर्णं पयोकुण्डं प्रचख्युर्दुग्धकुण्डकं । नानामिष्टान्नद्रव्यैस्तु सिताद्यैः द्राक्षक्षुच्चरैः ॥
तण्डुलैः पायसं चक्रुर्बलदेवस्य प्रीतये । श्रावणे च सहो मासे पायसं च निवेदनम् ॥
तेषां गृहे वसेत् लक्ष्मीर्दुग्धपूर्णवसुन्धरा । हलिनो वरदानेन जलं दुग्धं प्रजायते ॥

---

बुद्धिशाली हो जाता है । यदि मनुष्य विक्षिप्त हो जावे तो निश्चय सुन्दर बुद्धि वाला हो जाता है । अधर्मी राजा धर्म्म परायण हो जाता है ॥ ८५ ॥

जब शत-शत गोपी कर्तृक यशोदा जी वेष्टित थीं, उस समय राक्षसी पूतना सुन्दर देवांगना का रूप को धारण कर सबको मोहित करती हुई नन्दालय में प्रवेश करने लगी । उसने सात दिन के बालक श्री कृष्ण को गोद में लेकर विष युक्त दुग्ध का पान कराया । किन्तु श्रीकृष्ण हस्त कमल द्वारा निविड दाव कर दुग्ध के साथ उसका प्राण खींचने लगे । तब वह छोड़ छोड़ कहकर अपना राक्षसी रूप को धारण कर नन्दगृह परित्याग करके आकाश मार्ग में गई और शरीर से प्राण छोड़कर पृथ्वी में गिरी । श्रीकृष्ण कर्तृक दुग्ध पीने के कारण मातृ गति प्राप्त की । इस कारण यहाँ पूतना स्तनपानतीर्थ उत्पन्न हुआ है । प्रार्थना मन्त्र यथा—सात दिवस अवस्था वाले ! हे श्रीकृष्ण ! आपको निरन्तर नमस्कार । हे पूतनामोक्षदायक ! दुग्ध पान करने वाले आपको नमस्कार । इस मन्त्र के तीन बार पाठ पूर्वक नमस्कार करे तो मुक्तिभागी होकर गमनागमन से रहित होता है । यह गोकुल की महिमा, उत्पत्ति का वर्णन किया गया है, जो कि बन-यात्रा प्रसंग में समस्त अभीष्ट वर देने वाला है ॥ ८६ ॥

अनन्तर महाबन के पास देवता, तीर्थों के साथ बलदेव स्थल उत्पत्ति महिमा निरूपण करते हैं । पाद्म में—वहाँ नन्दादिक गोपों ने यादवों को निमन्त्रण दिया था और एक लाख गौओं का दुग्ध लाकर यहाँ रखवाया गया था । वहाँ एक कुण्ड बन गया है उसका नाम दुग्धकुण्ड है । नानाविध मिष्टान्न और घृत, सक्कर, मधु द्वारा मिला हुआ सुन्दर पायसान्न, बलदेवजी की प्रीति के लिए बनाया गया था । श्रावण

यतः संजायते नाम्ना दुग्धकुण्डं मनोहरं । बनयात्राप्रसंगस्तु नवम्यां भाद्रशुक्लगे ॥
यत्र स्नानाचमनैव प्रार्थनेन तथैवच—
देवयोनिमवाप्नोति सुरास्तेऽमृतपायिनः । धनधान्यसुखादींश्च लभते नात्र संशयः ॥

ततो दुग्धकुण्डस्नानाचमनप्रार्थनमन्त्रः—

सुधामयपयस्तुभ्यं हलायुधवरोद्भव ! । चिरायुर्वरदायैव दुग्धकुण्ड नमोस्तु ते ॥
इति मन्त्रं समुच्चार्य दशधा मज्जनैः स्नपन् । विधिवदाचमं कुर्यात् नमस्कारैश्च प्रार्थयेत् ॥
चिरजीवी भवेल्लोकोऽमृतपा देवता यथा ॥ ८७ ॥

आदिपुराणे—

यत्रैव बलदेवस्तु यदुपुत्रैः समन्वितः । भोजनं क्रियते स्वेच्छं कृतदुग्धाढ्यपायसम् ॥
नन्दादिसकलैर्गोपैर्बहुदुग्धविभूतये । यत्रैव बनयात्री च नैवेद्यं पायसं चरेत् ॥
सर्वदा दुग्धपूर्णस्तु तस्य गेहो प्रजायते । धनधान्यसुखैः पूर्णः सर्वदा रमते जनः ॥

ततो बलदेवभोजनस्थलप्रार्थनमन्त्रः—

सकलेष्टप्रदायैव हलिनो भोजनस्थल । देवर्षिमनुजानाञ्च हितार्थसिद्धये नमः ॥
इति चतुर्दशावृत्या पठन् मन्त्रं नमश्चरेत् । शक्रसंख्याघृतं ग्रासं बलदेवस्य तुष्टये ॥ ८८ ॥

ततो बलदेवयुगलप्रार्थनमन्त्रः—

रेवतीरमणायैव गोपानां वरदायिने । अन्योन्यसन्मुखालोकप्रीतये च नमस्तु ते ॥
इति मन्त्रं समुच्चार्य वामभागमुपास्थितो । नमस्कारं दशावृत्या युगलाभ्यां समाचरेत् ॥
दशवर्षस्वरूपेण बलदेवः प्रसीदतु ॥ ८९ ॥

---

और भादों मास में पायस निवेदन करने पर लक्ष्मी उनके गृह को नहीं छोड़ती हैं और पृथ्वी दुग्धपूर्ण होती है। बलदेवजी के वर से जल दुग्ध हो गया था इसलिये मनोहर दुग्ध कुण्ड हुआ। भाद्र मास शुक्ला नवमी में यहाँ बनयात्रा प्रसंग है। यहाँ स्नान, आचमन, प्रार्थना से देवयोनि मिलती है और अमृत भोजन के लिये मिलता है और धन, धान्य, सुखादिक मिलता है इसमें कोई सन्देह नहीं है। दुग्धकुण्ड स्नानाचमन मन्त्र—हे सुधामय दुग्ध वाले ! हे हलधर जी के वर से उत्पन्न, चिरायु वर के लिये आपको नमस्कार। इस मन्त्र के पाठ पूर्वक १० बार मज्जन, स्नान और विधि पूर्वक आचमन, नमस्कार, प्रार्थना करे तो चिरायु होकर देवयोनि को प्राप्त होता है ॥ ८७ ॥

आदिपुराणमें— यहाँ बलदेवजी ने यदु पुत्रों के साथ इच्छा पूर्वक दुग्ध युक्त पायस का भोजन किया था। नन्दादिक समस्त गोपों ने भी बहुत से दुग्ध वैभव के लिये भोजन किया था। यहाँ बनयात्री पायस का नैवेद्य देवें तो सर्वदा धन, धान्य और गोरस वैभव से परिपूर्ण होकर रमण करें। बलदेव भोजन-स्थल प्रार्थनामन्त्र—हे समस्त इष्ट प्रदान करने वाले ! हे हलधर भोजनस्थल ! देवता, मनुष्यों के कल्याण सिद्धि के लिये आपको नमस्कार। इस मन्त्र के १४ बार पाठ पूर्वक नमस्कार करें बलदेव की प्रीति के लिये १४ बार घृत का ग्रास करे ॥ ८८ ॥

बलदेव युगल प्रार्थनामन्त्र यथा—हे रेवतीरमण ! हे गोपों के वर देने वाले ! आप दोनों परस्पर परस्पर के मुख दर्शन में उत्कण्ठित हैं। आप दोनों को नमस्कार। इस मन्त्र के उच्चारण पूर्वक बाम भाग में जाकर १० बार युगल के लिये नमस्कार करे तो दस वर्ष के स्वरूप में श्रीबलदेव प्रसन्न होते हैं ॥ ८९ ॥

ततो त्रिकोणमन्दिरप्रदक्षिणप्रार्थनमन्त्रः—

नन्दगोपकृतार्थाय त्रिकोण रमणस्थल । गोपकामप्रपूर्णाय प्रदक्षिणपदे नमः ॥
पञ्चभिरुच्चरन् मन्त्रं कुर्यात्पञ्च प्रदक्षिणं । सर्वदा सौख्यमाप्नोति धनधान्यादिभिः स्तुतैः ॥
नन्दादिसर्वगोपैस्तु निर्मितं हलिनः स्थलं । अत्रैव देवतादीनां पूर्णाः स्युश्च मनोरथाः ॥६०॥
देवादिभिः कार्यप्रदक्षिणा शुभा शुभप्रदा स्यान्मनुजादिकानां ।
कृष्णे नभो मासि शुभं प्रकाशितं श्रीभट्टनारायणसंज्ञकेन ॥
इति श्रीभास्करतनयनारायणभट्टविरचिते व्रजभक्ति विलासाख्ये
परमहंससंहितोदाहरणे चतुर्थोऽध्यायः ॥

## ॥ पंचमोऽध्यायः ॥

अथ गोवर्धनोत्पत्तिमाहात्म्यनिरूपणम् । आदिवाराहे—

भाद्रकृष्णचतुर्दश्यां कुर्याद्गोवर्धनागमम् । कार्तिके शुक्लकृष्णेतु प्रतिपद्यां शिवामयोः ॥
प्रदक्षिणाकृतापूजा शक्रपूजापहारिणी । बनप्रदक्षिणाचर्चाभिः स्नानं च प्रणतिं चरेत् ॥
रामाज्ञाग्राहकः श्रीमान्हनुमद्वानराधिपः । उत्तरादुधृतं स्कन्धे नीत्वा पर्वतमुत्तमं ॥
देवताकाशवाक्यैस्तु सेतुपूर्णस्तु जायते । तिवाक्यं समाकर्ण्य प्रक्षिप्तवनीतले ॥
गोवर्धनो हरेर्भक्तो हनुमन्तं ब्रवीद्वचः । भगवत्पादहीनं मां करिष्ये ऽत्रगमिष्यति ॥
शापं दातुं प्रशक्तोऽभूत्गिरिर्हनुमते किल । ततो गिरिवरस्यापि वाक्यमाकर्ण्य वानरः ॥
वरदो गिरये भूयादब्रवीत्वाक्यं कपीश्वरः ।
हनुमदुवाच-क्षमस्व भोदुराराध्य त्वयावासं चकार स । इन्द्रो देवादिभिः सार्धं गोपपूजां समाददे ॥

---

अनन्तर बलदेवजी के त्रिकोण मन्दिर की प्रदक्षिणा प्रार्थनामन्त्र—हे त्रिकोण रमणस्थल ! आप गोपों की कामना करने के लिये हैं। आप नन्दजी द्वारा निम्मित हैं। आपकी मैं प्रदक्षिणा करता हूँ। आप को नमस्कार। इस मन्त्र के ५ बार पाठ पूर्वक ५ बार प्रदक्षिणा करे तो सर्वदा धन, धान्य, सुतादिक प्राप्त होकर सुखी रहता है। यह स्थल नन्दादि समस्त गोपों के द्वारा निर्म्मित है। यहाँ देवताओं के मनोरथ समूह पूरण होते हैं ॥ ६० ॥

देवतादि करके यह शुभ प्रदक्षिणा करना कर्त्तव्य है, जो मनुष्यों के लिये शुभ फल देने वाली है जो भाद्रमास कृष्णपक्ष में श्रीभट्ट नारायणजी द्वारा सुन्दर रूप में प्रकाशित हुई है ॥ ६१ ॥

इति श्रीमद्भास्करात्मज श्रीनारायणभट्टगोस्वामी विरचित व्रजभक्तिविलास परमहंससंहिता
उदाहरण के चतुर्थ अध्याय का अनुवाद समाप्त हुआ।

अनन्तर गोवर्द्धनजी की उत्पत्ति महिमा कहते हैं। आदिवाराह में—भाद्रकृष्णा चतुर्दशी में गोवर्द्धन आवे। कात्तिक के कृष्ण पक्ष अमावस्या और शुक्लपक्ष की प्रतिप्रदा तिथि में प्रदक्षिणा करे और इन्द्रपूजा अपहरणकारी पूजा को करें तथा स्नान, पूजा, प्रणाम द्वारा प्रसन्न करे। श्रीरामजी की आज्ञा से बानरराज श्रीहनुमान श्रीगोवर्द्धन पर्वत को उत्तराचल से स्कन्ध पर रखकर ला रहे थे। उस समय दैववाणी हुई कि समुद्र में सेतु बँध गया है। हनुमान जी ने यह सुनकर इन्हें यहाँ पृथ्वी पर फेंक दिया। हरिभक्त गोवर्द्धन जी ने हनुमानजी से कहा कि आपने भगवान के चरण चिन्ह स्पर्श से मुझे वञ्चित किया। मैं

ऊर्जे-सित प्रतिपद्यां गोपानां रक्षको भव । द्वापरान्ते कलेरादौ लीलापूर्णो भविष्यसि ॥
इत्याश्वास्य कपिः श्रीमान् जगाम नभसा सुधीः । रामं प्राप्त्वा नमस्कारं दण्डवत् प्रपपात ह ॥
ब्रवीद्वाक्यं कपिः श्रेष्ठः सेतुपूर्णः प्रजायते । यस्मादहं क्षिपाम्यद्य गोवर्द्धनगिरिं प्रभो ॥
श्रुत्वैवं हनुमद्वाक्यं रामो वचनमब्रवीत् । एते गिरिवराः श्रेष्ठाः पादस्पर्शाद्विमोक्ष्यते ॥
गोवर्द्धनं गिरिवरं करिष्येहं विमोक्षणं । पाणिस्पर्शाच्च नन्दस्य गोपानां रक्षकं परं ॥
वसुदेवकुलद्भूतो बालकृष्णो भवाम्यहं । इति गोवर्धनोत्पत्तिः देवानां सौख्यकारिणी ॥१॥

ततो गोवर्द्धनपर्वतपूजनप्रदक्षिणाप्रार्थनमन्त्रः—

गोवर्धन गिरे तुभ्यं गोपानां सर्वरक्षक । नमस्ते देवरूपाय देवानां सुखदायिने ॥
द्वि सहस्रं जपन् मन्त्रं नमस्कारं प्रदक्षिणं । कुर्याच्चतुः प्रमाणेन मुक्तिभागी भवेन्नरः ॥
अयं गोवर्धनश्चात्र प्रतिवासरनिम्नतां । इन्द्रशापाद्भुवो मध्ये गमिष्यति कलौ युगे ॥
यवमात्रप्रमाणेन लोकानां मुक्तिदो भवः । यस्य दर्शनमात्रेण मुक्तिभागी भवेन्नरः ॥ २ ॥

ततो हरिदेवप्रार्थनमन्त्रः । स्कान्दे—

करोद्धृतनगेन्द्राय गोपानां रक्षकाय ते । सप्ताब्दरूपिणे तुभ्यं हरिदेवाय ते नमः ॥
पञ्चधा पठते मन्त्रं नमस्कारं समाचरेत् । सर्वपापाद्विनिर्मुक्तो वैकुण्ठपदमाप्नुयात् ॥ ३ ॥
गोपिकावचनेनापि कृष्णस्तु मनसाकरोत् । वृषहत्यापराधस्य मुक्तये मानसीं शुभां ॥
गंगां दुग्धमयीं पुण्यां महापापप्रणाशिनीम् ।

---

आपको शाप दूंगा । हनुमानजी ने कहा—हे गिरिवर ! क्षमा कीजिये । जब इन्द्र देवतागणों के साथ गोप समूह की पूजा ग्रहण करेगा उस समय भगवानजी इन्द्रकी पूजाका खण्डन कर आपकी ही पूजा करवायेंगे । इससे इन्द्र कुपित होकर व्रज में उत्पात करने लगेगा तो उस समय आप व्रजवासियों के रक्षक होंगे । द्वापर के अन्त में और कलिके प्रथम में तुम्हारी इच्छा की पूर्ति होगी । इस प्रकार कहकर हनुमानजी आकाश-गामी होकर रामजी के पास गये और समस्त हाल सुनाया । रामजी कहने लगे सेतुबन्ध के लिये लाये गये यह सब पर्वत मेरे चरण स्पर्श से विमुक्त होगये हैं, किन्तु मैं उस गोवर्द्धन को हस्तकमल के स्पर्श द्वारा पवित्र करूंगा । मैं वसुदेव के कुल में उत्पन्न होकर व्रज में विविध बालक्रीड़ा करूंगा और गोवर्द्धन के ऊपर गौ चरणादि अद्भुत-अद्भुत क्रीड़ा विनोद करूंगा । यह गोवर्द्धन जी की उत्पत्ति का कारण है जिससे देवतागण भी सुखी होते हैं ॥ १ ॥

अनन्तर गोवर्द्धन पर्वत पूजन प्रदक्षिणा प्रार्थनामन्त्र—हे श्रीगोवर्द्धन गिरि ! आपको नमस्कार। आप गोपगणों के रक्षक हैं । आप देवरूप हैं और देवताओं को सुख देने वाले हैं । इस मन्त्र के २००० बार जप पूर्वक नमस्कार और ४ बार प्रदक्षिणा करे तो मनुष्य अवश्य मुक्तिभागी होता है । यह श्रीगोवर्द्धन कलियुग में नित्य इन्द्र शाप के कारण पृथ्वी के अन्दर यव परिमाण से नीचे चले जाते हैं ॥ २ ॥

अनन्तर हरिदेव प्रार्थनामन्त्र यथा—स्कान्द में—हे हरिदेव ! सात साल की अवस्था स्वरूप आपको नमस्कार । आपके हस्त कमल में गिरिराज है । आप गोप समूह के रक्षक हैं । इस मन्त्र के ५ बार पाठ पूर्वक नमस्कार करे तो समस्त पापों से मुक्त होकर वैकुण्ठ पद को प्राप्त होता है ॥ ३ ॥

अनन्तर मानसीगङ्गा है । गोपियों के वचन से श्रीकृष्ण ने वृषहत्या के अपराध से मुक्त होने के लिये इसे मन से उत्पन्न किया है, जो दुग्धमयी पवित्रा है और घोर पापों का नाश करने वाली है ।

ततो मानसीगंगास्नानाचमनप्रार्थनमन्त्रः—

गंगे दुग्धमये देवि भगवन्मानसोद्भवे । नमः कैवल्यरूपाढ्ये मुक्तिदे मुक्तिभागिनी ॥
इति मन्त्रं शतावृत्या मज्जनाचमनैर्नमन् । ब्रह्महत्यादिपापानि नश्यन्ति नात्र संशयः ॥
वृषहत्यापराधात्तु विमुक्तो देवकीसुतः ॥ ४ ॥
यत्र ब्रह्मादयो देवाः समाजग्मुर्भुवस्थले । ब्रह्मस्तुत्याभिषेकं च हरेश्चक्रे विधानतः ॥
सामवेदोद्भवैर्मन्त्रैः सर्वकामार्थसिद्धये । ब्रह्मकुण्डं यतो जातं ब्रह्मादिभिर्विनिर्मितं ॥

ततो ब्रह्मकुण्डस्नानाचमनप्रार्थनमन्त्रः । कौर्मे—

ब्रह्मादिनिर्मितस्तीर्थं शुद्धकृष्णाभिषेचन । नमः कैवल्यनाथाय देवानां मुक्तिकारक ॥
इति मन्त्रं दशावृत्या मज्जनाचमनैर्नमन् । द्वयोर्मध्ये कृतं दानं सहस्रं गुणितं भवेत् ॥
पुण्यं मानसिकं यत्र फलमक्षयमाप्नुयात् । मनसि संस्थितान्कामान् चिन्तनात्सर्वमाप्नुयात् ॥
गुप्तदानं प्रकुर्वीत स्वर्णगौरजतादिकं । अन्नवस्त्रादिकं चैव पात्रपृथ्वीगृहादिकं ॥
दशायुतगुणं पुण्यं फलं तद्द्विगुणं लभेत् । नारीकेलफलादीनां हस्त्यश्वादिविधायिनां ॥
पुण्यं लक्षगुणं जातं फलं स्यात्तच्चतुर्गुणं । मनसा क्रियते दानं मक्षयं फलमाप्नुयात् ॥५॥
यत्रैव देवताः सर्वे कृत्वा कृष्णं पुरः सरं । मनसाख्यशुभां देवीं स्थापयेवुर्मनोर्थदां ॥

ततो मानसाम्बिकाप्रार्थनमन्त्रः । वायुपुराणे—

मनसः कामदायैव मनसायै नमो नमः । नम देव्यै महादेव्यै धनधान्यफलप्रदे ॥
इति मन्त्रं समुच्चार्य नवभिः प्रणमेच्चतां । सर्वान्कामानवाप्नोति मनसा चिन्तनादपि ॥
देव्यास्तु भवनस्यापि परिक्रमणमष्टधा । क्रियमाणः फलं लेभे मनसा यदि चिंतितम् ॥ ६ ॥

---

अनन्तर मानसीगङ्गा स्नानाचमन प्रार्थनामन्त्र—हे गंगे ! हे दुग्धमयि ! हे देवि ! हे भगवान के मन से उद्भवे ! हे कैवल्य रूपिणी ! हे मुक्ति देने वाली ! हे मुक्तिभागिनी ! आपको नमस्कार। इस मन्त्र के शत बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करें तो ब्रह्महत्यादि पाप समूह अवश्य नाश हो जाते हैं। यहाँ वृषहत्या अपराध से देवकी सुत विमुक्त हुए थे ॥ ४ ॥

यहाँ ब्रह्मादिक देवता आकर उपस्थित हुए। ब्रह्माजी ने साम वेद उत्पन्न मन्त्रों से यथा विधि सर्वार्थ सिद्धि के लिये श्रीकृष्ण का अभिषेक किया। जिससे ब्रह्मकुण्ड उत्पन्न हुआ है। स्नानाचमन-प्रार्थनामन्त्र यथा-कौर्म्य में—हे ब्रह्मादि द्वारा निर्म्मित तीर्थ ! हे शुद्ध ! हे कृष्ण के अभिषेक स्थल ! कैवल्य नायक आपको नमस्कार। आप देवताओं के मुक्ति करने वाले हैं ! इस मन्त्र के १० बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करें। दोनों के बीच दान करने से हजार गुणा फल होता है। मनमें पुण्य करने से भी अक्षय फल लाभ होता है। जिसकी चिन्ता मात्र से ही मन में रखी हुई समस्त कामना सिद्धि होती है। यहाँ सुवर्ण, चाँदी, वस्त्र, अलंकारादिक गुप्त भाव से दान करने से दश अयुत गुण पुण्य और उसका दो गुणा फल मिलता है। नारिकेल, हस्ति, अश्वादिक दान से लक्षगुण पुण्य और उसका चतुर्गुण फल लाभ होता है। मनमें दान करने से अक्षय फल लाभ होता है ॥ ५ ॥

यहाँ देवतागणों ने श्रीकृष्ण को आगे कर मनसा नामक मनोरथ देने वाली देवी की स्थापना की। मनसा देवी प्रार्थनामन्त्र यथा—वायुपुराण में—हे मनसादेवि ! मनः कामना देने वाली आपको नमस्कार। हे देवि ! हे महादेवि ! धनधान्य फल देने वाली आपको नमस्कार। इस मन्त्र के उच्चारण

ततश्चक्रतीर्थस्नानाचमनप्रार्थनमन्त्रः—

चक्रतीर्थ नमस्तुभ्यं कृष्णचक्रेण लाञ्छितं । सर्वपापच्छिदे तस्मै कृष्णनिर्मलनिर्मितं ॥
इति मन्त्रं दशावृत्या मज्जनाचमनैर्नमन् । दशद्वारात् कृतात्पापात् मुच्यते नात्र संशयः ॥७॥
यत्रैव देवताः सर्वे चक्रेश्वरसदाशिवं । स्थापयेयुः प्रपूर्णाय मनसः कामनाय च ॥

ततश्चक्रेश्वरप्रार्थनमन्त्रः । रुद्रयामले—

चक्रेश्वराय रुद्राय पञ्चास्य शिवमूर्तये । व्रजमंडलरक्षाय नमस्ते भवमूर्तये ॥
इत्येकादशभिर्मन्त्रं नमस्कारं पठनश्चरेत् । सर्वकामार्थमोक्षादिं लभते नात्र संशयः ॥ ८ ॥

ततो लक्ष्मीनारायणप्रार्थनमन्त्रः—

लक्ष्मीनारायणायैव गोवर्धनसुखाय ते । नमस्ते गोपवृन्दानां परिपूर्णव्रजोत्सव ॥
इति मन्त्रं चतुर्भिस्तु प्रदक्षिणं नमश्चरेत् । पुत्रादि सर्वकामांश्च लभते नात्र संशयः ॥९॥

भविष्ये—यत्र कृष्णस्तु गोपीनां मनांस्याल्हादनं करात् । कदम्बोपरि संविष्टो मुरलीवादनं शुभम् ॥
गोप्योऽधःस्थलसंस्थास्ता. रासक्रीडनतत्पराः । यतो कदम्बखण्डाख्यं बनं जातं महद्भूतं ॥
देवानां मनुजानांच कृष्णदर्शनदायकं । मुक्तिभागी भवेल्लोको यत्रागत्य नमश्चरेत् ॥

ततो कदम्बखण्डाख्यबनप्रार्थनमन्त्रः—

गोपिकाल्हादरूपाय कृष्णक्रीडनहेतवे । कदम्बाख्यबनायैव कृष्णाय सततं नमः ॥
दशभिर्जपते मन्त्रं क्षणं स्थित्वा हरिं स्मरन् । वैकुण्ठपदमाप्नोति सर्वसौख्यसमन्वितः ॥१०॥

---

पूर्वक ९ बार देवी को प्रणाम करें तो मनमें चिन्तन मात्र से ही समस्त कामनाओं की पूर्त्ति हो जाती है। देवी की भवन परिक्रमा न कर यदि मनमें चिन्तन करें तो भी परिक्रमा कर्म्म का फल प्राप्त होता है ॥६॥

अनन्तर चक्रतीर्थ स्नानाचमन प्रार्थनामन्त्र यथा—हे चक्रतीर्थ ! तुमको नमस्कार । तुम श्रीकृष्ण के चक्र से चिन्हित हो । हे समस्त पाप नाशकारी ! हे श्रीकृष्ण कर्तृक निर्मित ! आपको नमस्कार । इस मन्त्र के १० बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करे तो दस स्थानों में किया हुआ पाप नाश हो जाता है । इसमें कोई सन्देह नहीं है ॥ ७ ॥

यहाँ देवतागणों ने चक्रेश्वर महादेव की स्थापना की । जो समस्त मनः कामना पूर्त्ति के लिये हैं । चक्रेश्वर प्रार्थनामन्त्र यथा—रुद्रयामल में—हे चक्रेश्वर रुद्र ! आपको नमस्कार । आपके पाँच मुख हैं । आप कल्याण मूर्त्ति स्वरूप हैं और व्रजमण्डल की रक्षा के लिये हैं । भव मूर्त्ति आपको नमस्कार । इस मन्त्र के ११ बार पाठ पूर्वक नमस्कार करे तो समस्त कामना और मोक्षादिक लाभ करता है ॥ ८ ॥

अनन्तर लक्ष्मीनारायण प्रार्थनामन्त्र—हे लक्ष्मीनारायण ! आपको नमस्कार ! आप गोवर्द्धन में सुख के लिये हैं । गोपवृन्दों के उत्सव रूप आपको नमस्कार । इस मन्त्र के ४ बार पाठ पूर्वक प्रदक्षिणा, नमस्कार करे तो समस्त कामना और पुत्रादि लाभ करता है इसमें कोई सन्देह नहीं है ॥ ९ ॥

भविष्य में—यहाँ श्रीकृष्ण गोपियों के मनको आल्हादित करते हुए कदम्ब आरोहण पूर्वक मुरली बजाते थे । गोपीगण रासक्रीडा में उत्कण्ठित होकर कदम्बों के नीचे बैठती थीं । इसलिये उसका नाम कदम्बखण्डि है । इस कारण से इस अद्भुत कदम्बखण्डि नामक बन की सृष्टि हुई है जो देवता और मनुष्यों को कृष्णदर्शन कराने वाली है । यहाँ मनुष्य आकर नमस्कार करने से मुक्तिभागी होता है । प्रार्थनामन्त्र

यत्रैव गोपिकाः सर्वाःकृष्णमानीय चार्भकम् । स्नापयेयुः सुखाल्हादैर्हरिदेवं मुहुर्वदन् ॥
कुण्डं श्रीहरिदेवाख्यं प्रचक्रुः पुण्यवर्धनं । धनधान्यप्रदं नृणां चिरवालायुवर्द्धनं ॥
ततो हरिदेवकुण्डस्नानाचमनप्रार्थनमन्त्रः —
गोपिकाकृततीर्थाय हरिदेव मनोहर । तीर्थराज नमस्तुभ्यं कृष्णलालित्यदर्शिने ॥
इति मन्त्रं समुच्चार्य सप्ताचमनमज्जनैः । नमस्कारं विधानेन कुर्यान्मुक्तिपदं लभेत् ॥ ११ ॥
शक्रयामले-यत्रेन्द्रो ध्वजमादाय कृष्णस्याग्रे व्रजन् पुरः । कृतार्थपदमालेभे विष्णोरग्रे सरस्वतः ॥
इन्द्रध्वजवनप्रार्थनमन्त्रः—
कृतार्थरूपिणे तुभ्यमिन्द्रध्वज कृतार्थिने । नमः कैवल्यनाथाय शक्रध्वजव[illegible]य ते ॥
इति मन्त्रं समुच्चार्य षडावृत्या नमश्चरेत् । कृतार्थपदमाप्नोति त्रैलोक्याधिपतिर्भवेत् ॥ १२ ॥
तन्मध्ये देवताः सर्वे पञ्चतीर्थान् समाददुः । कुंडं चक्रुश्च गोपीनां क्रीडास्नपनहेतवे ॥
पञ्चतीर्थाख्यकुंडञ्च पञ्चहत्याविनाशनं । पञ्चधान्यकृतं दानं पञ्चविप्राय दीयते ॥
सिततण्डुलगोधूमयवमुद्गमसूरिकम् । पञ्चधान्यमिदं श्रेष्ठं घृतादिरससंयुतम् ॥
पञ्चगोत्रसमुद्भूताः वशिष्ठात्रिपराशरः । कश्यपाङ्गिरसश्चैते दानपात्राः प्रपूजकाः ॥
ततो पञ्चतीर्थकुंडस्नानाचमनप्रार्थनमन्त्रः—
नर्मदे सरयू काञ्चि गोमती वेत्रिके नमः । कृष्णाभिषेचनार्थाय पञ्चतीर्थाय ते नमः ॥
इति मन्त्रं समुच्चार्य पञ्चभिर्मज्जनाचमं । नमस्कारं करोत्येवं पञ्चसौभाग्यसम्पदम् ॥
लभते वैष्णवं लोकमुच्चकैः पदमाप्नुयात् ॥ १३ ॥

---

यथा—हे गोपिकाओं के आल्हाद रूप ! हे श्रीकृष्ण क्रीडा के लिये कदम्बखण्डी नामक बन ! हे श्रीकृष्ण ! आपको निरन्तर नमस्कार । यहाँ क्षण काल ठहर कर १० बार मन्त्र जप पूर्वक हरि के स्मरण करने से समस्त सुख को प्राप्त होकर वैकुण्ठ पद को प्राप्त हो जाता है ॥ १० ॥

यहाँ गोपीगणों ने बालक श्री कृष्ण को लाकर बार-बार हरिदेव-हरिदेव कहकर सुख से स्नान कराया है वहाँ श्रीहरिदेव नामक कुंड का उत्पन्न हुआ है जो धन, धान्य, देने वाला है और बालकों को परमायु करने वाला है । स्नानाचमन प्रार्थनामन्त्र— हे गोपिकागण कर्तृक निर्मित तीर्थ ! हे मनोहर हरिदेव ! हे तीर्थराज ! हे श्रीकृष्ण लीला के दर्शक ! आपको नमस्कार । इस मन्त्र के पाठ कर ७ बार आचमन, मज्जन, स्नान करे । विधि पूर्वक नमस्कार करने से मुक्ति पद को प्राप्त होता है ॥ ११ ॥

शक्रयामल में—यहाँ इन्द्र ध्वज लेकर श्रीकृष्ण के आगे जाकर कृतार्थ हो गया था यह वही इन्द्र-ध्वजवन है । प्रार्थनामन्त्र यथा—हे इन्द्रध्वजवन ! कृतार्थ स्वरूप आपको नमस्कार । आप इन्द्र के ध्वज द्वारा निर्मित हैं और कैवल्य नायक हैं । इस मन्त्र के ६ बार पाठ पूर्वक नमस्कार करे तो त्रैलोक्य अधि-पति होकर कृतार्थ पद को प्राप्त होता है ॥ १२ ॥

उसके बीच में देवतागणों ने पाँच तीर्थों का उद्भव कराया और गोपियों के स्नान, क्रीडादिक के लिये पाँच कुंड निर्मित किये । अतः यह पञ्चकुंड नामक तीर्थ है जो कि पाँच हत्याओं का भी नाश करने वाला है । यहाँ पाँच गोत्रों से उत्पन्न पाँच विप्रों के लिये पाँच प्रकार के धान्य पृथक् २ प्रदान करें । सफेद चाँवल, गेहूँ, यब, मूंग, मसूर यह पञ्च धान्य हैं । घृतादि रस से संयुक्त कर सबका दान करें । वशिष्ठ, अत्रि, पराशर, कश्यप और अंगिरा गोत्र से उत्पन्न पाँच ब्राह्मण दान के पात्र हैं । पञ्चतीर्थस्नानाचमन

ततो मैन्द्रवतीर्थकुण्डस्नानाचमनप्रार्थनमन्त्रः । मात्स्ये—

मैन्द्वाय नमस्तुभ्यं ऋषिशृङ्गसुताय ते । मैन्द्वाख्याय तीर्थाय कुण्डाय सततं नमः ॥
इति मन्त्रं समुच्चार्य चतुर्धा मज्जनाचमैः । नमस्कारं प्रकुर्वीत सर्वान्कामानवाप्नुयात् ॥१४॥
यमोऽनुचरभावेन यत्र स्नानं समाचरेत् । व्रजमण्डलरक्षार्थमागतो पाशदण्डभृत् ॥
कृष्णाज्ञया भ्रमन्यत्र गोपानां रक्षणाय च । यमतीर्थसरोरम्यं महिषासुरनाशनं ॥
यत्रैव कार्तिके मासि कृष्णपक्षे त्रयोदशि । तस्यां वै कुरुते स्नानं दीपदानं चतुर्मुखं ॥
सर्वदा सौख्यमाप्नोति सर्वारिष्टविवर्जितः ।

ततो यमतीर्थसरोवरस्नानाचमनप्रार्थनमन्त्रः--

सर्वारिष्टहरस्तीर्थं यमतीर्थं सरोवर ! । नमस्ते कल्मषौघानां शान्तये भूरिदाय ते ॥
इति मन्त्रं चतुर्भिस्तु पठित्वा मज्जनाचमं । नमस्कारं प्रकुर्वीत सदासुखमवाप्नुयात् ॥
चतुर्विधं कृतं दानं कृष्णागौस्वर्णलौहकम् । तिलं दद्यात् विधानेन गूर्जराय विशेषतः ॥
यमलोकं कदा नैव दृष्टो मोक्षपदं लभेत् ॥ १५ ॥
तत्रोदकं समानीय वरुणोऽनुचरभावतः । श्रीकृष्णस्नपनार्थाय रचयेन्निर्मलं सरः ॥
वरुणाख्यसरो रम्यं विख्यातं पृथिवीतले ।

ततो वरुणसरस्नानाचमनप्रार्थनमन्त्रः—

मन्दाकिनीसमस्तीर्थं वरुणसंगकाय च । नमः परमशोभाढ्य कल्मषघ्नाय ते नमः ॥
द्विसप्रतिभिरुच्चार्य मन्त्रं मज्जनमाचमं । नमस्कारं प्रकुर्वीताखण्डसौभाग्यसम्पदं ॥
लभते परमं सौख्यं परिवारसमन्वितः ॥ १६ ॥

---

प्रार्थनामन्त्र—हे नर्मदे ! हे सरयू ! हे कांचि ! हे गौमती ! हे वेत्रवती ! आप सबको नमस्कार। श्रीकृष्ण के अभिषेक के लिये आप सब हैं। इस मन्त्र के पाठ पूर्वक ५ बार मज्जन, स्नान, नमस्कार करने से पाँच प्रकार की सम्पदा लाभ करता है और वैष्णव लोक के लाभ पूर्वक उच्च पद के लिये जाता है ॥ १३ ॥

अनन्तर मैन्द्रवकुंडप्रार्थनास्नानाचमनमन्त्र—मात्स्य में—हे समस्त अरिष्ट हरणकारी मैन्द्रव नामक ऋषिशृंग के पुत्र ! हे मैन्द्रव नामक तीर्थ ! हे कुण्ड रूप ! आपको नमस्कार ; इस मन्त्र के ४ बार पाठ पूर्वक नमस्कार, स्नान, प्रार्थना करे तो समस्त कामना प्राप्त हो जाती हैं ॥ १४ ॥

यहाँ पासधारी यमराज अनुचर भाव से स्नान किये हैं और श्री कृष्ण की आज्ञा से गोपों की रक्षा के लिये भ्रमण करते थे। यह महिषासुर नाशकारी यमराज का तीर्थ है। कार्तिक मास कृष्ण पक्ष की त्रयोदशी में वहाँ स्नान पूर्वक चारों ओर में दीपदान करने से सकल अरिष्टों से मुक्त होकर सुखी होता है। स्नानाचमन प्राथनामन्त्र यथा—हे समस्त अरिष्ट नाश करने वाले यमतीर्थ सरोवर ! आपको नमस्कार। आप कल्मष समूह के नाश के लिये हैं और बहुत कुछ देने वाले हैं। इस मन्त्र के ४ बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करें तो सर्वदा सुख को प्राप्त होता हैं। यहाँ विशेष करके गूजरों के लिये तथा और के लिये चार प्रकार के दान करें। कृष्ण गौ, सुवर्ण, लोहा, तिल यह चार प्रकार की वस्तु यथा विधि दान करने से यमलोक का दर्शन कभी नहीं करता है और मोक्ष पद को प्राप्त होता है ॥ १५ ॥

अनन्तर वरुण सरोवर है। यहाँ वरुणजी ने अनुचर भाव से उष्ण जल लाकर श्रीकृष्ण का अभिषेक करने के लिये निर्म्मल सरोवर बनाया था इसलिये यह पृथ्वी में वरुण सरोवर प्रसिद्ध हुआ है।

कुबेरोऽत्र तपश्चक्रे नदीं कौबेरिणीं करोत्। यत्र स्नातो नरो यस्तु कुबेरवद्धनी भवेत् ॥
चतुर्विधधनैर्पूर्णो जायते नात्र संशयः।

ततो कौबेरिणीस्नानाचमनप्रार्थनमन्त्रः। भविष्ये—

कौबेरिण्यै नमस्तुभ्यं नद्यै लक्ष्म्यै नमो नमः। कृष्णायै बहुधान्यायै स्वर्णदायै वरानने ॥
इति मन्त्रं दशावृत्या मज्जनाचमनैं नमन्। धनाढयो बहुधा लोको स्नपनाज्जायते ध्रुवम् ॥
इति गोवर्द्धनस्थानतीर्थोत्पत्तिरुदाहृता। लोकानाञ्च हितार्थायावन्यामाविर्भवन्ति हि ॥
इति गोवर्धनोत्पत्तिमहात्म्यनिरूपणं ॥ १७ ॥

अथ कामबनोत्पत्तिमहात्म्यनिरूपणं। वाराहे—

भाद्रकृष्णतृतीयायामागतो बनयात्रया। यत्रैव गोपिकानान्तु कामास्तु बहुधा भवन् ॥
यतो कामबनं नाम विख्यातं पृथिवीतले। मोहिता देवताः सर्वा कामसन्तप्रमानसः ॥

ततो कामवनप्रार्थनमन्त्रः—

गोपीगीतप्रविष्टाय धीसंमोहनकारिणे। नमस्ते कामदेवाय श्रीमन्मदनमूर्त्तये ॥
ततो मन्त्रं समुच्चार्य पञ्चधा च नमस्करोत्। सर्वदा पुरुषार्थेन रमते स्त्रीजनैः सह ॥
परमायुः सजीवेत सौख्यश्रीवल्लभः सदा ॥ १८ ॥
रतिकेलिसखी यत्र स्नानं प्रतिदिनं करोत् । रतिकेलिकृतं कुण्डं सर्वसौभाग्यवर्धनं ॥
नारी च पतिना सार्धं रतिकेलिं समाचरेत्। कदाचिन्न भवेद्भगं पत्युश्चरति क्रीडनं ॥
वियोगं न कदा जातं पत्युरत्यन्तवल्लभा।

---

स्नानाचमन प्रार्थनामन्त्र—हे मन्दाकिनी समान तीर्थ! हे वरुण नामक सरोवर! हे परम शोभा से युक्त! हे कलमष नाशकारी तीर्थ! आपको नमस्कार। इस मन्त्र के ७२ बार पाठ पूर्वक मज्जन, आचमन, स्नान, नमस्कार करे तो अखण्ड सौभाग्य को प्राप्त होकर परिवार के साथ परम सुख का लाभ करता है ॥ १६ ॥

अनन्तर कुवेर तीर्थ है। यहाँ कुबेरजी ने तपस्या करके कौबेरिणी नामक नदी की सृष्टि की। यहाँ स्नान करने से मनुष्य कुबेर के समान धनी हो जाता है। स्नानाचमन प्रार्थनामन्त्र—भविष्य में—हे कौबेरिणी! लक्ष्मी रूपा नदी आपको नमस्कार। आप कृष्ण रूपा हैं। सर्वदा धन धान्य के लिये आपको नमस्कार। इस मन्त्र के १० बार पाठ पूर्वक मज्जन, आचमन, स्नान करे। यहाँ स्नपन करने से मनुष्य बहु-बन्धन से मुक्त अवश्य होता है। इति यह गोवर्द्धन के तीर्थ कुण्ड देवताओं की उत्पत्ति और महिमा वर्णन किया गया है जो लोकों के हित के लिये जानना है ॥ १७ ॥

अब कामबन की उत्पत्ति महिमा का निरूपण करते हैं। वाराह में—भाद्र की कृष्णा तृतीया तिथि में बनयात्रा के लिये आवें। यहाँ गोपियों की बहुत प्रकार की कामना हुई थी, इसलिये पृथ्वी में यह कामबन करके प्रसिद्ध है। देवतागण मोहित होकर यहाँ काम संतप्त हो गये थे। अनन्तर कामबनप्रार्थना-मन्त्र यथा—हे गोपियों की संज्ञा मोहित करने वाले! हे कामबन! हे कामदेवरूप श्री मदनमोहन! आपको नमस्कार। इस मन्त्र के पाठ पूर्वक ५ बार नमस्कार करें तो सर्वदा विविध पुरुषार्थ से युक्त होकर स्त्रियों के साथ रमण करता है। यावत् परमायु जीता है ॥ १८ ॥

अनन्तर रतिकेलि कुंड है। यहाँ रतिकेलि नामक सखी प्रति दिन स्नान करती हैं। यहां सम्पूर्ण

ततो रतिकेलिकुण्डस्नानाचमनप्रार्थनमन्त्रः । भविष्ये—

रतिकेल्यै नमस्तुभ्यं सर्वकैवल्यमूर्तये । सर्वसौभाग्यदे तीर्थे रतितीर्थ नमोस्तु ते ॥
इति मन्त्रं त्रिधावृत्या मज्जनाचमनैं र्नमन् । सर्वदा सौख्यमाप्नोति दम्पतीरतिक्रीडनात् ॥१९॥
यत्रैव फाल्गुने मासि होलिकोत्सवकारकः । मण्डलो राजते सौख्यमुत्सवञ्च ब्रजौकसाम् ॥

ततो केलिमण्डलप्रार्थनमन्त्रः—

राधाकृष्णविलासाय मण्डलाय नमो नमः । सर्व मंगलमांगल्यफाल्गुनोत्सवकारक ॥
इति मन्त्रं समुच्चार्य नवभिः प्रणमेत्स्थलं । सर्वदा सौख्यमाप्नोति होलिकोत्सववर्धनः ॥

इति कामबनोत्पत्तिमाहात्म्यनिरूपणं ॥ २० ॥

अथ जावबटाधिबनोत्पत्तिमाहात्म्यनिरूपणं । वृहद्गौतमीये—

राधापादतलाद्यत्र जावकः स्खलितोऽभवत् । यस्माज्जावबटं नाम विख्यातं पृथिवीतले ॥

ततो जाववटप्रदक्षिणाप्रार्थनमन्त्रः—

राधाजावकसम्भूत सौभाग्यसुखवर्धन । रतिकेलिसुखार्थाय नमो जाववटाय च ॥
इति मन्त्रं समुच्चार्य दशधा प्रणतिञ्चरेत् । सर्वदा सुखमाप्नोति सर्वसौभाग्यसम्पदां ॥
यत्र राधाकरोत्स्नानं चतुषष्ठिसखिभिस्सा । यस्माज्जाववटे संस्थं राधाकुण्डं मनोहरं ॥
रक्तनीरसमाक्रान्तं किंचित् पीतसमाकुलं । रतिकेलिसुखं नृणामतिसौभाग्यवर्धनं ॥२१॥

ततो राधाकुण्डस्नानाचमनप्रार्थनमन्त्रः—

राधायै सततं तुभ्यं ललितायै नमो नमः । कृष्णेन सह क्रीडायै राधाकुण्डाय ते नमः ॥
इति मन्त्रं दशावृत्या मज्जनाचमनैं र्नमन् । नर नारी कृतस्नानादखण्डसुखमाप्नुयात् ॥ २२ ॥

---

सौभाग्य को बढ़ाने वाला रतिकेलि नामक कुण्ड है । यहाँ स्नान करने से नारी पति से कभी वियुक्त नहीं होती है और पति की अत्यन्त वल्लभा होती है । स्नानाचमन प्रार्थनमन्त्र यथा—भविष्य में—हे रतिकेलि ! समस्त कैवल्य मूर्त्ति रूप आपको नमस्कार । हे सर्व सौभाग्य देने वाले रतितीर्थ आपको नमस्कार । इस मन्त्र के ३ बार पाठ पूर्वक स्नान आचमन, प्रणाम करें तो दम्पती रति क्रीड़ा में सर्वदा सुख प्राप्त करते हैं ॥ १९ ॥

यहाँ फाल्गुन मास में होलिका उत्सव होता है । ब्रजवासी मण्डली बद्ध होकर पृथक-पृथक् उपस्थित होते हैं और वहाँ बड़ा भारी उत्सव सुख होता है । अनन्तर होलीमंडल प्रार्थनामन्त्र—हे राधाकृष्ण विलास ! हे मण्डल आकार ! हे समस्त मंगल के मङ्गल रूप फाल्गुन उत्सवकर्त्ता ! आपको नमस्कार। इस मन्त्र के पाठ पूर्वक ९ बार स्थान को प्रणाम करे तो सर्वदा होलिकोत्सव सुख का अनुभव करता है । यह कामवन की उत्पत्ति महिमा वर्णन की गयी है ॥ २० ॥

अब जावबटाधिबन की उत्पत्ति महिमा कहते हैं । वृहद्गौतमीय में—यहाँ श्रीराधिका जी के चरणों से जावक ( महावर ) गिरा था । इसलिये यह यावबट नाम से विख्यात हुआ है । प्रदक्षिणा प्रार्थना मन्त्र—हे राधिका के जावक से उत्पन्न ! हे सौभाग्य सुख को देने वाले ! हे रतिकेलि सुख के लिये जावबट ! आपको नमस्कार । इस मन्त्र के उच्चारण पूर्वक १० बार प्रणाम करे तो सर्वदा समस्त सौभाग्य सम्पत्ति के लाभ पूर्वक अजस्त्र सुख को प्राप्त होता है ॥ २१ ॥

यहाँ राधाकुंड है । जहाँ श्रीराधिका ६४ सखियों को सङ्ग में लेकर स्नान करती थीं एवं किंचित्

नारदीये—यत्र राधाकरोद्रासं कृष्णेन सह विह्वला । सप्तवर्षस्वरूपेण सखिभिर्बहुधा सुखम् ॥
कौमार सम्भवामूर्तिर्ललिता राधया सह । कण्ठे हस्तं समाधाय अन्योन्यकुटिलेक्षणं ॥
रासमण्डलमाख्यातं गोपवृन्दैर्विनिर्मितं । भाद्रे मासि सिते पक्षे कृष्णो क्रीडां करोत्यसौ ॥
ततो रासमण्डलप्रार्थनमन्त्रः—
चतुषष्ठिसखिभ्यस्तु राधादिभ्यो नमो नमः । कृष्णाय रमणायैव सप्तवर्षस्वरूपिणे ॥
इति मन्त्रं नवावृत्या मण्डलाय नमश्चरेत् । त्रैलोक्यपदराज्यस्य सुखमाप्नोति मानवः ॥२३॥
यत्रैव बहुधा जाताः सर्वाः सख्यस्तु विह्वलाः । कृष्णं परिजहुस्तत्र राधाग्रन्थिं समायुजन् ॥
पद्मावत्यास्तु सख्यास्तु विवाहं सा समाचरेत् । गानं वैवाहिकोत्साहं सर्वमांगल्यपूरितं ॥
स्थानं वैवाहिकं नाम नरनारीवरप्रदं ।
ततः पद्मावती विवाहस्थलप्रार्थनमन्त्रः—
नमस्ते सर्वमांगल्यशुभवैवाहिकस्थल । पद्मावती समेताय नमस्ते नन्दसूनवे ॥
इति मन्त्रं समुच्चार्य वारमेकादशं नमन । चिरञ्जीवी भवेल्लोको पुत्रोत्सवसुखं लभेत् ॥
इति जाववटाधिबनोत्पत्तिमाहात्म्यनिरूपणं ॥ २४ ॥
अथ बनयात्राप्रसंगे नारदबनोत्पत्तिमाहात्म्यं—
भाद्रे मास्यसिते पक्षे चतुर्दश्यां च दर्शनं । शुक्ले कार्तिकमासि च दर्शनं प्रतिपद्दिने ॥

---

पीला युक्त रक्त जल जिसमें है । जो अत्यन्त सौभाग्य बढ़ाने वाला है और रतिकेलि सुख के लिये है । स्नानाचमन प्रार्थनामन्त्र—हे राधिका स्वरूप ! हे श्री ललिते ! हे श्रीकृष्ण के साथ क्रीड़ा करने वाले ! हे राधाकुंड ! आपको नमस्कार । इस मन्त्र के १० बार पाठ पूर्वक स्नान, आचमन, नमस्कार करें तो नर व नारी अखण्ड सुख को प्राप्त होता है ॥ २२ ॥

अनन्तर रासमंडल स्थल है । नारदीय में—यहाँ सखियों को संग लेकर श्रीराधिका ने सात वर्ष की अवस्था में विह्वल होकर श्रीकृष्ण के साथ विविध रासलीला की थीं । जहाँ कौमार मूर्त्ति से श्रीललिता जी श्रीराधिका जी के कंठ पर हाथ रखकर परस्पर कुटिल दृष्टि के साथ विहार करती थीं । यह रासमंडल है जो गोपगण कर्तृक निर्म्मित है । भाद्र मास के शुक्ल पक्ष में श्रीकृष्ण यहाँ कीड़ा करते हैं । रासमंडल प्रार्थनामन्त्र यथा—हे चौसठ सखीयों के साथ श्रीराधिके ! आपको नमस्कार । हे सात वर्ष स्वरूप श्रीरमण श्रीकृष्ण ! आपको नमस्कार । इस मन्त्र के ६ बार पाठ पूर्वक मंडल को नमस्कार करे तो त्रैलोक्य राज्य पद को पाकर सुखी होता है ॥ २३ ॥

अनन्तर पद्मावती वैवाहिक स्थल है । यहाँ समस्त सखियाँ अत्यन्त विह्वल हुई थीं और श्रीकृष्ण का आलिंगन किया था । वहाँ श्रीराधिका ने श्रीकृष्णके साथ पद्मावती सखीको गाँठबन्धन कराकर विवाह कराया था । सखीगण विविध प्रकार वैवाहिक उत्सव गानादि करने लगीं । इसलिये यह वैवाहिक स्थल है जो नर नारियों को बर देने वाला है । विवाह स्थल का प्रार्थनामन्त्र—हे समस्त मंगलमय शुभ वैवाहिक स्थल ! हे पद्मावती सहित श्रीनन्दनन्दन ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ११ बार नमस्कार करें तो मनुष्य चिरञ्जीवी होकर पुत्रोत्सव सुख का लाभ करता है । यह जाववट अधिबन की उत्पत्ति महिमा कही गयी है ॥ २४ ॥

अब बनयात्रा प्रसंग में नारदबन की उत्पत्ति महिमा कहते हैं । भाद्रमास के कृष्णपक्ष की

आदिपुराणे-यत्रैव मुनिशार्दूलो नारदस्तु तपश्चरेत् । कृष्णसंदर्शनार्थाय योगविद्यां च प्रार्थयन् ॥
यतो नारदमाख्यातं बनं नाम भुवि स्थितं ।

ततो नारदबनप्रार्थनमन्त्रः—

गोवर्धनमुखास्थाय नारदाख्यवनाय च । तपसां राशये तुभ्यं नमः कैवल्यरूपिणे ॥
इति मन्त्रं समुच्चार्य सप्तभिः प्रणमेत्स्थलं । परं मोक्षपदं लेभे सर्वदा विजयी भवेत् ॥२५॥
यत्रैव नारदो नित्यं स्नानं कृत्वा तपश्चरन् । यतो नारदकुण्डाख्यं सर्वेष्टफलदायकं ॥

ततो नारदकुण्डस्नानाचमनप्रार्थनमन्त्रः । वृहन्नारदीये—

ब्रह्मलोकप्रदायैव वैकुण्ठपददायिने । नमः नारदकुण्डाय तुभ्यं पापप्रशान्तये ॥
इति मन्त्रं दशावृत्या मज्जनाचमनैर्नमन् । सर्वपापविनिर्मुक्तो वैकुंठपदमाप्नुयात् ॥ २६ ॥
यत्र ब्रह्मा समागत्य पुत्राध्ययनहेतवे । सर्वयोगमयीं विद्यां कमण्डलुसमाकुलः ॥
उपदेशं च पुत्राय करोति परमोत्सवं । यतो विद्यास्थलं जातं सिद्धपीठं वरप्रदं ॥
यतो ब्रह्माप्रसादात्तु नारदाध्ययनाच्च यः । देवर्षिमुनिलोकानां सिद्धिविद्याप्रदायकः ॥

ततो नारदविद्याध्ययनस्थलप्रार्थनमन्त्रः—

ब्रह्मविद्यास्थलस्तुभ्यं जगदानन्ददायिने । नारदाध्ययनश्रेष्ठ नमस्तुभ्यं वरप्रद ॥
गोपिकाशक्तरूपाय केशवाय नमोस्तु ते। स्नपिताय भगोस्तुभ्यं विमलाङ्गन्ध ते नमः ॥
इति षोडशभिर्मन्त्रं मज्जनाचमनैर्नमन्। सर्वपापविनिर्मुक्तो मुक्तिभागी भवेन्नरः ॥
इति विस्मरणबनोत्पत्तिमाहात्म्यनिरूपणं ॥ ७६ ॥
अथ हास्यबनोत्पत्तिमाहात्म्यं। कौर्म्ये—
पूर्णायाञ्च सितेपक्षे वैशाखे व्रजयात्रया। प्रारम्भो शुभदो प्रोक्तो हास्य नाम बनाच्छुभात् ॥
सर्वा राधादिगोप्यस्तु गोपालं हास्यमाचेरुः। यतो हास्यबनं जातं नाम विख्यातकीर्तितं ॥
हास्यबनप्रार्थनमन्त्रः—
गोपीहास्यस्वरूपाय कृष्णलोलविधायिने। नानाल्हादविनोदाय नमो वैमल्यमूर्तये ॥
इति मन्त्रं समुच्चार्य सप्तभिस्तु नमश्चरेत्। सर्वदा हास्यक्रीड़ाभिर्जायतेऽहर्निशं सुखं ॥
वियोगं न कदा पश्येत् विनोदं लभभे सदा ॥ ७७ ॥
गोप्यो गोपालमारुध्य स्नापयेयुर्महोत्सवैः। नानागानविधानेन चुचुम्बुश्चिबुकं हरेः ॥
यतो गोपालकुण्डञ्च विख्यातं नाम संभवं।
ततो गोपालकुण्डस्नानाचमनप्रार्थनमन्त्रः—
मनोरमाय गोपीनां कृष्णाल्हादनतत्पर। नमो गोपालकुण्डाय तीर्थराज नमोस्तु ते ॥
इति मन्त्रं पठन्नित्यं शक्त्यावृत्या नमश्चरेत्। मज्जनाचमनैः पूर्वैर्विध्येषा ब्रह्मणोदिता ॥

---

यहाँ यात्रा करे। यहाँ गोपीगण हरि को त्याग कर ढूँढ़ने लगी और श्रीकृष्ण गोपीगणों को छोड़कर ढूँढ़ने लगे व केशव रूप का धारण करके यहाँ ठहरने के कारण विस्मित हुए इसलिये विस्मरण नामक वन-राज की उत्पत्ति हुई। विस्मरणबन प्रार्थनामन्त्र यथा—हे गोपिका अन्वेषण बन ! हे केशव के आल्हाद से धूम्रवर्ण स्वरूप ! आपको नमस्कार। इस मन्त्र के तीन बार पाठ पूर्वक नमस्कार करें तो अपनी किम्वा अपर की भूमी को प्राप्त होता है ॥ ७५ ॥

केशव ने गोपियों के लाभ पूर्वक यहाँ स्नान किये थे। वहाँ केशवकुंड हुआ। केशवकुंड स्नानाचमन प्रार्थनामन्त्र—हे गोपीगणों से आशक्त स्वरूप ! हे केशव ! आपको नमस्कार। आप महासौभाग्य शील के स्नान के लिये है, विमल अङ्ग गन्ध से आप धुले हुए हैं। इस मन्त्र के १६ बार पाठ पूर्वक मज्जन, स्नान, आचमन, नमस्कार करे तो समस्त पापों से मुक्त होकर मुक्तिभागी होता है। इति विस्मरण बन का वर्णन ॥ ७६ ॥

अब हास्यबन की उत्पत्ति महिमा वर्णन करते हैं। कौर्म्य में—वैशाख पूर्णिमा में ब्रजयात्री हास्यबन यात्रा का प्रारम्भ करें। यहाँ समस्त राधिकादि गोपीगणों ने गोपाल से हास्य किया था इसलिये यह हास्यबन नाम से प्रसिद्ध हुआ है। प्रार्थनामन्त्र यथा—हे गोपीहास्य स्वरूप ! हे कृष्ण को चञ्चल करने में विचक्षण ! आपको नमस्कार। आप नाना प्रकार के आल्हाद विनोद को देने वाले हैं और विशुद्ध मूर्त्ति वाले हैं। इस मन्त्र के पाठ पूर्वक ७ बार नमस्कार करने से सर्वदा हास्य क्रीड़ा आनन्द से रहता है। उसका कभी वियोग नहीं होता है ॥ ७७ ॥

गोपीगणों ने श्रीगोपाल को रुन्ध कर महोत्सव पूर्वक स्नान कराया और चिबुक का चुम्बन

मुक्तिवान् धनवान् याऽपी गवामधिपतिर्भवेत् ॥ इति हास्यबनोत्पत्तिमाहात्म्यनिरूपणं ॥७८॥

अथ जन्हुबनोत्पत्तिमाहात्म्यं । ब्राह्मे—

जेष्ठशुक्लचतुर्दश्यां ब्रजयात्राप्रसंगत: । प्रदक्षिणाप्रपूर्णास्तु कोणदक्षिणगामिनी ॥
जन्हु नाम मुनिश्रेष्ठो यत्र तपे महत्तप: । अयुतद्वयवर्षेण त्रेतायुगसमागमे ॥
रामो दाशरथिर्भूत्वा कृतार्थं कुरुते हरि: । गंगां त्यक्त्वा ऋषिर्भूमौ वैकुण्ठपदमाप्नुयात् ॥
यतो जन्हुबनं नाम विख्यातं पृथिवीतले ।

ततो जन्हुबनप्रार्थनमन्त्र:—

देवगन्धर्वसेव्याय नानाद्रुमलतार्चित । विकल्मषाय मोक्षाय तपस्थल नमोस्तु ते ॥
इति मन्त्रं दशावृत्या नमस्कारं करोति य: । ब्रह्महत्यादिनिर्मुक्तो वैकुण्ठपदमाप्नुयात् ॥७९॥
नित्यस्नानं चकारात्र जन्हुश्च तपसांनिधि: । जन्हुकूपसमाख्यातं गंगापातसमुद्भवं ॥

जन्हुऋषिकूपस्नानाचमनप्रार्थनमन्त्र:—

गंगापातसमुद्भुत ! जन्हुतीर्थ नमोऽस्तु ते । सर्वकल्मषनाशाय जन्हुकूप नमोस्तु ते ॥
इति मन्त्रं त्रिधावृत्या मज्जनाचमनैर्नमन् । धनधान्यसुखं तस्य गंगास्नानंफलं लभेत् ॥
इति जन्हुबनोत्पत्तिमाहात्म्यनिरूपणं ॥ ८० ॥

अथ पर्वतबनोत्पत्तिमाहात्म्यनिरूपणं । वाराहे—

पञ्चम्यां जेष्ठशुक्ले तु ब्रजयात्राप्रसंगकं । प्रलयान्ते नगैकोऽसौ संस्थितो पृथिवीतले ॥

---

किया इसलिये यह गोपालकुण्ड करके प्रसिद्ध है । स्नानाचमन—प्रार्थनमन्त्र यथा—हे गोपियों के लिये मनोहर ! हे श्रीकृष्ण के आल्हादन में तत्पर ! हे तीर्थराज गोपालकुण्ड ! आपको नमस्कार । इस मन्त्र के नित्य पाठ पूर्वक १४ बार नमस्कार, स्नान, आचमन करें । यह विधि ब्रह्माजी ने कही है । मनुष्य मुक्तिवान् धनवान् गोमान होता है । इति । यह हास्यबन की उत्पत्ति महिमा हुई ॥ ७८ ॥

अब जन्हुबन की उत्पत्ति महिमा कहते हैं । ब्राह्म में—ज्येष्ट शुक्ल चतुर्दशी में ब्रजयात्री प्रदक्षिणा करें जो दक्षिण कोण गामी है । त्रेतायुग के आने पर जन्हु नामक मुनिराज ने २०००० वर्ष यहाँ तपस्या की थी तथा श्रीहरि ने दासरथी राम होकर उन्हें कृतार्थ किया । ऋषिजी गंगा को छोड़कर वैंकुण्ठ में गये । इसलिये यह स्थल पृथ्वी में जन्हुबन करके प्रसिद्ध हुआ है । प्रार्थनामन्त्र—हे देवगन्धर्व सेवित नाना प्रकार के वृक्ष लतादि से युक्त तपस्या स्थल ! आपको नमस्कार । आप कल्मष नाशकारी तथा मोक्ष के लिये हैं । जो इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करे वह ब्रह्महत्या से मुक्त होकर वैंकुंठ पद को प्राप्त होता है ॥ ७९ ॥

तप के भण्डार जन्हुऋषि यहाँ नित्य स्नान करते थे । इसलिये यहाँ जन्हु कूप की उत्पत्ति हुई है । गंगा जी यहाँ आकर गिरी हैं । स्नानाचमन प्रार्थनमन्त्र—हे गङ्गाजी के गिरने से उत्पन्न जन्हुकूप ! आपको नमस्कार । आप समस्त कल्मष नाश करने वाले हैं । इस मन्त्र के ३ बार पाठ पूर्वक स्नानाचमन मज्जन, नमस्कार करे तो उसको धन, धान्य, सुख और गङ्गास्नान फल मिलता है । इति जन्हुबन का वर्णन ॥ ८० ॥

अब पर्वतबन की उत्पत्ति महिमा कहते हैं । वाराह में-ज्येष्ठ शुक्ला पञ्चमी में यहाँ यात्रा विधि है । प्रलय के अन्त में एक पर्वत यहाँ रखा गया था । यहाँ हरि ने वाराह रूप से जन्म लिया था । पृथ्वी

वाराहरूपमास्थाय यत्र जातो स्वयं हरिः । भूमेरुद्धारणार्थाय पातालमधिरोहति ॥
यतोपर्वतनामात्र बनं चक्रुश्च यादवाः ।

ततोपर्वतबनप्रार्थनमन्त्रः—

वाराहजन्मरम्याय पर्वताख्य बनाय च । नमः कल्याणरूपाय सुवर्णादिस्वमूर्तये ॥
इति मन्त्रं नगावृत्या नमस्कारं समाचरेत् । सर्वदा पृथिवीलोके चिरजीवी भवेन्नृपः ॥८१॥
भूमिप्रवेशतो जातं कुण्ड वाराहसंज्ञकं ।

ततो वाराहकुण्डस्नानाचमनप्रार्थनमन्त्रः—

वाराहनिर्मिततीर्थ नीलवारिपरिप्लुत । तीर्थराज नमस्तुभ्यं सर्वदा वरदो भव ॥
इति मन्त्रं समुच्चार्य सप्तभिर्मज्जनाचमैः । नमस्कारं करोद्यस्तु पृथुतुल्यपराक्रमः ॥
इति पर्वतबनोत्पत्तिमाहात्म्यनिरूपणं ॥ ८२ ॥

अथ महाबनोत्पत्तिमाहात्म्यनिरूपणं । वृहद्गौतमीये—

महान्महाऋषिर्नाम यत्र तेपे महात्तपः । वर्षपञ्चसहस्रैस्तु द्वापरान्ते महामुनिः ॥
वैकुण्ठपदलाभाय कृष्णदर्शनलालसः । यस्मान्महाबनं नाम जायते पृथिवीतले ॥

ततो महाबनप्रार्थनमन्त्रः—

तपः पीठ नमस्तुभ्यं कृष्णक्रीड़ावरप्रद । त्रैलोक्यरमणक्षेत्र महाबन नमोस्तु ते ॥
इति मन्त्रं समुच्चार्य नवभिः प्रणतिञ्चरेत् । सर्वान्कामानवाप्नोति चिरञ्जीवी भवेन्नरः ॥
भाद्रशुक्लनवम्यान्तु बनयात्रां समाचरेत् । क्रमतः पादविक्षेपैर्धनवान् पुत्रवान्भवेत् ॥८३॥
पक्षवासरसंभूतो यशोदानन्दनो हरिः । अन्धकारस्वरूपेण तृणावर्तो महासुरः ॥

---

को धारण करने के लिये पाताल में प्रवेश करने के कारण यादवों ने इस स्थल का नाम पर्वतबन रखा है। प्रार्थनामन्त्र—हे वराह भगवान के जन्म के कारण मनोहर ! हे पर्वत नामक बनराज ! हे कल्याण स्वरूप ! हे सुवर्णादिरूप ! आपको नमस्कार । इस मन्त्र के ७ वार पाठ पूर्वक नमस्कार करे तो सर्वदा पृथ्वी में चिरञ्जीवी होता है ॥ ८१ ॥

भूमि में प्रवेश हो जाने के कारण यहाँ वाराह नामक कुण्ड उत्पन्न हुआ । स्नानाचमन प्रार्थनामन्त्र—हे वराह निर्म्मित तीर्थ ! हे नील जल से परिपूर्ण वाराहकुंड ! आपको नमस्कार । आप वर को दीजिये । इस मन्त्र के पाठ पूर्वक ७ वार मज्जन, आचमन, नमस्कार करने से पृथुतुल्य पराक्रमी होता है। इति पर्वतबन का वर्णन ॥ ८२ ॥

अब महाबन की उत्पत्ति महिमा कहते हैं । वृहद्गौतमीय में—महाऋषि नामक बड़े भारी ऋषि ने द्वापर के अन्त में ५००० वर्ष पर्य्यन्त वैकुण्ठ प्राप्ति और श्रीकृष्ण दर्शन के लिये तपस्या की । इसलिये पृथ्वी में यह स्थल महाबन करके प्रसिद्ध है । प्रार्थनामन्त्र—हे तपस्या पीठ ! हे कृष्णक्रीड़ा वर को देने वाले ! हे तीन लोक में मनोहर क्षेत्र ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ९ बार प्रणाम करें तो समस्त कामनाओं को प्राप्त होकर चिरजीवी होता है । भाद्र शुक्ला नवमी तिथि में यहाँ बनयात्रा करें तो क्रमण के समय एक एक चरण का क्षेपण में धनवान् पुत्रवान् होता है ॥ ८३ ॥

श्री कृष्ण ने १५ दिन की अवस्था में बालघाती तृणावर्त्त को यहाँ आकाश से गिराकर मारा था इसलिये तृणावर्त नाशक नाम से यहाँ कुण्ड उत्पन्न हुआ । स्नानाचमन प्रार्थनामन्त्र—हे वासुदेव के

जगाम गोकुलं रम्यं कुर्वन्मुद्रितलोचनान् । कृष्णं नीत्वा भुवो लोकादगच्छन्नभसः पथा ॥
ज्ञात्वा हरिस्तृणावर्त्तमसुरं बालघातिनं । यत्रैव स्वपतद्भूमौ जघान पदमुष्टिना ॥
तृणावर्त्तो लभेन्मोक्षं देवर्यानिसमाकुलः । यतो कुण्डं समुद्भूतं तृणावर्तविनाशकं ॥
ततस्तृणावर्तनाशककुण्डस्नानाचमनप्रार्थनमन्त्रः—
वासुदेवप्रसादेन मुक्तरूप नमोस्तु ते । तीर्थराज नमस्तुभ्यं नेत्ररोगभयापह ॥
इति मन्त्रं समुच्चार्य षड्भिर्मज्जनमाचरेत् । दिव्यदृष्टिं समालभ्य विष्णुलोकमवाप्नुयात् ॥
यत्रैव नेत्रपीड़ार्तो पुष्यान्धो तारकान्वितः ! स्नानाचमनमस्कारैर्दिव्यदृष्टिमवाप्नुयात् ॥ ८४ ॥
विष्णुयामले—यत्रैव सखिभिः सार्द्धं रामकृष्णौ बलोद्धतौ । मल्लमल्लाख्यतीर्थाख्यं संजातं पृथिवीतले ॥
यत्रैव देवताः सर्वे नमस्कारं शतं चरेत् । असुरघ्नं बलं लब्ध्वा सर्वकामानवाप्नुयुः ॥
कृशांगो दुर्बलो दुःखी कृष्णतुल्यपराक्रमः ॥ ८५ ॥
ततो देवाः समाजग्मुः शरीरारोग हेतवे । समस्तव्रजरक्षार्थं गोपेश्वरसदाशिवं ॥
स्थापयेयुः सुखार्थाय सर्वकल्याणहेतवे । त्रयस्त्रिंशनमस्कारान् करोति मनसा धिया ।
चिरजीवी भवेल्लोको गोपेश्वरप्रसादतः ॥८६॥
भविष्ये—भ्रूणहत्यादिपापानां कृमीकीटविधायिनां । विनाशाय समाचक्रुस्तप्तसामुद्रकूपकं ॥
यादवाः देवताः सर्वे वातशीतादिशान्तये । शतावृत्याकरोत्स्नानं विमुक्तो जायते नरः ॥
तप्तसामुद्रिके कूपे कुर्यात्स्नानं विधानतः । गोदानपञ्चकं दद्यात्कांचनं पञ्चप्रस्थकं ॥
वस्त्रं पञ्च सितं रक्तं हरितं पीतधूम्रकं । रुक्मादि पञ्च पात्राणि पञ्चमुद्रायुतानि च ॥
सर्वैस्तु कल्मषैर्मुक्तो परिवारैः सुखं व्रजेत् ॥ ८७ ॥

---

प्रसाद से मुक्तरूप ! हे नेत्ररोग नाशकारी तीर्थराज ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ६ बार मज्जन, आचमन करने से दिव्य दृष्टि पाकर विष्णुलोक को जाता है। यहाँ अन्धा, काणा, नेत्र रोग से पीड़ित व्यक्ति, स्नानादि करने से दिव्य दृष्टि को प्राप्त होता है ॥ ८४ ॥

विष्णुयामल में—यहाँ सखाओं के साथ कृष्ण, बलदेव ने बल से उद्धत होकर विविध क्रीड़ा किये थे। यहाँ मल्लामल्ल नामक तीर्थ की उत्पत्ति हुई। यहाँ देवतागण नित्य शतवार नमस्कार करते हैं और असुर नाशकारी बलदेव को पाकर समस्त कामनाओं को प्राप्त होते हैं। यहाँ कृशांग, दुर्बल, दुःखी व्यक्ति कृष्ण के तुल्य पराक्रमी हो जाते हैं ॥ ८५ ॥

अनन्तर देवतागण ने आकर शरीर के आरोग्य के लिये तथा समस्त व्रज की रक्षा के लिये गोपेश्वर महादेव जी का स्थापन किया जो समस्त सुख कल्याण के लिये है। जो मन बुद्धि से ३३ बार नमस्कार करें वह गोपेश्वर जी के प्रसाद से चिरञ्जीवी होता है ॥ ८६ ॥

भविष्य में कहा है—भ्रूणहत्यादि पाप, कृमी कीडा सम्बन्धी पापों के नाश के लिये यादवगण तथा देवतागण कर्तृक तप्त सामुद्रिक कूप उत्पन्न हुआ था। जो शीत, वातादिक शान्ति के लिये है। यहाँ १०० बार स्नान करने से मनुष्य अवश्य विमुक्त हो जाता है। तप्तसामुद्रिक कूप में विधि पूर्वक स्नान कर पाँच गौदान, ५ प्रस्थ सुवर्ण का दान, सफेद, रक्त, हरा, पीला, धूमाट रंग के पाँच वस्त्रों का दान, सुवर्ण, चाँदी प्रभृति पाँच प्रकार के पात्र का दान, ५ अयुत मुद्रा का दान करने से समस्त परिवारों के साथ कल्मषों से मुक्त होकर सुखी होता है ॥ ८७॥

पञ्चकागतमृत्युश्च यथापूर्वविधायकः । तथैव निर्मलत्वाय पूर्वशान्तिविधायकः ॥
प्राणे च विद्यमाने तु जीवन् कंठनिरोधके ।

अथ पञ्चकागतमृत्यौ प्राणेविद्यमाने पूर्वमेव प्रायश्चित्तः । कुलार्णवे—

धनिष्ठादिकनक्षत्रेस्वागतेषु च पञ्चसु । मृत्यौ कण्ठागते काले विद्यमाने तु जीवके ॥
पूर्वमेव विधानेन प्रायश्चित्तं समाचरेत् ।

अमृतादिशुभेष्वेव घटिकादिष्वहर्निशं । नक्षत्रपञ्चकेष्वेव पञ्चविंशगुणं फलं ॥
पञ्चवासरकेष्वेव त्वथवापञ्चमासिके । अथवा पञ्चवर्षेषु तादृशं फलमीरयेत् ॥
पंचकेष्वादिकेष्वेव पञ्चविंशगुणं फलं । विंशं द्वितीयके जातं तिथिगुण्यं तृतीयके ॥
दशश्चतुर्थके जाते पंचके पंचकं गुणं । तुर्येषु चरणेष्वेव भिन्नभिन्नफलं स्मृतं ॥
बालस्तरुणवृद्धेषु मृयंते तत्स्वरूपिणः । सपाद षट् हनन् जीवान् धनिष्ठातुर्यपादकः ॥
सार्धद्वादशजीवांश्च धनिष्ठागतृतीयकं । एकोनविंशकं हन्यात् वासवद्वितीयाह्निकः ॥
प्रथमे पंचविंशाश्च जीवान्हन्यात्कुलोद्भवान् । स्वकुलेऽथवा मातुः प्रोहिते कन्यकाकुले ॥
प्रियेषु हन्यते जीवान् समीपस्थान्पुरादिषु ।

यतिनिर्बन्धे-जीवन् पूर्वकृताशान्तिमृतदोषो न विद्यते । दानं पंचविधं प्रोक्तं पंचनक्षत्रदारुणे ॥

तत्रादौ धनिष्ठाशान्तिः महार्णवे—

स्वेतगोदानपंचैव सितवस्त्रं च पंचकं । कांस्यपात्रं च पंचैव चतुःप्रस्थप्रमाणतः ॥
पात्रेषु संलिखेन्मन्त्रं चन्दनेन विधानतः ।

मन्त्रः—वासवाय नमस्तुभ्यं शान्तिं यच्छ शुभां मृतौ । कुटुम्बसकलेष्वेव दानेन सह रम्यतां ॥ इति मंत्रः—
पञ्चधा लिखयेन्मन्त्रं समुद्रां दानमाचरेत् । धनिष्ठाऋक्प्रपाठेभ्यो विप्रेभ्यो पंचसंख्यया ॥
कुटुम्बेषु मनुष्यास्तु भवन्ति परमायुषः । इति विद्यमाने जीवे धनिष्ठाशान्तिः ॥

अथ सतभिषाशान्तिः—

उशक्रयामले—रक्तगोदानपंचैव पञ्चपात्रं च ताम्रकं । रक्तवस्त्रं च पंचैव विप्रेभ्यो दानमाचरेत् ॥
मन्त्रं संलिख्य पात्रेषु चन्दनेन नियोजयेत् ।

मन्त्रः—वरुणाय नमस्तुभ्यं कुरु मे शान्तिं मानवीं । सकलारिष्टनाशाय कुटुम्बपरमायुषे ॥ इतिमं०—
शतभिष्सूक्तपाठेभ्यो द्विजेभ्यो दानमाचरेत् । सर्वकुटुम्बलोकेषु परमायुः स जीवति ॥
इति विद्यमाने जीवे शतभिषाशान्तिः ।

अथ रोगग्रस्ते पूर्वमेव पूर्वभाद्रपदशान्तिः । देवीपुराणे—

स्वेतगां हरितशृङ्गां हरिद्रवस्त्रसमन्वितां । त्रिविधं च कृतंपात्रं सप्तप्रस्थप्रमाणतः ॥
मन्त्रं त्रिषु लिखेद्धीमान् कुंकुमेन विधानतः ।

---

अनन्तर पञ्चकागत मृत्यु में प्राण रहने का पहिले ही यहाँ प्रायश्चितादि करें ।ग्रन्थकार सम्पूर्ण विधि शास्त्रों से उठाते हैं, पंचम अध्याय शेष पर्य्यन्त । ग्रन्थ बढ़ जाने के कारण हम यहाँ अनुवाद नहीं रखते हैं । पाठकगण उद्धृत शास्त्र वचनों को देख लेवें ।

मन्त्रः—अजपाद महाभाग नमोस्तु पृथिवीपते । शान्तिं प्रयच्छ मे देव कौटुम्बपरमायुषीं ॥ इतिमन्त्रः—
पूर्वभाद्रपदस्यापि अष्टवर्गं द्विजातयः । तेभ्यो दानं समर्प्पन्ति शान्तिमाप्नोति कौशलां ॥
इति पूर्वभाद्रपदशान्तिः ॥

अथोत्तराभाद्रपदपूर्वशान्तिः दिवोदासनिबन्धे—
पीतगां पीतवस्त्रञ्च पीतपात्राणि कारयेत् । तन्दुलं परिपूर्णानि समुद्गाणि निधारयेत् ॥
तेषु मन्त्रं लिखेत्तत्र नवप्रस्थकृतेषु च ।
मन्त्रः—अहिर्बुध्न्य नमस्तुभ्यं पित्तालस्थ वरप्रद । कुटुम्बपरिवारेषु शान्तिं यच्छ नमोस्तु ते ॥ इतिमन्त्रः—
कुंकुमेन समभ्यर्च्य विप्रेभ्यो दानमाचरेत् । पंचके मृतकस्यापि जीवदोषो न विद्यते ॥
इति जीवविद्यमाने चतुर्थपञ्चकोत्तराभाद्रपदपूर्वशान्तिः ।

अथ पंचम पंचकरेवतीशान्तिः । प्रतापमार्तण्डे—
रुक्मस्य पंचपात्राणि प्रस्थमात्रं चकार ह । धूम्रवर्णमयींधेनु पंचमुद्रासमन्वितां ॥
धूम्रवर्णानि वस्त्राणि विद्यमाने कलेवरे । पात्रेषु नारिकेराणि धारयेन्मन्त्रमुच्चरेत् ॥
मन्त्रः—पूषणे भगवन्तुभ्यं नमस्ते पंचकान्तिक । कुटुम्बपरिवाराय मानुषीं शान्तिमाचर ॥ इतिमं० ॥
विप्रेभ्यो विधिवद्दद्यात् महशान्तिमवाप्नुयात् ।
इति रोगग्रस्ते धनिष्ठादिपंचकागतमृत्यौ पूर्वशान्तिः ।
ब्राह्मे—रोगग्रस्तो यदालोको योगस्त्रैपुष्करागतः । तदादौ क्रियते शान्तिर्विद्यमाने सजीवके ॥
दोषत्रिगुणशान्ताय प्रायश्चित्तं समाचरेत् । यथैव पंचके त्याज्यमशुभं कर्मसंज्ञकं ॥
त्रैपुष्करेऽशुभे योगे श्राद्धादीनि विसर्जयेत् । दशगात्रविना श्राद्धं पक्षदोषो न विद्यते ॥
दशगात्रविशुद्धेन पक्षदोषोऽभिजायते । वृद्धौ शुभेऽत्र मांगल्ये योगस्त्रैपुष्करोशुभः ॥
त्रिगुणं फलदः प्रोक्तो नराणां शुभकर्मणि ॥

त्रैपुष्करयोगोत्पत्तिः । ज्योतिर्निबन्धे—
भद्रातिथिः शनिकुजार्कदिनेषु वह्नि द्वीशार्य मोत्तरपदपुनर्वैश्वदेवः ।
त्रैपुष्करो भवति यत्त्रिगुणप्रदोयं योगो मृतौ त्याज्यभवो हि मानवैः ॥
शनौ कुजे रवेर्वारे धनिष्ठा मृगतक्षके । द्विगुणफलदो योगो ऽशुभे कर्माणि वर्जयेत् ॥
द्वौ योगौ च परित्याज्यावशुभे कर्म संज्ञके । रोगग्रस्ते शरीरे तु प्राणो कंठगतस्तदा ॥
विद्यमाने तदा जीवे पूर्वशान्तिं समाचरेत् । नैव कृत्वा मृतात्पूर्वं प्रायश्चित्तं त्रिपुष्करे ॥
अशुभं त्रिगुणं कुर्य्यान्मृतश्राद्धादिकर्मणि ॥ इतिनिषेधः ॥

अथ मृत्यावागते काले विद्यमाने जीवे पूर्वमेवशान्तिः । शांत्यर्णवे—
गोदानत्रयं कृत्वा पीतरक्तसितासितं । एवं वर्णत्रयेणैव त्रीणि वस्त्रानि कारयेत् ।
कांस्यपित्तलिताम्राणां त्रीणि पात्राणि संचरेत् । प्रस्थत्रयप्रमाणेन त्रैपुष्करप्रशांतये ॥
तेषु मन्त्रं लिखेद्धीमान्सद्रव्यं पूर्णतण्डुलं ॥
मन्त्रः—ब्रह्मविष्णुमहेशेभ्यो नमस्ते त्रिगुणप्रद ! । त्रैपुष्करमयोगास्यं निवारय प्रसीद मे ॥ इतिमन्त्रः ॥
द्विजेभ्यस्तत्तयेभ्यस्तु विधिपूर्वं समापयेत् । कौटुम्बपरिवारेषु परमायुः फलं लभेत् ॥
त्रैपुष्करस्य योगस्य जीविते शांतिमाचरेत् । मृतदोषो न विद्येत परमायुषजीविनः ॥
इति विद्यमानजीवे मृत्या आगते काले त्रैपुष्करयोगशान्तिः ॥

अथ द्विगुणकृतयोगशांतिर्मृत्यावागतसमये जीवविद्यमाने—

पाद्मे—वर्णद्वयं च गोदानं स्वेतरक्तं मनोहरं । तथैव पित्तलिकांस्यपात्रौ द्वौ प्रस्थपंचकं ॥
वस्त्रौ द्वौ सितरक्तौ च द्विगुणस्य प्रशांतये । विप्राभ्यां विधिवद्दद्यात्सद्द्रव्यं रुक्ममुद्रकं ॥
नारिकेरयुतं कृत्वा तन्दुलेन प्रपूरितम् । तयोस्तु मन्त्रमालेख्य चंदनेन विचर्चयेत् ॥
द्विगुणं फलदो योगो विफलो जायते ध्रुवम् । मृतकर्मणि संत्याज्यमशुभे द्विगुणाभिधं ॥
पूर्वशांतिं न कुर्वीत जीविते मृत्युमागतं । द्वयोस्तु जीवयोश्चैव मृत्युमाप्नोति कीलकीं ॥

मन्त्रः—त्वष्टेन्द्रसशिनस्तुभ्यं नमामि सकलेष्टदाः । प्रयच्छंतु शुभान्कामान् द्विगुणं मे निवारय ॥
इत्येते शुभदाः वृद्धौ मांगल्यदिशुभादिषु । अशुभादिषु कार्य्येषु ह्यशुभफलदाः स्मृताः ॥
इति रोगग्रस्ते कलेवरे जीवविद्यमाने द्विगुणयोगागते काले पूर्वमेव शान्तिः ॥

अथाश्विन्यादिसप्रविंशनक्षत्रेषु रोगशान्तिरभिधीयते—

अश्विन्यादिषु पीडा स्याज्ज्वरदाहो कलेवरे । तद्दोषशमनार्थाय ज्वरतापादिशांतये ॥
दानं कुर्य्याद्विधानेन रोगशांतस्तदा भवेत् ।

तत्रादौ अश्विन्यां रोगशांतये ऽश्विनीदानं ॥ आदित्यपुराणे—

सितमश्वं समादाय सुवर्णप्रतिमां रवेः । टंकप्रमाणतः कुर्य्यात्कांस्यपात्रे निधारयेत् ॥
घृतपूर्णे मुखं पश्येन्मन्त्रं द्वादशभिः पठेत् ।

मन्त्रः—भास्कराय नमस्तुभ्यं कौमाराय नमो नमः । अश्विनीसंभवां पीडां निवारय नवात्मकीं ॥
इति मन्त्रं त्रीभिरुक्त्वा दद्याद्दानं द्विजातये । ज्वरबाधाविनिर्मुक्तो स्नानमारोग्यमाप्नुयात् ॥
इत्यश्विन्यां रोगसंभवेऽश्विनीदानशान्तिः ॥

अथ भरण्यां रोगसंभवे भरणीदानशान्तिः । विष्णुधर्म्मोत्तरे—

द्विप्रस्थपरिमाणेन कांस्यपात्रं च कारयेत् । सार्द्धप्रस्थत्रयं नीत्वा तिलं श्यामांगनिर्मितं ॥
धर्मराजस्वरूपं च कृत्वा सौवर्णनिर्म्मितं । कर्षमात्रप्रमाणेन तिलपात्रे निवेशयेत् ॥
तिलपात्रे लिखेन्मन्त्रं कृष्णविप्राय दापयेत् ।

मन्त्रः—धर्मराज नमस्तुभ्यमेकादशदिनात्मकीं ॥ पीडां निवारय देव यमदोषसमुद्भवां ॥ इतिमंत्रः ॥
इति या कथिता शान्तिः भरण्याः नैरुजात्मकी । इति भरण्यां रोगसंभवे भरणीदानशांतिः ॥

अथ कृत्तिकायां रोगसंभवे कृत्तिकादानशान्तिः । अग्निपुराणे—

अग्निदोषसमुद्भूतो कृत्तिकासंभवो रुजः । तद्दोषशमनार्थाय दानमुत्तममीरितं ॥
कर्षमात्रसुवर्णेन वन्हेस्तु प्रतिमां करोत् । तण्डुलं पात्रमाध्याय प्रतिमां तत्र पूजयेत् ॥
मन्त्रं संलिख्य पात्रेऽस्मिन् दानं विप्राय दापयेत् ।

मन्त्रः—कृपीटाय नमस्तुभ्यं वाधां मे विनिवारय । नववासरसंभूतां वन्हिदोषसमुद्भवां ॥ इतिमन्त्रः ॥
इत्येना कथिता शान्तिः कृत्तिकायाः निरौजकी । आयुरारोग्यतां याति वन्हिदोषविवर्जितः ॥
इति कृत्तिकायां रोगसंभवे कृत्तिकादानशांतिः ।

अथ रोहिण्यां रोगसंभवे रोहिणीदानशान्तिः । ब्रह्माण्डे—

विप्रदोषाच्च रौहिण्यां ज्वरो भवति दारुणः । तद्दोषशमनार्थाय शान्तिदानं समाचरेत् ॥
पीतगां ब्रह्मणो मूर्त्तिं सुवर्णस्य चकारह । पीतपट्टस्य वस्त्रेण मन्त्रं संलेख्य छादयेत् ॥
टंकमात्रसुवर्णस्य प्रतिमा ब्रह्मणो शुभा ॥

मन्त्रः—पितामह नमस्तुभ्यं सप्तवासरसंभवां । निवारय महाभाग पीडामेऽतिज्वरोद्भवाम् ॥ इतिमंत्र—
ब्राह्मणाय ददौ दानं रोगनिर्मुक्ततां नयेत् ॥ इति रोहिणीदानशान्तिः ॥
मृगशीर्षे भवेद्रोगश्चन्द्रदोषसमुद्भवः । तज्ज्वरशमनार्थाय शान्तिदानं समाचरेत् ॥
कांस्यपात्रं समादाय प्रस्थद्वय प्रमाणकं । तन्मध्ये पायसं धृत्वा चन्द्रस्य प्रतिमां करोत् ॥
पंचकर्ष प्रमाणेन रुक्मेन शुभदायिनीं ॥

मन्त्रः—समुद्रतनय ! देव मासबाधां निवारय । रोहिणीपतये तुभ्यं द्विजरूपाय ते नमः ॥
इति मन्त्रं समुच्चार्य दशभिः प्रणतिश्चरेत् । ब्राह्मणाय ददौ दानं रोगनिर्मुक्ततां नयेत् ॥
इति मृगशीर्षशान्तिदानं । महार्णवे ॥

अथार्द्रायां रोगसम्भवे-आर्द्रादानशान्तिः । लगं—
आर्द्रायां जायते रोगो शिवदोषसमुद्भवः । तज्ज्वरशमनार्थाय दानशान्तिं चकार ह ॥
श्वेतवर्णं वृषं नीत्वा धूम्रवस्त्रेन छादितं । कर्षमात्रेण रुक्मेण शिवमूर्तिं प्रकल्पयेत् ॥

मन्त्रः—वृषारूढ़ नमस्तुभ्यं शूलिने वरदायिने । आर्द्रारोगनिवृत्ताय रुद्रबाधां निवारय ॥
इत्येकादशभिर्मन्त्रमुच्चरन्प्रणमेच्छिवम् । ददौ दानं च विप्राय रोगनिर्मुक्ततां व्रजेत् ॥
इति आर्द्रादानशान्तिः ।

स्कान्दे—पुनर्वसौ भवेद्रोगो देवदोषसमुद्भवः । तज्ज्वरशमनार्थाय दानशान्तिं च कारयेत् ॥
पलार्द्धपरिमाणेन सुवर्णप्रतिमां शुभां । स्वशरीरानुसारेण सूत्रेण परिवेष्टयेत् ॥
रक्तपट्टेन संछाद्य हस्ते नीत्वा नरः सुधीः ।

मन्त्रः—देवायादितये तुभ्यं नमामि कामरूपिणे । सप्तवासरजां बाधां निवारय नमोस्तु ते ॥
इति मन्त्रं समुच्चार्य सप्तभिः प्रणतिश्चरेत् । द्विजाय च ददौ दानं दक्षिणाभिमुखो भवन् ॥
पुनर्वसुकृता शांतिः रोगनिर्मुक्ततां व्रजेत् ॥ इति पुनर्वसुदानशांतिः ॥

हरिवंशे—पुष्यर्क्षे जायते रोगो गुरुब्राह्मणदोषतः । शान्तिदानं समाचक्रे ज्वरपीडादिशांतये ॥
बृहस्पतेः करोन्मूर्तिं कर्षमात्रसुवर्णतः । चणकद्विदलप्रस्थसप्तकं परिधाय च ॥
पीतवस्त्रे लिखेन्मंत्रं हरिद्राभिः सुधीर्नरः ।

मन्त्रः—बृहस्पते सुराचार्य नमस्ते पुष्यनायक ! । सप्तवासरजां बाधां निवराय सुदारुणां ॥ इतिमंत्रः—
सूत्रं शारीरमानेण पीतं तत्र निवेशयेत् । पश्चिमाभिमुखो भूत्वा दानं दद्याद्द्विजातये ॥
रोगनिर्मुक्ततां याति गुरुपुष्यस्य दानतः ॥ इति पुष्यदानशांतिः ॥

पाद्मे—अश्लेषायां भवेद्रोगो नागदोषसमुद्भवः । तद्दोषशमनार्थाय मृत्युरोगप्रशान्तये ॥
शेषस्य प्रतिमां कुर्यात् पलमात्रसुवर्णतः । द्वादशांगुलमानेन श्वेतवस्त्रेण छादयेत् ॥
शरीरसूत्रमानेन पुच्छं च परिवेष्टयेत् । प्रस्थत्रयप्रमाणेन तन्दुलं परिधाय च ॥
तन्मध्ये लेखयेन्मन्त्रं मुत्तराभिमुखो विशन् ।

मन्त्रः—पातालवासिने तुभ्यं मृत्युयोगादिशान्तये । नमोऽश्लेषापते देव शेषनाग प्रसीद मे ॥ इतिमंत्रः—
इत्येतत्क्रियते दानं ब्राह्मणाय तपस्विने । मृत्युयोगाद्विमुच्यते परमायुः सजीवति ॥
इति ऽश्लेषादानशान्तिः ।

गारुडे—मघायां जायते पीडा ज्वरदाहादिव्याकुला । विंशवासरजा पीडा पितृदोषसमुद्भवा ॥

तद्दोषविनिवृत्ताय पितृशान्तिं समाचरेत्। पलतुर्यप्रमाणेन स्वर्णमूर्तिं चकारह ॥
श्वेतवस्त्रे लिखेन्मन्त्रं छादयेदुत्तरे मुखः ।
मन्त्रः—विंशवासरजां पीडां निवारय गदाधर । पितृदेव नमस्तुभ्यं शरीरारोग्यतां कुरु ॥ इतिमन्त्रः—
मघानक्षत्ररोगस्य शान्तिदानं विधानतः । द्विजाय ऋग्प्रपाठाय वृद्धाय प्रणमन्ददौ ॥
इति मघादानशान्तिः ॥
वामनपुराणे—रोगः स्यात्पूर्वफाल्गुन्यां देवदोषसमुद्भवः । मृत्युयोगः समाख्यातस्तद्दोषशमनाय च ॥
शान्तिदानं समाचक्रे गोदानं दानमुत्तमं । रक्तवर्णमयीं धेनुं रक्तपट्टस्य वस्त्रकम् ॥
भगस्य प्रतिमां कुर्यात् सुवर्णपलमात्रतः । पट्टवस्त्रे लिखेन्मन्त्रं गोमूर्तिं परिछादययेत् ॥
मन्त्रः—भगाय च नमस्तुभ्यं मृत्यूद्भवकलेवर । मृत्युयोगभवां बाधां निवारयसि मे प्रभो ॥ इतिमं० ॥
उत्तराभिमुखं विप्रं कृत्वादानं प्रदापयेत् । मृत्युयोगाद्विमुच्येत परमायुर्भवेन्नरः ॥
इति पूर्वाफाल्गुनीदानशान्तिः ।
नृसिंहे—रोगो ह्युत्तरफाल्गुन्यां राक्षसीदोषसंभवः । सप्तवासरजापीडा ज्वरादिमहादारुणा ॥
तद्दोषशमनार्थाय शान्तिदानं समाचरेत्। दध्योदनं महाश्रेष्ठं बहुशर्करयान्वितं ॥
ब्राह्मणान्सप्तसंख्यकान् भोजनं कारयेत्बुधः । पत्रेऽश्वत्थस्य संलिख्य मंत्रमुत्तरफाल्गुनी ॥
दक्षिणस्यां च दिग्भागे तडागे प्रक्षिपेज्जले । दृष्ट्वा च रोगिणं यत्र शीघ्रज्वरप्रशान्तये ॥
मन्त्रः—भगदेवाय ते तुभ्यं नमस्ते जलशायिने । सप्तवासरजां पीडां निवारय प्रसीद मे ॥ इतिमं० ॥
रोगनिर्मुक्तां याति चिरजीवी भवेन्नरः । अल्पाद्विमुच्यते रोगी भगदेवप्रसादतः ॥
इत्युत्तरफाल्गुनीदानशान्तिः ।
भविष्योत्तरे—हस्तर्क्षे जायते रोगो रविदोषसमुद्भवः । पक्षवासरजा पीडा ज्वरदाहातिदारुणा ॥
तद्दोषशमनार्थाय शान्तिदानं समाचरेत्। पञ्चाब्दगजमादाय सूर्य्यमूर्तिविराजितं ॥
दशगुंजाप्रमाणेन सुवर्णप्रतिमा शुभा । माषतंदुलमादाय दक्षिणे च शुभेकरे ॥
मंत्रं त्रिभिः समुच्चार्य गजोपरिपरिक्षिपेत् ।
मंत्रः—नमस्तुभ्यं गजेन्द्राय द्विरदाय जयैषिणे । पक्षवासरजां पीडां निवारय प्रसीद मे ॥ इतिमं० ॥
कम्बलेन समाच्छाद्य दद्यादानं द्विजाय च । पूर्वाभिमुखमास्थाय नरो नैरुज्यतां व्रजेत् ॥
इति हस्तानक्षत्रदानशान्तिः ।
आदिपुराणे—चित्रायां जायते रोगो विप्रद्रोहसमुद्भवः । रुद्रवासरजा पीडा तद्दोषशमनाय च ॥
शान्तिदानं करोद्धीमान् रोगनिर्मुक्तां व्रजेत् । धूम्रवर्णं वृषं नीत्वा गोधूमं मणसंख्यकं ॥
ताम्रपात्रे निधायात्र रक्तवस्त्रेण छादयेत् । तद्वस्त्रे लिखते मन्त्रं नमस्कृत्य विधानतः ॥
मंन्त्रः—त्वाष्ट्रदेव नमस्तुभ्यं चित्रेशाय नमोस्तु ते । रुद्रवासरजं रोगं निवारय सदा प्रभो ॥
ब्राह्मणाय ददौ दानमीशानाभिमुखोभवन् । त्वाष्ट्रदानविधिप्रोक्तः नराणां रोगमुक्तये ॥
इति चित्राशान्तिदानं ।
वायुपुराणे—स्वात्यां संजायते पीडा वायुदोषसमुद्भवा । मृत्युरोगः समाख्यातस्तस्मिन् रोगी न जीवति ॥
सर्वौषधिकृतेवापि विना शान्त्या न जीवति । मृत्युयोगविनाशाय शान्तिदानं समाचरेत् ॥
सदाशिवम्प्रं नीत्वा सितश्याममहोज्वलं । शतप्रस्थप्रमाणेन तन्दुलं सितवर्णकं ॥
वृषपृष्ठे समाधाय धूम्रवस्त्रपरिवृतं । वायुकोणे समास्थाय व्यंजने मन्त्रमालिखेत् ॥

मन्त्रः—अञ्जनीपतये तुभ्यं वायवे स्वातिस्वामिने । मृत्युयोगभवां बाधां निवारय प्रसीद मे ॥ इतिमन्त्रः ॥
द्विजाय च ददौ दानं परमायुः सजीवति ॥ इति स्वातिनक्षत्रशान्तिदानं ॥

स्कान्दे—विशाखायां भवेद्रोगो देवाग्न्योः दोषसंभवः । तिथिवासरजा पीडा तद्दोषशमनाय च ॥
शक्राग्न्योःकारयेन्मूर्तिं कर्षमात्रसुवर्णजां । चतुः प्रस्थप्रमाणेन कांस्यपात्रं चकारह ॥
पंचप्रस्थप्रमाणेन तिलश्वेतं निधारयेत् । मन्त्रं तत्र लिखेद्धीमान् पीतरक्तेन वाससा ॥
पूर्वाभिमुखतोविश्य दद्याद्दानं द्विजातये ।

मन्त्रः—देवेन्द्राय नमस्तुभ्यं वह्नये ब्रह्मसाक्षिणे । पक्षवासरजां पीडां निवारय प्रसीद मे ॥ इतिमं० ॥
उर्द्धाधोमुखमास्थाय नमस्कारं द्वयं चरेत् । रोगी निर्मुक्ततां याति विशाखादानशान्तितः ॥
इति विशाखाशान्तिदानं ।

मात्स्ये—रोगः स्यादनुराधायां मित्रदेवस्य दोषतः । षष्ठिवासरजा बाधा तद्दोषशमनाय च ॥
कर्षार्द्धपरिमाणेन सौवर्णेन चकारह । विधिवन्मित्रदेवस्य रक्तवस्त्रेण छादितं ॥
प्रस्थत्रयप्रमाणेन ताम्रपात्रं चकारयेत् । रक्तं तत्र दधौ प्रस्थं लिखेन्मन्त्रं विधानतः ॥
उत्तराभिमुखोभूत्वा ब्राह्मणाय प्रदापयेत् ।

मंत्रः—मित्रदेव नमस्तुभ्यमनुराधापते नमः । निवारयसि मे बाधां षष्ठिवासरसंभवां ॥ इतिमं० ॥
कुर्याच्छान्तिं विधानेन रोगैर्विमुक्ततांनयेत् । इति अनुराधाशान्तिदानं ॥

शक्रयामले-ज्येष्ठायां संभवो रोगो मृत्युयोगसमागमे । न जीवति कदा रोगी तुर्यपादे यदा स्थिते ॥
तद्दोषशमनार्थाय शान्तिदानमुदाहृतं । कर्षमात्रसुवर्णं च पीतवस्त्रे निवेशयेत् ॥
तन्मध्ये लेखयेन्मंत्रं पूर्वाभिमुखतोविशत् ।

मंत्रः—शक्राय देवदेवाय नमस्तुभ्यं प्रसीद मे । मृत्युयोगभवां बाधां निवारय शचीपते ॥ इतिमं० ॥
इति गुप्तकृतं दानं रोगमृत्योर्विमोक्ष्यति । दीर्घायुर्जायते लोको दानशान्तिप्रभावतः ॥
इति ज्येष्ठाशान्तिदानं ।

आदिवाराहे-मूले संजायते रोगो ह्यनाचारसमुद्भवः । नववासरजा पीडा तद्दोषशमनाय च ॥
पलद्वयसुवर्णस्य नैऋतेः प्रतिमां करोत् । श्यामवस्त्रेण संछाद्य दक्षिणाभिमुखोविशन् ॥
प्रस्थद्वयघृतं नीत्वा लोहपात्रे निधाय च । नवभिरुच्चरन्मंत्रं मुखं तत्र विलोकयन् ॥

मंत्रः—नमस्ते दैत्यराजाय नैऋताय कृतार्थिने । नववासरजां पीडां निवारय च पृष्टिद ॥ इतिमं० ॥
दत्वा दानं च विप्राय रोगनिर्मुक्ततां नयेत् । इति मूलशान्तिदानं ॥

कौर्म्ये—पूर्वाषाढे भवेद्रोगो जलदोषसमुद्भवः । मृत्युयोगसमाख्यातस्तद्दोषविनिवृत्तये ॥
देवहस्तप्रमाणेन सितवस्त्रं समाददे । पश्चिमाभिमुखो भूत्वा तन्दुलं प्रस्थसप्तकं ॥
तत्रैव लिखयेन्मंत्रं जलमादौ प्रपूज्य च ।

मन्त्रः—नमः पावनरूपाय व्यापिने परमात्मने । मृत्यूद्भवमहाबाधां निवारय च केशव ॥ इतिमं० ॥
ब्राह्मणाय ददौ दानं मृत्युबाधाद्विमुच्यते । मृत्युयोगकृताद्दानात् परमायुः सजीवति ॥
इति पूर्वाषाढादानशान्तिः ।

विष्णुपुराणे—रोगः स्यादुत्तराषाढे श्राद्धलोपसमुद्भवः । मासपीडा ज्वरोद्भूता तद्दोषशमनाय च ॥
पलद्वयप्रमाणेन सुवर्णप्रतिमांकरोत् । विश्वेषां देवयोश्चैव श्वेतवस्त्रपरिवृतः ॥
दशप्रस्थानुसारेण सिततन्दुलमुत्क्षिपेत् । लिखेन्मन्त्रं च तत्रैव पश्चिमाभिमुखेविशन् ॥

मन्त्रः—नमो विश्वप्रबोधाय विश्वदेव नमोस्तु ते । मासोद्भवमहापीडां निवारय सनातन ॥
ब्राह्मणाय ददौ दानं रोगनिर्मुक्ततां व्रजेत् । इति उत्तराषाढा शान्तिदानं ॥
वामनपुराणे—श्रवणर्क्षे भवेद्रोगो मातृपित्रोस्तु दोषजः । शिववासरजा पीडा ज्वरातीसारसंभवा ॥
तद्दोषशमनार्थाय शान्तिदानं समाचरेत् । नैमंत्र्य ब्राह्मणं श्रेष्ठं सितवस्त्रं मनोहरं ॥
हस्तपंचाशमानेन मन्त्रं तत्र लिखेद्बुधः । सिततन्दुलपूर्णं च घटं मृन्मयमुत्तमं ॥
दश पुंगीफलं मध्ये दशमुद्रासमाकुलं । पूर्वाभिमुखमाविश्य चन्दनेन समर्चयेत् ॥
मन्त्रः—विष्णवे श्रवणेशाय गोविन्दाय नमो नमः । रुद्रवासरजां पीडां विनाशय महोत्कटां ॥इतिमं०॥
इति शान्त्या ददौ दानं ब्राह्मणाय विशेषतः । रोगनिर्मुक्ततां याति परमायुः सजीवति ॥
इति श्रवणा शान्तिदानं ॥
भविष्ये—रोगःस्याच्च धनिष्ठायामपमानसमुद्भवः । पक्षवासरजा पीडा तद्दोषशमनाय च ॥
प्रस्थत्रयप्रमाणेन कांस्यपात्रं चकारयेत् । विलिप्य चन्दनेनैव शुष्कं कुर्याद्विधानतः ॥
तन्मध्ये मन्त्रमालेख्य सुवर्णस्य शलाकया । पञ्चप्रस्थप्रमाणेन तन्दुलं तत्र प्रक्षिपेत् ॥
हरिद्वस्त्रेण संछाद्य पश्चिमाभिमुखोभवन् । रुक्ममुद्राद्वयं धृत्वा दानं दद्याद्द्विजातये ॥
मन्त्रः—वसवे देवदेवाय धनिष्ठेशाय ते नमः । पक्षवासरसंभूतां निवारय च सुप्रद ॥ इतिमन्त्रः ॥
शान्त्यादानकृतेनापि रोगनिर्मुक्ततां व्रजेत् । इति धनिष्ठाशान्तिदानं ॥
लैंगे—शतभिषदुष्टनक्षत्रे रोगः स्याज्जलदोषतः । रुद्रवासरजा पीडा तद्दोषशमनाय च ॥
पितल्याः पंचप्रस्थेन घटं कृत्वा मनोहरं । प्रस्थत्रयं घृतं नीत्वा कर्षस्वर्णं तु प्रक्षिपेत् ॥
समन्ताच्चन्दनेनैव लेपयेन्लुष्कमाचरेत् । तत्रैव लेखयेन्मन्त्रं सितवस्त्रेण छादयेत् ॥
मन्त्रः—वरुणाय नमस्तुभ्यं देवाय वरदायिने । रुद्रवासरजां पीडां निवारय कलाधर ! ॥ इतिमं० ॥
उत्तराभिमुखो भूत्वा दानं दद्याद्द्विजातये । नैरोग्यतां व्रजेद्रोगी परमायुः सजीवति ॥
इति शतभिषादानशान्तिः ॥
मार्कण्डेये—पूर्वाभाद्रपदे रोगो जायते जीवघाततः । मृत्युरोगसमाख्यातस्तद्दोषशमनाय च ॥
लोहपात्रं समानीय नवप्रस्थप्रमाणतः । सप्तप्रस्थतिलं नीत्वा श्यामवर्णं शवोपमं ॥
कृष्णवर्णामजां नीत्वा सितवस्त्रेण छादयेत् । ग्राह्यं प्रस्थद्वयं तैलं तस्मिन् दृष्ट्वा मुखं शुभम् ॥
तत्रैव सप्तभिर्मंत्रं पठित्वा माषमुत्क्षिपेत् । उत्तराभिमुखो भूत्वा दानं दद्याद्द्विजातये ॥
मन्त्रः—अजपाद नमस्तुभ्यं मृत्युबाधापपोहक । मृत्युयोगभवां बाधां निवारय प्रसीद मे ॥ इतिमं० ॥
मृत्युयोगभवाद्रोगान्मुच्यते नात्र संशयः । इतिपूर्वाभाद्रपदशान्तिदानं ॥
वायुपुराणे—रोगःस्यादुत्तराभाद्रे देवदोषसमुद्भवः । सप्तवासरजा पीडा तद्दोषशमनाय च ॥
नीत्वा कर्षसुवर्णं तु ताम्रपात्रं च प्रस्थकं । चणकद्विदलं प्रस्थं पीतवस्त्रेण वेष्टितं ॥
रुक्ममुद्राद्वयं न्यस्य पश्चिमाभिमुखो भवन् । पीतवस्त्रे लिखेन्मन्त्रं सप्तभिःप्रणतिञ्चरेत् ॥
मन्त्रः—अहिर्बुध्न्य नमस्तुभ्यं रुद्रदेव नमोस्तु ते । सप्तवासरजां पीडां निवारय प्रसीद मे ॥
ब्राह्मणाय ददौ दानं रोगनिर्मुक्ततां व्रजेत् ॥ इति उत्तराभाद्रपदशान्तिदानं ।
ब्रह्मयामले-रेवत्यां जायते रोगो पर्वदोषसमुद्भवः । षष्ठिवासरजा पीडा तद्दोषशमनाय च ॥
रक्तवर्णमयीं धेनुं पीतवस्त्रेण छादितां । कांस्यपात्रं शुभं कार्यं पञ्चप्रस्थप्रमाणकं ॥
कर्षमात्रसुवर्णस्य पूषणोर्मूर्तिमाचरेत् । पात्रस्य च समन्ताच्च चन्दनेन लिखेद्बुधः ॥

मन्त्रः—पूषणे रेवतीशाय देवदेवाय ते नमः । षष्टिवासरजां पीडां शीघ्रमेव निवारय ॥ इति मन्त्रः ॥
उत्तराभिमुखो भूत्वा दद्यादानं द्विजातये । रोगनिर्मुक्ततां याति परमायुः सजीवति ॥
नक्षत्रसप्तविंशत्या रोगेषु शान्तिमाचरेत् । दानं दद्याद्विधानेन रोगनिर्मुक्ततां ययौ ॥
ऋक्षेषु वर्तमानेषु नित्यदानं चकारह । कदा रोगं न पश्येत निरोगी सर्वदा भवेत् ॥
आयुरारोग्यतां याति कुटुम्बसौख्यमाप्नुयात् ।
इति सप्तविंशत्याश्विन्यादिनक्षत्ररोगसंभवेषु सप्तविंशतिनक्षत्रशान्तिदानविधिः ।
इति श्रीमद्भास्करात्मज श्रीनारायणभट्ट गोस्वामीविरचिते पञ्चमगोप्यग्रन्थे
व्रजभक्तिविलासे परमहंससंहितोदाहरणे पञ्चमोऽध्यायः ॥५॥

## ॥ षष्ठो ऽध्यायः ॥

व्रजस्य शुभमर्यादा कृष्णलीलाविनिर्मिता । यादवानाञ्च गोपानां रम्यभूमिमनोहरा ॥
रत्नगर्भा पयपूर्णा मणिकाञ्चनभूषिता । मधुरामण्डलमध्ये प्रमाणकृतशोभिता ॥
चतुरशीति क्रोशाढ्यां चतुर्दिक्षु विराजिता । मथुरामण्डलात्क्रोशमेकविंशतिकं भजेत् ॥
चतुर्दिक्षु प्रमाणेन पूर्वादिक्रमतोगणात् । पूर्वभागे स्थितं कोणं बनं हास्याभिधानकं ॥
भागे च दक्षिणे कोणं शुभं जन्हुवनं स्थितं । भागे च पश्चिमे कोणे पर्वताख्यबनं स्थितं ॥
भागे तु उत्तरकोणस्थं सूर्यपतनसंज्ञकं । इत्येता व्रजमर्यादा चतुष्कोणाभिधायिनी ॥
चतुरस्रं व्रजं ब्रूयुर्देवतास्ते शिवादयः । मण्डलाकारमीक्षन्ति मुनयो नारदादयः ॥
शृंगाराकारकं ब्रूयुः ऋषयः सनकादयः । नैरंतर्य्यमुपास्यन्ते देवर्षिमुनयस्तथा ॥
इति व्रजमण्डलमर्यादा ब्रह्माण्डे भूमिखण्डे ॥१॥ तत्रादौ यमुनादक्षिणतटस्थकाम्यबनोत्पत्तिनिरूपणं—
आदिवाराहे—यत्रैव देवतानाञ्च कामनासिद्धितां व्रजेत् । ऋषीणाञ्च मुनीनाञ्च मनुजानां तपस्विनां ॥
कामनासिद्धितामेति यतो काम्यबनं भवेत् । भाद्रमासि सितेपक्षे प्रतिपद्दिनसंभवे ॥

---

व्रज की शुभ मर्य्यादा श्रीकृष्ण की लीला से निर्मित है जो यादवों तथा गोपों की मनोहर विहार भूमि द्वारा सुशोभित तथा जो रत्नगर्भ स्वरूपा है और विमल अमृत निन्दि जल से व्याप्त और मणि, काञ्चन प्रभृति विविध रत्नों से भूषित है। यह मर्य्यादा मथुरामण्डल के बीच प्रमाण सिद्ध रूप से सुशोभित है। ८४ क्रोश जिसका परिमाण है। ८४ क्रोश व्रजमण्डल-पूर्व, दक्षिण, पश्चिम, उत्तर दिशा के कोण के विचार से चार भाग हैं। प्रत्येक का २१ क्रोश परिमाण है। पूर्व भाग का कोण हास्यबन, दक्षिण भाग का कोण जन्हुवन, पश्चिम भाग का कोण पर्वतबन, उत्तर भाग का कोण सूर्य्यपतन बन है। यह चारकोण की व्रजमर्य्यादा हैं। शिवादिक देवतागण चार कोण के व्रजमण्डल कहते हैं। नारदादि मुनिगण इसे मण्डलाकार रूप से देखते हैं। सनकादि ऋषिगण शृंगार आकार कहते हैं। इस व्रजमण्डल की उपासना मुनि ऋषिगण नित्य करते हैं। यह व्रजमण्डल की मर्य्यादा ( सीमा ) वर्णन हुई है। ब्रह्माण्ड के भूमिखण्ड में ॥ १ ॥

पहले यमुना के दक्षिण तट स्थित काम्यबन का चिन्ह और उत्पत्ति का वर्णन करते हैं। आदिवाराह में—जहाँ देवताओं, ऋषियों, मुनियों, मनुष्यों, तपस्वियों की कामना सिद्धि होती है इसलिये इसका नाम काम्यबन है। भाद्रमास की शुक्लपक्षीया प्रतिपद तिथि में पूर्वा फाल्गुनि नक्षत्र और बुधवार के दिन

पूर्वाफाल्गुणि संयुक्ते भृगुवारसमन्विते । बनयात्राप्रसंगाय प्रापुः काम्यबनं शुभं ॥
सर्वार्थकामसिद्ध्यर्थं देवांगमनुजादयः ।

अथ काम्यबनप्रार्थनमन्त्रः—

नमस्ते भगवद्रूप कामनासिद्धिदायिने । बनयात्राप्रसंगेन प्रसीद परमेश्वर ! ॥
इतिमन्त्रं समुच्चार्य ह्यष्टषष्टिशतोत्तरैः । नमस्कारान्करोद्धीमान् रात्रौ वासं चकारह ॥

प्रवासनिषेधः पाद्मे—

नैव प्रतिपदारात्रौ प्रवासं यत्र कारयेत् । तस्यैव बनयात्रायाः परिपूर्णं प्रदक्षिणा ॥
नैव सांगं समायाति न फलत्वं प्रजायते । प्रवासान्मानसीसिद्धिर्जायते नात्र संशयः ॥ २ ॥
भाद्रशुक्लद्वितीयायामुत्तराशनिसंयुते । प्रभातसमये धीमान् सिंहलग्नोदये यदा ॥
विमलस्नानमाचक्रुर्देवता मनुजादयः । विमलाख्यं महाकुण्डं शुभं काम्यबनेऽभवत् ॥

ततो विमलकुण्डस्नानाचमनप्रार्थनमन्त्रः । बृहद्गौतमीये—

वैमल्यरूपिणे तुभ्यं नमस्ते जलशायिने । केशवाय नमस्तुभ्यं तीर्थराज नमोऽस्तु ते ॥
इति मन्त्रमुदाहृत्य सप्तभिर्मज्जनाचमैः । विमलांगो भवनलोको देवयोनिसमो नरः ॥
गोपिकाः स्नानमाचक्रुः पूर्णकामाभिलाषिण्यः । यतस्तु गोपिकाकुण्डं संजातं पृथिवीतले ॥
सुवर्णसोपानपरम्परायुतं पयः पूर्णं । रमणीभिसुशोभितं सरोरुहाकीर्णं वरं ॥
मनोहरांगं समस्तकामर्थदं शुभप्रदं ॥ ३ ॥

ततो गोपिकाकुण्डस्नानाचमनप्रार्थनमन्त्रः । नारदीये—

नमस्ते गोपिकानाथ नमः सर्वार्थदायिने । नमः कृतार्थरूपाय गोपिकासरसे नमः ॥
नमस्कारं चकारात्र स्वर्णदानं समाचरेत् । धनधान्यसुखादींश्च लभतेऽस्य प्रभावतः ॥४॥

---

बनयात्रा प्रसंग पूर्वक देवता, मनुष्यगण काम्यबन को प्राप्त हुए । काम्यबन प्रार्थनामन्त्र यथा—हे भगवत् स्वरूप ! हे कामना सिद्धि को देने वाले काम्यबन ! आपको नमस्कार । बनयात्रा प्रसंग में आप प्रसन्न हों। इस मन्त्र के पाठ पूर्वक १६८ बार नमस्कार पूर्वक रात्रि में वास करे । यदि प्रतिपदा रात्रि में यहाँ वास न करें तब बनयात्रा की सम्पूर्ण परिक्रमा निष्फल हो जाती है। रात्रि से वास करने से मन की सिद्धि होती है ॥ २ ॥

भाद्र शुक्ला द्वितीया में उत्तरानक्षत्र संयोग हो और प्रभात काल में जिस समय सिंह लग्न का उदय हो उस समय देवतागण मानवगणों ने यहाँ विमल स्नान किया है, इसलिये काम्यबन में विमल नामक महाकुण्ड उत्पन्न हुआ है। विमलकुण्ड स्नानाचमन प्रार्थनामन्त्र—बृहद्गौतमीय में—हे विशुद्ध रूप ! हे जलशायि केशव ! आपको नमस्कार । हे तीर्थराज ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ७ बार मज्जन, आचमन करें तो मनुष्य शुद्ध शरीर होकर देवतायोनि को प्राप्त होता है ॥ ३ ॥

गोपिकागणों की पूर्ण काम की इच्छा से स्नान करने के कारण यह पृथ्वी में प्रसिद्ध गोपीका-कुण्ड उत्पन्न हुआ है । जिसकी सुवर्ण की सिढ़ियाँ है जो अयुत रमणी से और मनोहर नील कमल-द्वारा परिशोभित हैं जो समस्त काम, अर्थ, शुभ को देने वाला है। स्नानाचमन प्रार्थनामन्त्र—नारदीय में—हे गोपिकानाथ ! हे समस्त अर्थ देने वाले ! हे कृतार्थरूप ! हे गोपिका सरोवर ! आपको नमस्कार । इस मंत्र

यत्र शक्रादयो देवाः श्राद्धं चक्रुर्गयासमं । तेषाञ्च पितरोऽत्रैव हस्तं पिण्डं समाददुः ॥
गयाकुण्डाभिधानेदं विख्यातं वनभूमिषु । दुग्धेन परिपूर्णन्तु पितृदेवादिसंकुलं ॥
ततो गयाकुण्डस्नानाचमनप्रार्थनमन्त्रः । भविष्ये—
तारणे दिव्यतोयाढ्य देवदेवांगसंभव ! । नमस्ते तीर्थराजाय फल्गुतीर्थसमाह्वय ! ॥
इतिमन्त्रं समुच्चार्य नवभिर्मज्जनाचमैः । नमस्कारं विधायैव परं मोक्षपदं लभेत् ॥
गयाकुण्डे कृतं श्राद्धं निःप्रेतत्वमवाप्नुयात् ॥ ५ ॥
धर्मं यत्राकरोद्राजा धर्मपुत्रो युधिष्ठिरः । धर्मकुण्डं समाख्यातं शुभे काम्यवनेभवत् ॥
धर्मोह्यक्षयतां याति सहस्रगुणितं फलम् ।
ततो धर्मकुण्डस्नानाचमनप्रार्थनमन्त्रः । विष्णुधर्मोत्तरे—
धर्माय धर्मरूपाय निर्मले सत्यरूपिणे । नमस्ते परमोक्षाय पुण्यतीर्थं नमोस्तु ते ॥
इति पञ्चदशावृत्या मन्त्रमुच्चार्य स्नापयेत् ॥ ६ ॥
तीर्थानां च सहस्राणामागमोयत्र संभवः । यतस्तीर्थसरोरम्यं सहस्राख्यं मनोहरं ॥
ततो सहस्रसरः तीर्थस्नानाचमनप्रार्थनमन्त्रः । ब्रह्माण्डे—
सहस्रगुणपुण्याय पावनाय महात्मने । नमो सहस्रतीर्थाय नैर्मल्यवररूपिणे ॥
इत्येकादशभिर्मंत्रं मज्जनाचमनैर्नमन् । कृतार्थफलतां याति नरो मोक्षफलं लभेत् ॥७॥
ततो धर्मराजसिंहासनावलोकनप्रार्थनमन्त्रः । आग्नेये—
धर्मराज नमस्तुभ्यं धर्मसिंहासनाय च । नमः कैवल्यनाथाय सत्यरूप नमोस्तु ते ॥

---

के तीन बार पाठ पूर्वक स्नान, आचमन, नमस्कार करें । यहाँ सुवर्ण का दान करने से धन, धान्य, सुखादिक लाभ होता है ॥ ४ ॥

अनन्तर गयाकुण्ड है । यहाँ इन्द्रादि देवतागणों ने गया के तुल्य श्राद्ध किया है । देवताओं पितरगणों के हाथ उठाकर श्राद्ध पिण्ड को ग्रहण करने का कारण यह गयाकुण्ड नाम से विख्यात हुआ है, जो दुग्ध से परिपूर्ण है । स्नानाचमन प्रार्थनामन्त्र-भविष्य में—हे उद्धार करने में समर्थ ! हे दिव्य जल से परिपूर्ण ! हे देवतागण कर्तृक उत्पन्न ! हे फल्गुतीर्थ करके विख्यात गयाकुण्ड तीर्थ ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ९ बार मज्जन, आचमन, नमस्कार करने से परम मोक्षपद को प्राप्त होता है । गयाकुण्ड में स्नान करने से प्रेतयोनि छूट जाती है ॥ ५ ॥

धर्म्मपुत्र युधिष्ठिर महाराज ने यहाँ धर्म्म किया था वही यह धर्म्मकुंड है । यहाँ धर्म्म करने से अक्षयगुणा फल होता है । धर्म्मकुंड स्नानाचमन प्रार्थनामन्त्र—विष्णुधर्म्मोत्तर में—हे धर्म्म ! हे धर्म्म-रूप ! हे निर्म्मल ! हे सत्यरूपि ! हे पुण्यतीर्थ ! हे परम मोक्ष के लिये धर्म्मकुंड आपको नमस्कार । इस मन्त्र के १५ बार पाठ पूर्वक स्नान करे ॥ ६ ॥

हजारों तीर्थ का जहाँ आगमन हुआ है यह वही सहस्रतीर्थ सरोवर है । स्नान प्रार्थनामन्त्र यथा—ब्रह्माण्ड में—हे सहस्रगुण पुण्यरूप ! हे पावन स्वरूप ! हे महात्मा सहस्रतीर्थ सरोवर ! आपको नमस्कार है । आप निर्म्मल वर को देने वाले हैं । इस मन्त्र के ११ बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करे तो मनुष्य कृतार्थ होकर मोक्षपद को प्राप्त होता है ॥ ७ ॥

अनन्तर धर्म्मराज सिंहासन अवलोकन प्रार्थनामन्त्र—आग्नेय में— हे धर्म्मराज ! तुमको

इति मन्त्रं शतावृत्या नमस्कारं शतं चरेत् । शतधाकृतपापानि क्षीयन्ते यत्र दर्शनात् ॥८॥
मात्स्ये—राजा युधिष्ठिरो यत्र पञ्चयज्ञं चकारह । यज्ञकुण्डो स्थितो यत्र पञ्चयज्ञफलप्रदः ॥
ततो यज्ञकुंडप्रदक्षिणाप्रार्थनमन्त्रः—
पाण्डवसुकृतार्थाय पंचयज्ञाभिधायिने । नमो ब्रह्मण्यदेवाय यज्ञकुंड नमोस्तु ते ॥
इत्यष्टभिः समुच्चार्य प्रणामंश्चप्रदक्षिणां । कृतार्थफलतां याति प्रदक्षिणप्रभावतः ॥ ९ ॥
महाभारते—यज्ञान्ते पांडवाः श्रेष्ठाः स्नानं चक्रुर्विधानतः । युधिष्ठिरादिपञ्चानां पञ्चतीर्थ सरांसि च॥
ततो पञ्चसरस्नानाचमनप्रार्थनमन्त्रः—
धर्मरूप नमस्तुभ्यं वायुपुत्र नमोस्तु ते । शक्रात्मज नमस्तुभ्यमश्विन्यास्तनयौ नमः ॥
इति मन्त्रं समुच्चार्य पञ्चभिर्मज्जनाचमैः । कृतार्थफलमाप्नोति मानवाः विष्णुरूपिणः ॥१०॥
यत्रैव मुक्तिमाप्नोति नन्दगोपादयो मताः । कुंडं मोक्षाभिधं जातं कामसेनिविनिर्मितं ॥
ततो परमोक्षकुंडस्नानाचमनप्रार्थनमन्त्रः । शौनकीये—
मोक्षाय मुक्तिरूपाय मुक्तितीर्थ नमोस्तु ते । नमः कैवल्यनाथाय सर्वदा मोक्षदायिने ।
इति मन्त्रं दशावृत्या मज्जनाचमनैं र्नमन् । परं मोक्षपदं लेभे धनधान्यादिभिर्युतः ॥११॥
ततो मणिकर्णिकाकुंडस्नानाचमनप्रार्थनमन्त्रः । वामनपुराणे—
नमस्त्रिभुवनेशाय व्यापिने परमात्मने । तीर्थराज नमस्तुभ्यं मणिकर्णि नमोस्तु ते ॥
इतिमन्त्रं त्रिभिरुक्त्वा मज्जनाचमनैं र्नमन् । सर्वविद्याभिसंपन्नो लक्ष्मीवानपिजायते ॥१२॥

---

नमस्कार । हे धर्म सिंहासन ! हे कैवल्य नायक ! हे सत्यस्वरूप ! आपको नमस्कार । इस मन्त्र के १०० बार पाठ पूर्वक नमस्कार करे । इसके दर्शन से शत-शत प्रकार के पाप समूह नष्ट हो जाते हैं ॥८॥

मात्स्य में-राजा युधिष्ठिर ने यहाँ पञ्च यज्ञ किये हैं । वहाँ यज्ञकुंड है जो पञ्च यज्ञ के फल को देने वाले हैं । यज्ञकुंड प्रदक्षिणा प्रार्थनामन्त्र-हे पञ्चयज्ञ नामक तीर्थ ! हे पाण्डवों को कृतार्थ करने वाले ! हे यज्ञकुंड ! ब्रह्मण्यदेव आपको नमस्कार । इस मन्त्र के आठ बार पाठ पूर्वक प्रणाम और प्रदक्षिणा करें तो प्रदक्षिणा के प्रभाव से कृतार्थ हो फल को प्राप्त होता है ॥ ९ ॥

महाभारत में—यज्ञ के अन्त में पाण्डवों ने विधि पूर्वक स्नान किया । पाँच पाण्डव के नाम से पाँच सरोवर तीर्थ उत्पन्न हुए हैं । पाँच सरोवर स्नानाचमन प्रार्थनामन्त्र-हे धर्मरूप ! आपको नमस्कार । हे वायुपुत्र ! आपको नमस्कार । हे इन्द्रपुत्र ! आपको नमस्कार । हे अश्विनी के दोनों पुत्र ! आप दोनों को नमस्कार । इस मन्त्र के पाठ पूर्वक पाँच बार मज्जन, आचमन करे तो मनुष्य कृतार्थ फल को प्राप्त होकर विष्णुरूप हो जाता है ॥ १० ॥

जहाँ नन्दादिक गोपगण मुक्ति को प्राप्त हुए थे यह कामसेनि निर्मित परमोक्ष नामक कुंड है । स्नानाचमन प्रार्थनमन्त्र शौनकीय में—हे मुक्तिरूप मोक्षकुंड आपको नमस्कार ! आप कैवल्य नायक हैं और सर्वदा मोक्ष को देने वाले हैं । इस प्रकार मन्त्र के १० बार पाठ पूर्वक मज्जन, आचमन, स्नान, नमस्कार करें तो धन, धान्य से युक्त होकर परम मोक्ष को प्राप्त होता है ॥११॥

अनन्तर मणिकर्णिकाकुंडस्नानाचमनप्रार्थनमन्त्र—वामनपुराण में—हे त्रिभुवनईश ! हे व्यापक ! हे परमात्मा ! हे मणिकर्णिका नामक तीर्थराज ! आपको नमस्कार । इस मन्त्र के तीन बार पाठ

सर्वे देवाः निवासं च यत्र चक्रुर्मनोरथैः । यतो निवासकुंडाख्यं शुभे काम्यवनेऽभवत् ॥
ततो निवासकुंडस्नानाचमनप्रार्थनमन्त्रः—

निवसाख्य महातीर्थे सर्वदा सुखदायिने । नमस्ते कल्मषघ्नाय वासुदेवकृताय च ॥
षड्भिर्मन्त्रं समुच्चार्य मज्जनाचमनै र्नमन् । सर्वदा सौख्यमाप्नोति धनधान्यादिभिर्युतः ॥
नित्यमेव करोत्स्नानं यशोदा कामसेनिजा । यशोदाकुंडमाख्यातं त्रिकोणाकारनिर्मितं ॥

ततो यशोदाकुंडस्नानाचमनप्रार्थनमन्त्रः—

कामसेनिसुते तुभ्यं नमामि विमलात्मके । तीर्थरूपे नमस्तुभ्यं सर्वदा पुत्रवत्सले ॥
इति मन्त्रं समुच्चार्य सप्तभिर्मज्जनाचमैः । बहुभिः परिवारैस्तु सर्वदासौख्यमाप्नुयात् ॥१४॥

ततो देवकीकुंडस्नानाचमनप्रार्थनमन्त्रः । गौडनिबन्धे—

कृतार्थरूपिणे तुभ्यं तीर्थराज नमोस्तु ते । तपस्विमुनिवेष्टाय देवकीस्नान संज्ञिके ॥
दशभिरुच्चरेन्मन्त्रं मज्जनाचमनैर्नमन् ॥ १५ ॥

ततो मनोकामनाकुंडस्नानाचमनप्रार्थनमन्त्रः । धौम्यसंहितायां—

मनोर्थद नमस्तुभ्यं कामनावरदायिने । तीर्थराज नमस्तुभ्यं सकलेष्टवरप्रद ॥
नवभिरुच्चरेन्मन्त्रं मज्जनाचमनैर्नमन् । मनसाचिन्तते कामान् प्राप्नुयान्नात्र संशयः ॥१६॥

ततो समुद्रसेतुबंधकुंडस्नानाचमनप्रार्थनमन्त्रः—

देवानां सिद्धिरूपाय सेतुबन्ध नमोस्तु ते । नमस्ते सकलेष्टाय तीर्थराज नमोस्तु ते ॥

---

पूर्वक मज्जन, आचमन, स्नान,नमस्कार करने से समस्त विद्या से सम्पन्न होकर लक्ष्मीवान् होजाता है ॥१२॥

समस्त देवतागणों ने मनोरथ पूर्वक जहाँ निवास किया है वहाँ निवासकुंड है । स्नानाचमन प्रार्थनामन्त्र—हे निवास नामक महातीर्थ ! हे सर्वदा सुख को देने वाले ! हे कल्मष नाशकारी ! हे वासुदेव कर्तृक निर्म्मित ! आपको नमस्कार । इस मंत्र के ६ बार पाठ पूर्वक मज्जन, आचमन, स्नान करने से मनुष्य धन, धान्य से परिपूर्ण होकर सर्वदा सुखी होता है ॥ १३ ॥

कामसेनी पुत्री यशोदा वहाँ नित्य स्नान करती थी, यह यशोदाकुंड है जो त्रिकोण आकार से निर्म्मित है । स्नानाचमन प्रार्थनामन्त्र यथा— हे कामसेनि सुता ! विमल आत्मा स्वरूप आपको नमस्कार । हे तीर्थरूप ! हे पुत्र वत्सला ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ७ बार मज्जन, आचमन, स्नान करने से वह परिवार युक्त होकर सर्वदा सुखी होता है ॥ १४ ॥

अनन्तर देवकीकुंड है । स्नानाचमनप्रार्थनमन्त्र यथा—गौड़निबन्ध में—हे कृतार्थरूपि ! हे तीर्थराज ! आपको नमस्कार । हे तपस्वी, मुनि वेष्टित देवकीकुंड ! आप देवकी के स्नान के कारण उत्पन्न हैं । इस मंत्र के १० बार पाठ पूर्वक मज्जन, आचमन, स्नान करे ॥ १५ ॥

अनन्तर मनःकामनाकुंड है । स्नानाचमनप्रार्थनामन्त्र यथा—धौम्यसंहिता में—हे मन अर्थ को देने वाले मनोकामनाकुंड ! कामना वर देने वाले आपको नमस्कार ! हे तीर्थराज ! समस्त इष्ट वर देने वाले आपको नमस्कार । इस मन्त्र के ९ बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करे तो कामनाओं का समूह चिन्ता मात्र ही प्राप्त होता है इसमें कोई सन्देह नहीं है ॥ १६ ॥

अनन्तर समुद्रसेतुबन्धकुंड है । स्नान, आचमन प्रार्थनामन्त्र यथा—हे सेतुबन्ध ! देवताओं के सिद्धि

इतिमन्त्रं समुच्चार्य द्वादशैर्मज्जनाचमैः । सर्वबाधाविनिर्मुक्तो सर्वदाविजयी भवेत् ॥ १७ ॥

ततो ध्यानकुण्डस्नानाचमनप्रार्थनमन्त्रः । ध्रुवसंहितायां—

चतुर्भुज नमस्तुभ्यं विष्णवे दिव्यरूपिणे । तीर्थराज नमस्तुभ्यं दिव्यदृष्ट्याभिधायिने ॥

इतिमन्त्रं चतुर्भिस्तु मज्जनाचमनैर्नमन् । दिव्यदृष्टिं समालभ्य वैष्णवं पदमीक्षते ॥ १८ ॥

ततस्तप्तकुण्डस्नानाचमनप्रार्थनमन्त्रः—

सर्वतापविनाशाय मनस्तापनिवारक । समस्तकल्मषघ्नाय तप्तकुण्ड नमोस्तु ते ॥

इति मन्त्रं त्रिधावृत्या मज्जनाचमनैर्नमन् । मनमस्तापनिःशान्तिमाप्नुयान्नात्र संशयः ॥१९॥

ततो जलविहारकुण्डस्नानाचमनप्रार्थनमन्त्रः । ब्रह्मयामले—

शक्राप्सरविहाराय तीर्थराज नमोऽस्तु ते । कल्लोलविमलाङ्गाय सर्वदेष्टवरप्रद ॥

इतिमन्त्रं दशावृत्या मज्जनाचमनैर्नमन् । वैहारसुखसम्पत्तिमाप्नुयात्मानवः सदा ॥ २० ॥

ततो जलक्रीड़ाकुण्डस्नानाचमनप्रार्थनमन्त्रः—

जलक्रीडाविहाराय वैमल्यजलसंभव । गोपालकृतवेषाय कृष्णाय सततं नमः ॥

इति मन्त्रमुदाहृत्य सप्तभिर्मज्जनाचमैः । लभेच्छीतलतां लोको नेत्रसौख्यमनोरथैः ॥ २१ ॥

ततो रंगीलकुण्डस्नानाचमनप्रार्थनमंत्रः—

नानावर्णसुभाङ्गाय पीतरक्तजलात्मक । सदानन्दस्वरूपाय दिव्यकान्ते नमोस्तु ते ॥

एकोनविंशदावृत्या मज्जनाचमनै र्नमन् । नानावर्णैस्तु वस्त्रैस्तु भूषितो सौख्यमाप्नुयात् ॥२२॥

---

रूप आपको नमस्कार है। आप समस्त इष्ट देने वाले हैं आप तीर्थों के राजा हैं। इस मन्त्र के पाठ पूर्वक १२ बार मज्जन, आचमन, स्नान करने से सर्वदा विनिर्मुक्त होकर विजयी होता है ॥ १७ ॥

अनन्तर ध्यानकुण्ड है। स्नान, आचमन, प्रार्थनामन्त्र यथा ध्रुवसंहिता में—हे चतुर्भुज ! आप को नमस्कार। हे विष्णु ! दिव्यरूप आपको नमस्कार। हे तीर्थराज ! दिव्य दृष्टि से दर्शनीय आपको नमस्कार। इस मन्त्र के ४ बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करें तो वह दिव्य दृष्टि को प्राप्त होकर वैकुण्ठ पद को गमन करता है ॥ १८ ॥

अनन्तर तप्तकुण्ड है स्नानाचमनप्रार्थनामन्त्र यथा—हे तप्तकुण्ड ! समस्त पाप के नाशकारी, मन के ताप निवारक और समस्त कल्मष ध्वंसकारी आपको नमस्कार। इस मन्त्र के तीन बार पाठ पूर्वक मज्जन, आचमन, स्नान करने से मन के ताप की शान्ति हो जाती है, इसमें कोई सन्देह नहीं है ॥१९॥

अब जलविहारकुंड के स्नानाचमन प्रार्थनामन्त्र कहते हैं। ब्रह्मयामल में—हे इन्द्र अप्सरों के विहार के लिये तीर्थराज जलविहारकुण्ड ! आप सर्वदा इष्ट वर देने वाले हैं और विशुद्ध तरंगों से युक्त हैं। इस मन्त्र के १४ बार पाठ कर स्नानादि करने से विहार सुख सम्पत्ति प्राप्त होता है ॥ २० ॥

अनन्तर जलक्रीड़ा कुंड है। स्नानाचमन प्रार्थनामन्त्र यथा—हे विमल जलसे उत्पन्न जल क्रीड़ा कुण्ड ! आप जलक्रीड़ा विहार के लिये हैं। हे गोपाल कर्तृक रचितवेष श्रीकृष्ण ! आपको निरन्तर नमस्कार। इस मन्त्र के पाठ पूर्वक ७ बार मज्जन, आचमन करे तो मनुष्य शीतल स्वभाव को प्राप्त करता है और उसके नेत्र आरोग्य रहते हैं ॥ २१ ॥

अनन्तर रंगीलकुण्ड स्नानाचमनप्रार्थनामन्त्र—हे पीले रक्त जलात्मक रंगीलकुण्ड ! आपको नमस्कार। आप का अंग नाना वर्णमय सुन्दर है। आपकी कान्ति दिव्य है। आप सर्वदा आनन्द रूप

ततो छवीलाख्यकुण्डस्नानाचमनप्रार्थनमन्त्रः । कौर्म्ये—

नमः कान्तिमते तुभ्यं छवीलाख्यसरोवरे । तीर्थनैर्मल्यतोयाढ्ये वेपनैर्मल्यदायके ॥
इतिमन्त्रं समुच्चार्य पञ्चभिर्मज्जनाचमैः । अतिरूपवतीं कान्तिं लभते नात्र संशयः ॥ २३ ॥

ततो जकीलकुंडस्नानाचमनप्रार्थनमन्त्रः । माधवीये—

जकीलाख्यमहातीर्थं परमोत्साहदायक । नमस्ते जडतां देव दुर्बुद्धिं विनिवारय ॥
इतिमन्त्रं त्रिधाकृत्वा मज्जनाचमनैर्नमन् । नश्येज्जकीलतां तस्य सौन्दर्यपदवीं लभेत् ॥२४॥

ततो मतीलकुंडस्नानाचमनप्रार्थनमन्त्रः । गौरीरहस्ये—

नमो मतीलतीर्थाय नानावैचित्रबुद्धिद । शुभेष्ट वरदो देव तीर्थराज नमोस्तु ते ॥
इति मन्त्रं समुच्चार्य सप्तभिर्मज्जनाचमैः । धनधान्यसमायुक्तो सदा धर्मरतो भवेत् ॥२५॥

ततो दतीलकुंडस्नानाचमनप्रार्थनमन्त्रः—

मन्दहास्य महातीर्थं सर्वसौख्यप्रदायक ! । दुर्बुद्धिकलहच्छेद तीर्थराज नमोस्तु ते ॥
इति द्वादशभिर्मन्त्रमुच्चारन्मज्जनाचमैः । सर्वदानन्दरूपेण रमते पृथिवीतले ॥ २६ ॥

ततो घोषराणीकुंडस्नानाचमनप्रार्थनमन्त्रः । नारदीये—

सुघोषण महाप्राज्ञ तीर्थराज नमोस्तु ते । कटुवाक्यविनाशाय दिव्यघोष नमस्तु ते ॥
इतिमन्त्रं समुच्चार्य षड्भिराचम्य प्रार्थनैः । दुर्वचो सुवचो जातः सुशीलः जायते नरः ॥ २७ ॥

---

हैं । इस मन्त्र के १६ बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करें तो अनेक प्रकार वस्त्रों से भूषित होकर सुखी होता है ॥ २२ ॥

अनन्तर छवीलकुंड है । स्नान, आचमन, प्रार्थनामन्त्र यथा— कौर्म्ये में—हे छवील नामक सरोवर ! कान्तिवान आपको नमस्कार । हे तीर्थ ! निर्म्मल जल से युक्त आपको नमस्कार । इस मन्त्र के पाठ पूर्वक पाँच बार मज्जन, आचमन करें तो अत्यन्त रूपवती कान्ति को प्राप्त होता है इसमें कोई सन्देह नहीं है ॥ २३ ॥

अनन्तर जकीलकुंड है । स्नानाचमनप्रार्थनामन्त्र यथा माधवीय में—हे जकील नामक महा-तीर्थ ! परम उत्साह देने वाले आपको नमस्कार । हे देव ! आप जड़ता और मन्द बुद्धि का निवारण करने वाले हैं । इस मन्त्र के तीन बार पाठ पूर्वक स्नान, आचमन, नमस्कार करें तो उसके शरीर से जकीलता नाश होकर सुन्दरता आती है ॥ २४ ॥

अनन्तर मतीलकुंड है । स्नानाचमन प्रार्थनमन्त्र यथा-गौरीरहस्य में—नाना प्रकार विचित्र बुद्धि देने वाले मतीलकुंड ! आपको नमस्कार । आप तीर्थराज हैं शुभ इष्ट वर को देने वाले हैं । इस मन्त्र के पाठ पूर्वक ७ बार मज्जन, आचमन स्नान करें तो धन धान्य से युक्त होकर सर्वदा धर्म्म परायण होता है ॥ २५ ॥

अनन्तर दतीलकुंड है । स्नानाचमन प्रार्थनमन्त्र यथा—हे मन्दहास्य महातीर्थ ! हे समस्त सौख्य दाता ! हे दुर्बुद्धि कलह नाशकारी दतील नामक तीर्थराज ! आपको नमस्कार । इस मन्त्र के १२ बार पाठ पूर्वक स्नान, आचमन, नमस्कार करे तो सर्वदा आनन्दित होकर पृथ्वी में विचरण करता है ॥२६॥

अनन्तर घोषराणी कुंड है । स्नानाचमनप्रार्थनामन्त्र यथा-नारदीय में—हे सुघोषण महा बुद्धिमान ! हे तीर्थराज ! आपको नमस्कार । हे दिव्यघोष ! आप कड़वी बात विनाश के लिये हैं । इस

ततो विह्वलकुण्डस्नानाचमनप्रार्थनमन्त्रः । गौतमीये—

नमो गोपालगोपेभ्यो विह्वलेभ्यो स्वरूपिणः । भगवत्प्रेमपूर्णेभ्यो सर्वदावरदायिनः ॥
इति मन्त्रं समुच्चार्य नवभिर्मज्जनाचमैः । हरिदर्शनमाप्नोति तीर्थराजप्रभावतः ॥ २८ ॥

ततो श्यामकुण्डस्नानाचमनप्रार्थनमन्त्रः । ब्रह्मवैवर्ते—

सगोपालाय कृष्णाय यशोदानन्दनाय च । नमस्ते कमलाकान्त गोपिकारमणाय च ॥
इति मन्त्रं समुच्चार्य दशधामज्जनाचमैः । प्रणमेद्भ्रूणहत्यादिपापेभ्यो मुच्यते नरः ॥
श्यामकुण्डापमानेन भ्रूणहत्यादिकं फलं । लभते निष्फला यात्रा भ्रमते व्यर्थभूतले ॥२६॥

भ्रूण प्रमाणं धर्मप्रदीपे—

एक मासं चतुर्थांशं द्विमासं ह्यर्द्ध संज्ञकं । त्रिभिर्मासैस्त्रयोभागं तुर्यमासैः प्रपूरणं ॥
एतद्भ्रूणमितिख्यातं तदूर्ध्वंगर्भसंज्ञकं । व्यभिचारसमुद्भूतं नरनारी निवर्तयेत् ॥
नैवमुक्तो ऽपराधात्तु प्रायश्चित्तं विनाधमः । गुप्तहत्या न मुञ्चति विना पंचाद्व्रतेन च ॥
वर्षत्रयं च तुर्य्यांशे षड्वर्षैस्तु ततोऽर्द्धके । नववर्षं त्रियादाढ्ये द्वादशे परिपूर्णके ॥
गृहं ग्रामं न पश्यन्ति तीर्थपट्कं समाचरेत् । गंगा गोदावरी वेत्रा सिन्धुश्चैव तु नर्मदा ॥
गोमतीषु च पट्केषु षड्भिर्मासैः प्रवासयेत् । मन्त्रं तुर्य्यांशभ्रूणस्यापराधस्य विमुक्तये ॥

चतुर्थांशभ्रूणप्रायश्चित्तमन्त्रः । विष्णुस्मृतौ—

ओं ह्रीं केशवाय नमस्तुभ्यं सर्वकल्मषमोक्षणे । भ्रूण तुर्य्यापराधं मे निवारय प्रसीद मे ॥

अस्य मन्त्रस्य देवल ऋषिः केशवो देवता पंक्ति छन्दः मम चतुर्थभ्रूणापराधशान्त्यर्थे जपे विनियोगः, देवल ऋषये सिरसे स्वाहा मुखे पंक्ती छन्दसे नमः, हृदये केशवाय देवतायै नमः ।
अथध्यानं—भ्रूणदोषहरं देवं पीताम्बरधरं हरिम् । कृपामयं कलाकांतं केशवं चिन्तयाम्यहम् ॥
इतिध्यात्वा—द्विसहस्रजपं कृत्वा केशवाय समर्पयेत् । उत्तराभिमुखो भूत्वा जपेन्मन्त्रं समासतः ॥
ह्रीमितिर्बीजाक्षरमन्त्रेण षडंगन्यासं—

द्विसहस्रमिदं मन्त्रं प्रतिवासरमाचरेत् । एकस्मिन् तीर्थराजेऽस्मिन् षण्मासांश्च व्यतीयते ॥

---

मन्त्र के पाठ पूर्वक ६ बार आचमन करने से बुरा बोलने वाला अच्छा बोलता है और मनुष्य सुशील होता है ॥ २७ ॥

अनन्तर विह्वलकुण्ड है । स्नान, आचमन प्रार्थनामन्त्र यथा—गौतमीय में—हे गोपालक गोपगण ! विह्वल स्वरूप आप सबको नमस्कार । आप सब भगवान्‌के प्रेमसे परिपूर्ण हैं और सर्वदा वर को देने वाले हैं । इस मन्त्र के पाठ पूर्वक ६ बार मज्जन, आचमन, स्नान करने से तीर्थराज के प्रभाव से हरिदर्शन होता है ॥ २८ ॥

अनन्तर श्यामकुण्ड है । स्नानप्रार्थनादिमन्त्र यथा—ब्रह्मवैवर्त्त में—हे गोपाल के साथ श्रीकृष्ण यशोदानन्दन आपको नमस्कार । हे कमलाकान्त ! हे गोपीरमण ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक १० बार मज्जन, स्नान, आचमन, प्रणाम करने से भ्रूणहत्यादि पापों से मुक्त होता है । श्यामकुण्ड को नहीं मानने से यात्रा निष्फल होती है भ्रूणहत्यादि पापोंका फल प्राप्त होकर व्यर्थ पृथ्वीमें घूमताहै॥२६॥

अनन्तर भ्रूणहत्यादि पापों का वर्णन करते हैं अध्याय शेष यावत्—

ततस्तु सप्तमे मासि गंगां हित्वा नदीं ययौ । गोदावरीमुपाश्रित्य मन्त्रमेनं समाचरेत् ॥
मातुः शतगुणं पापं पितुस्तद्द्विगुणं भवेत् । तद्दशांशं भवेत्पापं वचनाद्भ्रंशकस्य च ॥
एवं तीर्थं करोत् षट्कं त्रिवर्षं च व्यतीयते । भ्रूणहा गोमतीं लब्धा गुप्तदानं समाचरेत् ॥
भ्रूणापराधशांताय गुप्तदानविधीरिता । प्रस्थत्रयं सुवर्णस्य कुष्मांडं तु चकार ह ॥
तन्मध्ये पंचरत्नानि रक्तवस्त्रेण छादयेत् । दत्वा विप्राय यत्नेन चौरभावं समाचरेत् ॥
अंतर्ध्यानगतंमार्गं भ्रूणहत्या विमुच्यति । प्रायश्चित्तं न कुर्व्वीत पुत्रशोकधनक्षयः ॥
शरीरविघ्नतां याति दुःखरोगदरिद्रता । लोकानां श्रवणात्पापं तुर्य्यांशं च विलीयते ॥
लोकेभ्यस्तु समाछाद्य समूलं च विनाशयेत् । विप्रो नैवाभिजानाति गुप्तदानं कृतं यदा ॥
दानं कदाचिज्ज्ञानाति तद्दानं निष्फलं भवेत् । प्रतीपं दोषमाप्नोति पुनस्तीर्थान्समाचरेत् ॥
तदा सांगं भवेद्यात्रा भ्रूणहत्या व्यपोहति । तदा ग्रामं गृहं वापि धनधान्यादिभिः सुखं ॥
एकग्रामे पुरेवापि ह्येकावासे गृहेऽपि वा । दशांशं लभते पापं दर्शनाद्वचनादपि ॥
स्पर्शनाच्चैव तुर्यांशं लभते पापसंभवं । प्रभातसमये तस्य भ्रूणघ्नो मुखमीक्षते ॥
तद्दिनं वर्द्धितं पापं तद्दशांशं लभेन्नरः । मृगचर्म्मोपरि स्थित्वा चतुर्मन्त्रान् जपेत्सुधीः ॥
चतुः प्राकारकं भ्रूणं चतुः प्राकारका विधिः । चतुर्गुणं कृतं दानं चतर्गुण्यं च तीर्थकं ॥
चतुर्गुणं जपेन्मन्त्रं भ्रूणहत्या व्यपोहति । द्विगुणं द्वितीये भ्रूणे त्रिगुणे च तृतीयके ॥
चतुर्गुणं चतुर्थेऽस्मिन् भ्रूणमेतदुदाहृतम् ॥

धर्म्मकल्पद्रुमे—हविष्यान्नं संभुंजीयाच्चान्द्रायणव्रतं चरेत् । ब्रह्मचर्य्यसमायुक्तो प्रायश्चित्तमुदाहृतम् ॥
दानं प्राकट्यहीनेन गुप्तं पापापहारकं । एवं चतुः प्रकारेण गर्भहत्या ह्युदाहृता ॥
मासपंचममारभ्य दशमाससमुद्भवं । सार्द्धपञ्चममासेन गर्भभागं चतुष्टयं ॥
षड्भिर्मासचतुर्भार्गैर्गर्भभागं चतुर्विधं । भ्रूणे दानमितिख्यातं गर्भे तद्द्विगुणं स्मृतं ॥
प्रायश्चित्तं विधानेन गर्भहत्या व्यपोहति ॥

अथार्द्धं भ्रूणप्रायश्चित्तमन्त्रः सन्मोहनतन्त्रे—

ओं ग्लौं नमो नारायणायैव भ्रूणार्द्धकल्मषापह । नमस्ते कमलाकान्त मम हत्यां व्यपोहतु ॥
इति नारायणमन्त्रमर्द्धभ्रूणाघशांतये । षट्सु तीर्थेषु कर्त्तव्यमीशानाभिमुखो भवन् ॥
"अस्य नारायणमन्त्रस्य शंभु ऋषि नारायणो देवता, गायत्री छन्दः, ममार्द्धभ्रूणघ्नपापपरिहारार्थे गंगातीर्थे द्विसहस्रमिदं जपमहं करिष्ये" इति संकल्प्य शिरसि शंभु ऋषये नमः मुखे गायत्र्यै छन्दसे नमः हृदये नारायणाय देवतायै नमः इति न्यासः ग्लौमित्येकवीजाक्षरमन्त्रेण षडंगन्यासं कुर्य्यात् ॥ अथध्यानं—
कलामयं कान्तवपुर्दधानं नारायणं शंखगदाधरं हरिं । भ्रूणाघ्नदोषाय विमुक्तिहेतुं सर्व्वार्थकामःपरिचिन्तयामि॥
इति नारायणस्वरूपं ध्यात्वा—
इत्यर्द्धभ्रूणदोषस्य शान्तये च कृतं जपं । नारायणाय निक्षिप्तं गुह्यमन्त्रं प्रकाशितं ॥
इत्यर्द्धभ्रूणापराधप्रायश्चित्तमन्त्रः—

अथ त्रिभागभ्रूणापराधप्रायश्चित्ताय माधवमन्त्रः । बृहत्पाराशरे—

ओं ह्रीं नमस्ते माधवायैव मधुदैत्यविमुक्तिद । भ्रूणत्रिमासपापौघशांतये कमलापते ॥
इति माधवमन्त्रं तु पादोनभ्रूणशान्तये ॥

अस्य मन्त्रस्य कुशसृषिर्माधवो देवता अष्टी छन्दः मम त्रिभागभ्रूणापराधशान्त्यर्थे माधवमन्त्र जपे विनियोगः शिरसि कुशसृष्ये नमः मुखे माधवाय देवतायै नमः हृदये अष्टी छन्दसे नमः इतिन्यासः । अथध्यानं—वन्दे माधवमीश्वरं गुणनिधिं भ्रूणघ्नपापापहं । श्रीवत्सांकमुदारकौस्तुभधरं पीताम्बरालंकृतं ॥ सर्वापद्विनिवारणशुभप्रदं कामाग्निसन्दीपनं । नानादोषविनाशनं करतले चक्रादिभिः शोभितम् ॥

इति माधवस्वरूपं ध्यात्वा—

द्विसहस्रमिदं जप्त्वा भ्रूणहत्याविमुक्तये । दक्षिणाभिमुखो भूत्वा माधवाय समर्पयेत् ॥

इतित्रिभागभ्रूणापराधशांतये माधवमन्त्रः ॥

अथ चतुर्थपरिपूर्णभ्रूणापराधनिवृत्यर्थं हृषीकेशमन्त्रः । कश्यपसंहितायां—

ओं ग्लें नमस्ते तु हृषीकेश नमस्ते जलशायिने । पूर्णभ्रूणापराधघ्नेन परिपूर्णकलाधर ! ॥

अस्य मन्त्रस्य ब्रह्मर्षिः हृषीकेशो देवताऽनुष्टुपछन्दः मम परिपूर्णभ्रूणापराधविमुक्त्यर्थं हृषीकेश-मन्त्रे जपे विनियोगः शिरसि ब्रह्मर्षये नमः मुखेऽनुष्टुप् छन्दसे नमः हृदये हृषीकेशदेवतायै नमः । ग्लैंमित्येक-बीजाक्षरमन्त्रेण षडंगन्यासं कुर्य्यात् । अथ ध्यानं—

वन्दे हृषीकेशमनर्घ्यमूर्त्तिं कलासमग्रैः परिपूर्णदेहं । रामानुजं दिव्यमनोहरांगं भ्रूणापराधाघप्रशांतकारकम् ॥ इति ध्यात्वा—द्विसहस्रमिदं जप्त्वा पश्चिमाभिमुखो विशन् । पूर्णभ्रूणापराधं मे हृषीकेश निवारय ॥

इति परिपूर्णभ्रूणापराधनिवृत्यर्थं हृषीकेशमन्त्रः ॥

अथ चतुष्प्रकारभ्रूणापराधचतुर्मन्त्राणां चतुरः शापमोचनानाह । हयग्रीवपञ्चरात्रे—

ओं अस्य श्रीचतुर्थांशभ्रूणापराधमुक्तकेशवमन्त्रशापमोचनस्य विश्वामित्र ऋषिस्त्रिपुरभैरवीदेवता बृहतीछन्दः मम चतुर्थभ्रूणापराधमुक्तकेशवमन्त्रशापप्रमोचने जपे विनियोगः ।

षड्भिस्तायांजलीः नीत्वा ह्याग्नेय्यां दिशि निःक्षिपेत् । तदा चतुर्थभ्रूणस्यापराधान्मोच्यते नरः ॥

इति पौलस्त्यऋषिशापमुक्तोभवः इति चतुर्थभ्रूणप्रायश्चित्तशापमोचनः ॥

ततोऽर्द्धभ्रूणापराधमुक्तनारायणमन्त्रशापमोचनः । नारदपञ्चरात्रे—

ओं अस्य श्रीअर्द्धभ्रूणापराधमुक्तनारायणमन्त्रस्य कौंडिन्यऋषिशापप्रमोचनस्य नारद ऋषिः कौमारी देवता अष्टी छन्दः मम कौंडिन्यशापमुक्तो भवः इत्यर्द्धभ्रूणप्रायश्चित्तमन्त्रशापमोचनद्वितीयः ।

अथ पादोनभ्रूणापराधप्रायश्चित्तमन्त्रस्य पराशरर्षिशापस्तस्य तृतीयो शापमोचनः । बृहद्गौतमीये—

ओं अस्य श्रीपराशरर्षि शापप्रमोचनस्य शांडिल्यर्षिः शांकरी देवता भूछन्दः मम माधवमन्त्रपराशर-र्षिशापप्रमोचने ज० 'त्रिरावृत्ति जलं नीत्वा दक्षिणस्यां दिशि क्षिपेत् । पराशरर्षिशापा तु मन्त्रमुक्तो भवेद्यदि' । इतिपादोनभ्रूणापराधप्रायश्चित्तमन्त्रो पराशरर्षि तृतीयो शापमोचनः ॥

अथ पूर्णभ्रूणापराधप्रायश्चित्तमन्त्रस्य लोहितर्षिशापस्तस्य मोचनप्रयोगः । अगस्त्यसंहितायां—

अस्य श्री लोहितर्षिशापप्रमोचनस्य गौतमऋषिः श्रीदेवी देवता बृहतीछन्दः मम लोहितर्षिशाप-प्रमो० ज० वि० दशांजलीः समादाय कोणत्रायव्यतो क्षिपेत् ।

पूर्णं भ्रूणापराधस्य प्रायश्चित्तसमन्वितः । मन्त्रस्तु सांगतां याति शापमुक्तो यदा भवन ॥

पाद्मे—भ्रूणो भ्रंस्येत्स्वयं तर्हि माता तं नैव पश्यति । गृहशुद्धिं प्रकुर्व्वन्ति प्रायश्चित्तं दिनत्रयं ॥

अनेनैव विधानेन चान्द्रायणव्रतं चरेत् । पिता भ्रूणं न पश्येत तदा भ्रूणो न जायते ॥

मातृपित्रोः समक्षं तु भ्रूणपातो ददर्शतु । असाववतरद्भ्रूणो षण्मासाभ्यंतरे तदा ॥

मातृपित्रोः सदा दुःखं कुरुतेऽब्दं न लंघयेत् । मृते गर्भे भवेद्गर्भे त्रिमासाभ्यन्तरे गते ॥

मातृगर्भं स्पृशेन्माता पिता वा मोहसंयुतः । तदाऽसौ मृतगर्भस्तु पुनरेव प्रजायते ॥
पुत्रो वा कन्यका वापि तदैव द्वौ प्रजायते । पुत्राच्छतगुणं पापं कन्यायां परिकीर्त्तितं ॥
रतिकर्मकृताद्गर्भो मृतो पतनमाचरेत् । तस्यैव महती हत्या कदाचिन्नैव मुञ्चति ॥
प्रायश्चित्तं विधानेन कुर्य्यान्मुक्तो भवेद्यदि ॥

अथ चतुष्प्रकार चतुर्णां गर्भाणां चत्वारप्रायश्चित्तमन्त्राः । रुद्रयामले—

तत्रादौ चतुर्थगर्भं प्रायश्चित्तत्रिविक्रममन्त्रः—

ओं श्रीं त्रिविक्रम नमस्तुभ्यं तुर्य्यगर्भापराधह । निवारय कृतं पापं श्रीवत्सांक नमोऽस्तु ते ॥

इति त्रिविक्रममन्त्रः । अस्य मन्त्रस्य माण्डूक ऋषिस्त्रिविक्रमो देवता जगती छन्दः मम तुर्य्यगर्भापराधशांतये त्रिविक्रममन्त्रजपे विनियोगः । शिरसि मांडकाय ऋषये नमः मुखे जगती छन्दसे नमः हृदये त्रिविक्रमाय देवतायै नमः । इतिन्यासः । अथध्यानं—

त्रिविक्रमं कलाकान्तं संसारार्णवतारकं । चिन्तयामि जगन्नाथं जगदानन्ददायकं ॥
इति ध्यात्वा-ईशानाभिमुखो भूत्वा द्विसहस्रमिदं जपेत् । त्रिविक्रमाय देवाय ह्यर्येत्सविधानतः ॥
नक्षत्रदर्शनं कृत्वा तंदुलान्नं च भक्षयेत् । मृतस्पर्शे कृते तर्हि कौलके वान्यकौलके ॥
नक्षत्रदर्शनं कृत्वा शुद्धतामाचरेन्नरः ॥
इतिचतुर्थ गर्भप्रायश्चित्तत्रिविक्रममन्त्रः ॥

अथ शौनकर्षिशापान्वितोऽयं मन्त्रः । वृहन्नारदीये—

ओं अस्य श्रीशौनकर्षिशापप्रमोचनमंत्रस्य वृहदारण्यकर्षिर्भैरवो देवता पंक्ति छन्दः मम शौनकर्षिशापप्रमोचने जपे विनियोगः इति शौनकर्षि शापमुक्ताभवः "चतुर्भिरुच्चरेन्मन्त्रं दक्षिणस्यां जलं क्षिपेत्" इति चतुर्थगर्भापराधशांतये त्रिविक्रममन्त्रशापमोचनं ।

अथार्द्ध गर्भापराधप्रायश्चित्तवामनमन्त्रः । वामनपुराणे—

ओं ह्रीं ग्लौं वामनाय नमस्तुभ्यं नमस्ते ब्रह्मरूपिणे । मेखलाजिनयुक्ताय गर्भार्द्ध दोषशान्तये ॥
इति वामनमन्त्रः ॥

अस्य मन्त्रस्य भृगु ऋषिर्वामनो देवता अक्षरा पंक्ति छन्दः ममार्द्ध गर्भापराधनिवृत्त्यर्थं प्रायश्चित्तवामनमन्त्रजपे विनियोगः न्यासं पूर्ववत् । शिरसि भृगवे ऋषये नमः, मुखेऽक्षरापंक्तिछन्दसे नमः । हृदये वामनदेवतायै नमः । अथ ध्यानं —

सर्वविद्यार्थतत्वज्ञं वामनं चिन्तयाम्यहं । अर्द्धगर्भापराधाख्यनिहंतारमजं प्रभुम् ॥ इति ध्यात्वा—
पूर्वाभिमुखमाविश्य सहस्रत्रितयं जपेत् । अर्द्धगर्भापराधात्तु मुक्तो भवति मानवः ॥
प्रायश्चित्तं बिना लोको त्रिपु लोके न तिष्ठति । भ्रूणहा वल्गुलीं योनिमालभ्य भ्रमते भुवि ॥
गर्भहा कौलकीं योनिं चाण्डालमुखभास्यतां । दश जन्मभवां योनिं मुहुर्मुहु प्रवर्त्तिनां ॥
बालघ्नो ह्यडिकायोनिमजायोनिं च विप्रहा ॥

पुराणसमुच्चये—

पुत्रे पितुर्भवेद्धत्या सहस्रगुणिता भवेत् । पुत्रस्य च भवेत्ताते सहस्रार्द्धं प्रजायते ॥
कन्यायाश्चायुतं गुण्यं दशधा कन्यके पितुः । भ्रातुश्च कन्यकायां तु पञ्चधा जायते ध्रुवं ॥
जामातुश्च भवेद्धत्या श्वसुरि द्विशतं गुणं । जामातरि भवेच्छ्वश्रोरेकविंशगुणं फलं ॥

श्वश्रोः सुतस्य दशधा तत्सुतस्य च पञ्चधा । चतुर्गुणं भवेत्पौत्रे द्विगुणं च प्रपौत्रके ॥
नारीहत्या भवेत्पत्न्यौ षड्गुणा त्रिगुणस्त्रियां । मातुः पितुः समाख्याता दुहित्री पुत्रकन्यका ॥
मातृश्वसुः पितुर्वापि चतुर्गुणफलं स्मृतं । भगिनी पुत्र कन्यायाः शतगुणप्रवर्त्तिनी ॥
एवं कौलसमुद्भूते हत्या निर्णयमीरितं ॥

भविष्योत्तरे–ब्राह्मणे ब्राह्मणस्यापि समता गुणितं भवेत् । क्षत्रिये द्विगुणं जातं तदर्द्धं क्षत्रियस्य च ॥
वैश्ये त्रिगुणं जातं तं चतुर्थांशं तु ब्राह्मणे । शूद्रे ह्येकगुणं जातं शूद्रस्य तु तदर्द्धकं ॥
अन्त्यजे ब्राह्मणस्यापि द्विसहस्रगुणा भवन् । म्लेच्छस्य जायते हत्या सामान्या परिकीर्त्तिता ॥
हत्या संस्कारसंभूते म्लेच्छे नैव प्रजायते । संग्रामे वैरभावे च नैव हत्या प्रजायते ॥
अज्ञातां च करोद्धत्यां कदाचिन्नैव मुंचति ॥

इति चतुर्वर्णापराधनिषेधः । इत्यर्द्धगर्भप्रायश्चित्तवामनमन्त्रः ।

अस्य मन्त्रस्य भारद्वाजर्षेः शापस्तस्य मोचनप्रयोगः । बारस्पत्यसंहितायां—

ओं अस्य श्रीभारद्वाजर्षिशापप्रमोचनमन्त्रस्य बारस्पत्यर्षिश्चन्द्रमा देवता भूर्छंदः मम भारद्वाजर्षिशापप्रमोचने जपे विनियोगः । भारद्वाजशापमुक्ताभवः । इति षष्ठांजलीः नीत्वा कोणं नैऋतमुत्क्षिपेत् । इति द्वितीयो शापमोचनः ।

अथ पादोनगर्भप्रायश्चित्तपद्मनाभमन्त्रः । शौनकीये—

ओं श्रीं देवाय पद्मनाभाय गर्भदोषापहारिणे । नमस्ते कमलाकान्त सर्वदोषविमुक्तये ॥

इति पादोनगर्भप्रायश्चित्ताय पद्मनाभमन्त्रः । अस्य मन्त्रस्य वेणु ऋषिः पद्मनाभो देवता जगती छन्दः मम पादोनगर्भापराधविमुक्त्यर्थप्रायश्चित्तपद्मनाभमन्त्रजपे विनियोगः न्यासं पूर्ववत् । अथ ध्यानं—

पद्मनाभं पयोमूर्त्तिं गर्भदोषापहारिणं । चिन्तयामि कलापूर्णं नानापुण्यार्थदायकं ॥ इति ध्यात्वा—
पश्चिमाभिमुखो भूत्वा मन्त्रं जप्त्वा विधानतः । पादोनगर्भसंभूतां हत्यां मम निवारय ॥

इति पद्मनाभमन्त्रः औत्सारर्षिशापान्वितोऽयं मन्त्रः अस्यौत्सारर्षिशापप्रमोचनमन्त्रस्य साकलऋषिर्वैष्णवी देवता बृहती छन्दः ममौत्सारर्षिशापप्रमोचने जपे विनियोगः इत्यौत्सारर्षिशापमुक्ताभवः । पंचाञ्जलौ जलं नीत्वा दक्षिणस्यां दिशि क्षिपेत् । इत्यौत्सारर्षिशापमोचनः ॥

अथ पूर्णगर्भापराधमुक्त्यर्थं प्रायश्चित्ताऽधोक्षजमन्त्रः । बौद्धायने—

ओं ह्रीं श्रीं क्लीं सौं देवायाधोक्षजाय च । नमो ब्रह्मण्यरूपाय पूर्णगर्भापराधह ! इत्यधोक्षजमन्त्रः ॥

अस्य मन्त्रस्य धौम्यर्षिरधोक्षजो देवता जगती छन्दः मम पूर्णगर्भापराधशान्त्यर्थेऽधोक्षमन्त्रजपे वि० शिरसि धौम्याय ऋषये नमः मुखे जगती छन्दसे नमः हृदयेऽधोक्षजाय देवतायै नमः इति न्यासः । ततो पंचबीजाक्षरेण पञ्चांगन्यासं कुर्यात् । अथ ध्यानं—

वन्देऽधोक्षजमीश्वरं गुणनिधिं गर्भापराधापहं । शंखं चक्रगदाभृतं करतले नारायणं सुन्दरं ॥
सर्वाभीष्टवरप्रदं सकलया लक्ष्म्यान्वितं कामदं । नानामुक्तिप्रदं नृणां शुभप्रदं संसारपापापहम् ॥

इत्यधोक्षजस्वरूपं ध्यात्वा—

उत्तराभिमुखो भूत्वा मन्त्र जाप्यं समाचरेत् । पूर्णगर्भापराधं मे ऽज्ञातपापं निवारय ॥

इति पूर्णगर्भापराधप्रायश्चित्ते ऽधोक्षजमन्त्रः ॥ हिरण्यस्तूपर्षिशापान्वितोऽयं मन्त्रः । संमोहनतन्त्रे—

ओं अस्य श्रीहिरण्यस्तूपर्षिशापप्रमोचनमन्त्रस्य वृषाकपि ऋषिः कात्यायनी देवता पंक्ति छन्दः मम

हिरण्यस्तूपर्षिशापप्रमोचने जपे विनियोगः इति हिरण्यस्तूपर्षिशापमुक्ताभवः। इति सप्तांजलीः नीत्वा कोण-वायव्यमुत्क्षिपेत्। इति हिरण्यस्तूपर्षिशापमोचनः॥

भविष्ये—भ्रूणहा गर्भहा वापि दशाब्दपरिमाणतः। परिवारक्षयं नीत्वा समूलं च विनश्यति॥

ब्रह्मघाती नरो यस्तु तीर्थद्वादशमाचरेत्। गया वेणी च वेत्रा च मणिकर्णिका गंडकी॥

चर्मन्वती सुभद्रा च कालिन्दी च महेन्द्रका। गोमती सरयू क्षिप्रास्तीर्थाः द्वादश संज्ञका॥

आदौ द्वादशतीर्थांश्च कृत्वा श्रीकुण्डमाविशत्। व्यतीय द्वादशाब्दानि प्रायश्चित्तं समाचरन्॥

प्रायश्चित्तं विना लोको ब्रह्महत्या न मुच्यति। सप्तजन्म भवेत्कुष्ठी गलिताङ्गस्तु जायते॥

अथ ब्रह्महत्याप्रायश्चित्ते मधुसूदनमन्त्रः। ब्राह्मे—

"ओं ह्रीं क्लीं मधुसूदनाय स्वाहा" इति ब्रह्महत्याप्रायश्चित्तार्थमिदं दशाक्षरमधुसूदनमन्त्रं। अस्य मन्त्रस्य नारदर्षिर्मधुसूदनो देवता गायत्री छन्दः मम ब्रह्महत्यापराधशान्त्यर्थे मधुसूदनमन्त्रजपे विनियोगः शिरसि नारदऋषये नमः मुखे गायत्री छन्दसे नमः हृदये मधुसूदनाय देवतायै नमः। अथ ध्यानं—

मधुदैत्यनिहन्तारं मधुसूदनमीश्वरं। ब्रह्महत्यापराधस्य शान्तये चिन्तयाम्यहं॥

इति मधुसूदनस्वरूपं ध्यात्वा-

"पूर्वाभिमुखमाविश्य मन्त्रं जप्त्वा विधानतः। मधुसूदनदेवेश ब्रह्महत्यां व्यपोहतु॥

गोधूमान्नं प्रभक्षयेत नक्तव्रतसमन्वितः। ब्रह्मचर्य्यसमायुक्तो तिलसौवर्णप्रस्थकं॥

गुप्तं कृत्वा च विप्राय प्रतितीर्थेषु दीयते॥

इति ब्रह्महत्यापराधशान्तये मधुसूदनमन्त्रः। दक्षिणामूर्त्यर्षिशापान्वितोऽयं मन्त्रः अस्य मन्त्रस्य शापमोचनः। कौडिन्यसंहितायां—

ओं अस्य श्रीदक्षिणामूर्त्यर्षिशापप्रमोचनमन्त्रस्य नैध्यर्षिस्त्रिपुरसुन्दरी देवता विराट् छन्दः मम दक्षिणामूर्त्यर्षिशापप्रमोचने जपे विनियोगः इति दक्षिणामूर्तिशापमुक्ता भवः "सप्ताञ्जलीः समादाय कोणं नैर्ऋतमुत्क्षिपेत्। इतिदक्षिणामूर्तिशापमोचनः।

अथ क्षात्रियवधापराधप्रायश्चित्तः। विष्णुधर्मोत्तरे—

नववर्षं गृहं त्यक्त्वा तीर्थानां नवकं चरेत्। गंगा भागीरथी क्षिप्रा कालिन्दी यमुना तथा॥

कर्मनाशा च कौशिल्या ह्यलकनन्दा च मेनिका। आदावष्टौ करोत्तीर्थं ततो पुष्करतीर्थकं॥

व्यतीय नववर्षाणि प्रदोषव्रतसंयुतः। पक्वान्नं भोजयेन्नित्यं ब्रह्मचर्य्यसमन्वितः॥

पलत्रयं सुवर्णस्य नालिकेरं करोन्नरः। मध्ये मुक्तां समादाय सितवस्त्रेण छादितं॥

नित्यदानं तु विप्राय दत्वा मुक्तिमवाप्नुयात्॥

ततः क्षत्रियप्रायश्चित्तमन्त्रः। अगस्त्यसंहितायां—

नमः प्रद्युम्नदेवाय क्षत्रहत्याव्यपोहक!। सर्वकल्मषनाशाय वासुदेव नमोऽस्तु ते॥ इति मन्त्रः—

अस्य मन्त्रस्य कौशिकर्षिः प्रद्युम्नो देवता बृहती छन्दः मम क्षत्रियापराधविमोचने प्रायश्चित्त-प्रद्युम्नमन्त्रजपे विनियोगः। शिरसि कौशिकाय ऋषये नमः। मुखे बृहती छन्दसे नमः हृदये प्रद्युम्नाय देवतायै नमः इति न्यासः। अथ ध्यानं—

क्षत्रापराधदोषघ्नं प्रद्युम्नं चिन्तयाम्यहं। पीताम्बरधरं देवं कमलाकांतं वल्लभं॥

इति स्वरूपं ध्यात्वा—

वृक्षारूढाजिने स्थित्वा विल्ववृक्षस्थले जपन्। ईशानाभिमखो भूत्वा सहस्रत्रितयं जपेत्॥

क्षत्रहत्याद्विमुक्तस्तु मुक्तिभागी भवेन्नरः । गोदानशतकं दत्वा प्रहवल्लभतां व्रजेत् ॥
सप्तद्वारकृतां भिक्षां जीवहिंसाकृतं यदि । तदैव मुच्यते हत्या विनायाञ्चा न मुच्यति ॥
द्वारेषु ब्रुवते वाक्यं हत्यासंधानदर्शनं । दशांशं मुच्यते पापं न भूत्वा तद्विवर्द्धितं ॥
हत्योक्तवत्सरे पूर्णे वासरे प्रतिभागतः । वर्द्धते चीयते वापि प्रायश्चित्तेऽकृते कृते ॥

इति क्षत्रियावधापराधप्रायश्चित्तमन्त्रः । वाधूलस् ऋषिशापान्वितोऽयं मन्त्रः । अस्य श्रीवाधूलस् ऋषिशापप्रमोचनस्य अहिर्बुध्न्य ऋषि माहेश्वरी देवता त्रिष्टुप् छन्दः मम क्षत्रियवधापराधप्रायश्चित्ते वाधूल ऋषिशापप्रमोचने जपे विनियोगः इति वाधूल ऋषि शापमुक्तो भवः "पंचाञ्जलौ जलं नीत्वा पश्चिमस्यां दिशि क्षिपेत्" इति वाधूल ऋषि शापमोचनः ॥

अथ वश्यवधापराधप्रायश्चित्तः । दुर्गारहस्ये—

वर्षषट्कं गृहं त्यक्त्वा तीर्थषट्कं समाचरेत् । गंगासिन्धुस्त्रिवेणी च क्षिप्रा वेत्रवती नदी ॥
गयां गत्वा करोच्छ्राद्धं फल्गुस्नानं समाचरेत् । व्यतीय षडवर्षाणि पूर्णिमाव्रतमाचरेत् ॥
पायसं भोजयेन्नित्यं भूमिशायी जितेन्द्रियः । पात्रं त्यक्त्वा पलाशस्य पात्रे भोजनमाचरेत् ॥
चतुः पलसुवर्णस्य फलाम्रं कारयेत्सुधीः । मध्ये विद्रुममादाय छादयेत्पीतवाससा ॥
नित्यदानं द्विजायैव ददौ मुक्तिमवाप्नुयात् ।

ततः वैश्यवधप्रायश्चित्तेऽनिरुद्धमन्त्रः । देवीपुराणे—

ओं श्रीं क्लीं सौंः अनिरुद्धाय वैश्यापराधघ्नाय फट् स्वाहा, इति विंशाक्षरोऽनिरुद्धमन्त्रः । अस्य मन्त्रस्येरिपठि ऋषिरनिरुद्धो देवता कांतिछन्दः मम वैश्यापराधशान्त्यर्थे प्रायश्चित्तेऽनिरुद्धमन्त्रजपे विनियोगः । न्यासं पूर्ववत् । अथ ध्यानं—

वैश्यहत्यापराधघ्नमनिरुद्धं भजाम्यहं । शंखचक्रगदाशार्ङ्गनानावस्त्रविभूषितं ॥

इति ध्यात्वा—सिंहचर्मणि संविश्य पिप्पलाधस्तले जपन् । आग्नेयाभिमुखो भूत्वा सहस्रद्वितयं चरेत् ॥

वैश्यहत्याविमुक्तस्तु मुक्तिभाग्भवते नरः । द्विपंचाशगवां दानं दत्वा कौटुम्बपालकः ॥

इति वैश्यहत्यापराधप्रायश्चित्तेऽनिरुद्धमन्त्रः । यमदग्निशापान्वितोऽयं मन्त्रः । ओं अस्य श्रीयमदग्निशापप्रमोचनस्य वशिष्ठ ऋषिस्त्रिपुरभैरवी देवता अष्टी छन्दः मम वैश्यहत्यापराधप्रायश्चित्तेऽनिरुद्धमन्त्राराधने यमदग्निशापप्रमोचने जपे विनियोगः । इति यमदग्निशापमुक्तो भवः "चतुर्भिरञ्जलीः नीत्वा चतुर्दिक्षु परिक्षिपेत्" । इति यमदग्निशापमोचनः ॥

अथ शूद्रापराधप्रायश्चित्तः । विष्णुयामले—

वर्षत्रयं गृहं त्यक्त्वा तीर्थानां त्रयं चरेत् । गंगा चर्मन्वती वेत्रा स्नानं कुर्याद्विधानतः ॥
चतुर्दशी व्रतं कृत्वा फलाहारं समाचरेत् । ब्रह्मचर्य्यसमायुक्तस्त्रिपलस्वर्णविल्वकं ॥
मध्ये रत्नं समादाय पट्टवस्त्रेण छादितं । विप्राय नित्यदानं तु दत्वा मोक्षमवाप्नुयात् ॥

ततः शूद्रवधापराधप्रायश्चित्तेऽच्युतमन्त्रः । विष्णुपुराणे—

ओं विष्णवेऽच्युतरूपाय व्यापिने परमार्थिने । शूद्रापराधप्रपन्ने नमस्ते मोक्षदायिने ॥

इति द्वात्रिंशाक्षरोऽच्युतमन्त्रः । अस्य मन्त्रस्य गौतमपुत्रो वामदेवर्षिरच्युतो देवता गायत्री छन्दः मम शूद्रापराधविमोचने प्रायश्चित्तेऽच्युतमन्त्रजपे विनियोगः । न्यासं पूर्ववत् । अथ ध्यानं—

अच्युतं कमलाकांतं शूद्रहत्याविनाशनं । सर्वदैत्यनिहन्तारमीश्वरं प्रणमाम्यहं ॥ इति ध्यात्वा—

रक्तकम्बलमादायाऽशोकवृक्षस्तले विशन् । नैऋतनाभिमुखो भूत्वा द्विसहस्रमिदं जपेत् ।
शूद्रहत्याविमुक्तस्तु मुक्तिभागी भवेन्नरः । गोदानं दशकं दत्वा कौटुम्बसौख्यमाप्नुयात् ॥
चतुर्द्वारकृताभिक्षा शूद्रहत्या कृतेऽपि वा । तदैव मुच्यते हत्या न भिक्षा मुच्यते क्वचित् ॥

भविष्ये—अपराधी भवेल्लोको विचित्रश्चित्तविभ्रमः । प्रतिवासरमेधन्ते रात्रौ च लवणं यथा ॥
लवणं दीयते रात्रौ दारिद्रमृणमेधते । यस्मात्क दान दातव्यं लवणं रात्रि संभवे ॥

आदित्यपुराणे—

नित्यमेव कृतं दानं वासरे लवणस्य च । गृहपाकानुमानेन न्यूनाधिक्यविवर्जितं ॥
तद्गृहे ऋणदारिद्र्यं कदाचिन्नैव तिष्टति । वहु प्रवर्द्धितो गेहे ऋणदारिद्र्यव्याधयः ॥
लवणस्य कृते दाने वर्षमात्रं विनश्यति । धनधान्यसमृद्धिस्तु पुत्रपौत्रादि वृद्धयः ॥
नैरोग्यसुखसंपत्तिर्मंगलयोत्सवकेलयः । प्रतिवासरमेधन्ते सर्वकामार्थचिन्तनैः ॥
श्रीकुण्डादिशुभे तीर्थे दाने च लवणस्य च । कृते शतऋणैः ग्रस्तो बहुदारिद्रपीडितः ॥
मुक्तो भवति लोकोऽस्मिन्सर्वकामानमाप्नुयात् । सदा संपीड्यमानोऽपि मुच्यते व्याधिवंधनात् ॥
यथैवादित्यवारेऽसौ चणादिधान्यसंभवाः । तप्तवालुकयंत्रेण भुंक्त्वा पानादिकं चरेत् ॥
बहुधा ऋणदारिद्र्यरोगशोकभयं व्यथा । भूतं तद्द्विगुणं जातं ननु स्याद्वर्द्धते क्षणं ॥
शनिवारे चणाधान्यं बालुकायन्त्रभुञ्जितं । भुंक्त्वा बहुविधं जातं दारिद्र्यं कलहं ऋणं ॥
नाशये क्षणमात्रेण गृहे नैव कदा भवेत् । तद्गृहे वर्द्धते लक्ष्मीः धनधान्यादिसम्पदा ॥
स्वप्नेपि नैव पश्येत रोगशोकदारिद्रजं । दरिद्रागमने जातं निद्रालस्यं मनो भ्रमं ॥
पुरुषाद्द्विगुणं पापं स्त्रीबधे जायते ध्रुवं । नारीकर्मरतो भर्त्ता नारी स्याद्बहुभक्षिणी ॥
तद्गृहे नैव वृद्धिः स्याद्धनधान्यादिसंपदः । प्रतिवासरमेवास्ति क्षीयते च प्रतिक्षणं ॥
उपवासदिने वापि ह्येकादश्यां विशेषतः । तप्तं च बालुकायन्त्रं करोद्ग्रामे पुरेऽपि वा ॥
व्रतं निष्फलतां याति ब्रह्महत्या प्रजायते । शतजीवाभिघातेन हत्यैका ब्रह्मघातिनी ॥
भुञ्जितो भ्राणतो वापि जीवाग्निदहनादपि । दैवशापो भवेद्ग्रामे तस्माद्ग्रामो विनश्यति ॥
दुर्भिक्षं मरणं व्याधिदरिद्रो राजविग्रहः । यतस्तु बालुकायन्त्रं तप्तं नैव तु कारयेत् ॥
एवं पक्वानकृद्यन्त्रं मिष्टान्नाय प्रकल्पितं । एकादश्यष्टमी पूर्णाभूता सा पक्षवर्द्धिनी ॥
पितृपक्षे च भाद्रे च वैशाखे माघकार्त्तिके । कदाचिन्नैव कर्त्तव्यं वन्हिसंयुक्ततप्तकं ॥
वर्षमध्ये भवेद्भ्रष्टो ग्रामो निर्धनपीडितः ।

इति शूद्रापराधप्रायश्चित्तोऽद्भुतमन्त्रः वृषाकपिशान्तिलोऽयं मन्त्रः । अस्य श्रीवृषाकप्यर्षिशापप्रमोचनस्य च्यवनर्षिर्विश्वम्भरो देवता गायत्री छन्दः मम वृषाकप्यर्षिशापप्रमोचने जपे विनियोगः इति वृषाकप्यर्षिशापमुक्तो भवः "चतुर्भिरञ्जलीः नीत्वा दक्षिणस्यां दिशि क्षिपेत् । इति वृषाकप्यर्षिशापमोचनः ॥

अथान्त्यजवधापराधप्रायश्चित्तः । भविष्ये—

वर्षद्वयं गृहं त्यक्त्वा गंगावेत्रवतीं चरेत् । भास्करस्य व्रतं कुर्य्यात् दधिभक्तं तु भोजयेत् ॥
चतुःपलसुवर्णस्य दाडिमं कारयेच्छुचीः । हरित्पट्टेन वस्त्रेण छादितं दानमाचरेत् ॥
नित्यं विप्राय दातव्यं हत्यामुक्तो भवेन्नरः ।

ततोऽन्त्यजवधापराधप्रायश्चित्ते जनार्दनमन्त्रः । माधवीये तन्त्रे—

जनार्दनाय देवाय गोब्राह्मणहिताय च । वधान्त्यजापराधघ्ने नमस्ते मुक्तिदायिने ॥

इति द्वात्रिंशाक्षरो जनार्दनमन्त्रः । अस्य मन्त्रस्य वेणुऋषि र्जनार्दनो देवता पंक्ती छन्दः ममान्त्यजवधापराधविमोचने प्रायश्चित्ते जनार्दन मन्त्रजपे विनियोगः । न्यासं पूर्ववत् ।

अथध्यानं—अन्त्यजहन्तापराधघ्नं वन्देऽहं त्वां जनार्दनं । सच्चिदानन्दरूपाढ्यं पीतवस्त्राभिलंकृतं ॥

इति ध्यात्वा-श्यामकम्बलमादाय श्वेतार्कतलतो जपेत् । आग्नेयाभिमुखो भूत्वा त्रिसहस्रमिदं जपेत् ॥

हत्यांत्यजविमुक्तस्तु मुक्तिभाग्जायते नरः । गोदानपंचकं दत्वा सौभाग्यादिसुखं लभेत् ॥

दशद्वारकृताभिन्नांत्यजहत्या विमुच्यति ।

इत्यंत्यजवधापराधप्रायश्चित्ते जनार्दनमन्त्रः । भार्गवर्षिशापः । अस्य श्री भार्गवर्षिशापप्रमोचनस्य सावाश्वर्षिः कात्यायनी देवता जगती छन्दः मम भार्गवर्षिशापप्रमोचने जपे वि०इति भार्गवर्षिशापमुक्ता भवः । "त्रिभिरञ्जलिमादाय पश्चिमस्यां दिशि क्षिपेत्" । इति भार्गवर्षिशापमोचनः ।

अथ चाण्डालवधापराधप्रायश्चित्तः । ब्राह्मे—

वर्षमेकं गृहं त्यक्त्वा गंगां च सरयूं ययौ । चाण्डालघातको लोको स्नानाद्धत्यां व्यपोहति ॥

भूमिपुत्रव्रतं कुर्यात् पुन्नागं भोजयेत्सुधीः । अतिथ्यागमने काले मध्यान्हे पातकी नरः ॥

मार्जारयोनिमालभ्य प्रायश्चित्तं विनाधमः । पञ्चकर्षप्रमाणेन सौवर्णं नारंगीफलं ॥

मध्ये नीलमणिं धृत्वा सितपट्टेन वाससा । छादितं विधिवद्दद्याद्ब्राह्मणाय समासतः ॥

मुच्येच्चांडालकी हत्या नित्यदानकृते यदि ॥

ततश्चांडालवधापराधप्रायश्चित्ते परब्रह्ममन्त्र. । संमोहनतन्त्रे—

परब्रह्मस्वरूपाय जगदानन्दहेतवे । चांडालवधपापघ्ने नारायण नमोस्तु ते ॥

इति द्वात्रिंशाक्षरो परब्रह्ममन्त्रः । अस्य मन्त्रस्य काण्वर्षिः परब्रह्मो देवता अक्षरा पंक्ति छन्दः मम चांडालवधापराधविमोचने प्रायश्चित्ते जपे विनियोगः न्यासं पूर्ववत् । शिरसि काण्वर्षये नमः मुखेऽक्षरापंक्तये छन्दसे नमः हृदये परब्रह्मणे देवतायै नमः इति न्यासः । अथ ध्यानं—

वन्दे परब्रह्ममनादिरूपं देवाधिदेवं कमलायताक्षं । चांडालपापघ्नमजं सुरेशं सर्वार्थदं सुन्दरश्यामलांगं ॥

इति परब्रह्मस्वरूपं ध्यात्वा—

मृगचर्म समादाय वटस्याधस्तले जपेत् । पूर्वाभिमुखमाविश्य सहस्रद्वितयंचरेत् ॥

ग्रन्थसञ्ज्ञकगोदानं नवकं दीयते बुधः । नवद्वारकृताभिन्ना हत्या चांडालकी व्रजेत् ॥

इति चांडालवधापराधप्रायश्चित्ते परब्रह्ममन्त्रः । आप्लुवानृषिशापान्वितोऽयं मन्त्रः । अस्य श्री-आप्लुवानृषिशापप्रमोचनस्य साकलर्षिः वैष्णवी देवता विराट् छन्दः ममाप्लुवानृषिशापप्रमोचने जपे विनियोगः । इत्याप्लुवानृषि शापमुक्ता भवः "पंचाञ्जलिः समादाय कोणमीशानमुत्क्षिपेत् । इत्याप्लुवानृषिशापमोचनः ॥

इतीरितं ब्रह्मवधादिपातकं नरस्वरूपं सकलाभिशान्तये । प्रायश्चित्तं गोप्यव्रतादिदानं श्रीभट्टनारायणसंज्ञकेन ॥

इति श्री भास्करात्मज श्रीनारायणभट्टगोस्वामी विरचिते ब्रजभक्तिविलासे परमहंससंहितोदाहरणे ब्रजमाहात्म्यनिरूपणे श्यामकुंडदृष्टान्ते गोप्यभ्रूणादिवधप्रायश्चित्ताभिधानाख्ये नरस्वरूपके षष्ठोऽध्यायः ॥

## ॥ सप्तमोऽध्यायः ॥

अथ गवादिपशुजन्तूनां वधापराधप्रायश्चित्तः । स्कान्दे—

गवादि पशुजन्तूनां म्लेच्छावासे वधोभवेत् । तद्ग्रामे च पुरे वापि हत्यादोषो न विद्यते ॥
ब्राह्मणे त्वथवा वैश्ये जीवहत्याभिजायते । पशुपक्षिमृगादीनां वधदोषमुदाहृतं ॥
यथैव च सुरापानं महापातककारकं । तथैव वैष्णवानां च चातुर्वर्णाभिधायिनां ॥
क्षत्रिये च गवां त्यक्त्वा पशुपक्षिमृगादयः । तेषां वधे कृते नैव हत्यादोषोभिजायते ॥
नीलकण्ठशुकश्वानविडालशिखिचाग्रगाः । एषां वधं त्यजन्ति स्म हत्या स्यात् कुलघातिनी ॥
चतुर्वर्णाश्रमावासे गवां घातं समुद्भवं । समूलं नाशतां याति वायुनोदितवह्निना ॥
तदैव घातकस्यापि वधहत्या न जायते । राजा शस्याधिपो मन्त्री तथैव ग्रामरक्षकः ॥
येषां न विद्यते दोषं प्रायश्चित्तमथाचरेत् । चौरो ऽसत्कृतको वापि जीवहिंसां न कारयेत् ॥
गोघ्नो वधं न कुर्वीत तद्हत्या फलमाप्नुयात् । सीताशिखावधं कुर्यात् गवां हत्या शतंसमं ॥
फलमाप्नोति लोकोपि समूलं च विनश्यति । गवादिपशुजातीनामग्रतस्तृणमाहरेत् ॥
अथवा भोजनं ह्यग्राह्यकशल्येन वृथा करोत् । तदात्मकल्पानात्तस्य हत्यास्यात्कुत्सिनीमता ॥
दारिद्रशोकतप्तार्त्तापमानबहुदुःखदा । कस्य नीत्वा ददौ कस्मै द्रव्यादीनर्थसञ्चयान् ॥
लोकनिन्दामयी नाम हत्या स्याद्बहुक्लेशदा । अजैडकां बालवतीं गुर्विणीं वा शिशुं तथा ॥
वैश्यविप्रापराधस्तु क्षत्रिये नैव विद्यते । मेषछागसुतस्यापि वधदोषो न जायते ॥
कालस्वरूपजीवानां वध दोषो न विद्यते । यज्ञकर्मणि जीवानां घाते दोषो न विद्यते ॥
यज्ञांशशेषसंभुक्तं मांसं जीवसमुद्भवं । वैश्यब्राह्मणयो नैव भुक्तदोषो न जायते ॥
शृगालभेडसिंहानां सुतभज्ञानसंयुतं । तत्रैव नगरे ग्रामे गृहे नैवानयेत् क्वचित् ॥
वानरर्क्ष विवर्णानामेषामागमनं शुभं । शृगालादित्रयाणान्तु सुतागमन वेश्मनः ॥
ब्रह्महत्या फलं जातं समूलं च विनाशयेत् ।

धर्मप्रदीपे—मनसा कर्मणा वाचा यज्ञं वैवाहिकादिकं । विध्वंसनमभीच्छन्ति कृच्छ्रहत्या फलं लभेत् ॥
विंशवर्षान्तरे लोको समूलं च विनश्यति । ब्राह्मणो वाममार्गस्थो सुरामांसरतः सदा ॥
मांसाहारे सुरापाने तस्य दोषो न विद्यते । दुर्गोत्सवोत्सवे नित्यमजाघातं चकार ह ॥
दैवोदितमहामन्त्रैस्तस्य दोषोन विद्यते । क्षत्रियो महिषं हन्यात् दैत्यरूपं स्मृतं तदा ॥
दुर्गोत्सवे न दोषः स्यात् प्रीता महिषमर्दिनी । विना महिषघातेन क्षत्रियोऽविजयी भवेत् ॥
महिषी पयस्विनी घाते हत्याकलगभिधायिनी । पुत्रशोकमवाप्नोति प्रायश्चित्तं विना यदा ॥
मूर्खाणाञ्च नराणाञ्च कदा हत्या न मुञ्चति । गृहभंगं स्थानभ्रष्टं द्वयोत्साहं करिष्यति ॥
हत्यालिंगं समादाय तीर्थयात्रां समाचरेत् । कपोतमैनिकासाराचक्रवाकगर्दभादयः ॥
जीवापराधिनी नाम हत्यैषा परिकीर्तिता । पुरुषं मृतवत्साख्यं करोत्यब्दत्रयान्तरे ॥
कागाकाशवहायास्तु हत्या दोषो न विद्यते । शृगालश्वानतित्तिरो उलूको कालकारकः ॥
तेषां वधे न हत्या स्यादुष्ट्रे किंचिद्भविष्यति । स्यामावधे भवेद्धत्या दैवघीत्यभिधा स्मृता ॥
संग्रामपरिवारञ्च कुटुम्बं च विनाशयेत् ।
चिरीपंडुकुलीमूषक्षयाणां वधमाचरेत् । मिथ्या कलंकदा नाम हत्या द्रव्यार्थनाशिनी ॥

मृद्धन्त्रिणी नागत्यक्ता द्वयोर्हत्या न विद्यते । बंधनागतजीवानां गवादीनां पयस्विनां ॥
क्षुधया पीडितं कुर्यात् हत्या स्यात्कल्पदाहिनी । दरिद्ररोगसन्तापं कुरुते नन्वहर्निशं ॥
मिथात्मकल्पदाहं स केपाञ्चित् कारयेत्कदा । काम्यहत्या भवेत्तस्य पुत्राद्युत्सवनाशकः ॥
छायान्वितं हरिद्वृक्षं यश्छिनत्त्यधमोनरः । तस्यार्द्रा जायते हत्या समूलञ्च विनाशकं ॥
मनसा कर्मणा वाचा परद्रोहं विचिन्तयेत् । समूलं नाशमायाति द्रोहहत्या ऽशुभप्रदा ॥
शुष्कवृक्षं छिनोद्यस्तु गृहकार्यार्थमाहृतं । तस्य हत्या न दोषो च नैवात्र शुभदायकं ॥
घनछायं वटं छित्वा ब्रह्महत्या समं फलं । अश्वत्थमोदको नाम हत्या कुल विनाशिनी ॥
निम्बे मनोर्थहानाम हत्या सौख्यविनाशिनी । चूते फलप्रहानाम हत्या भोगप्रणाशिनी ॥
विल्वे द्रव्यपहानाम पूजाधर्मार्थनाशिनी । घातयेद्धरितं वृक्षं मन्त्रप्रैचारसिद्धये ॥
रोगिणीनाम सा हत्या सर्वदा व्याधिदायिनी । सफलं हरितं वृक्षं निर्मूलफलकारिणी ॥
निर्मूलनाशिनी हत्या वंशवृद्धिविनाशिनी । विफलं कंटसंयुक्तं वृक्षं छित्वा हरिच्छुभम् ॥
नैव हत्या भवेत्तस्य वैरभावेन दूषितं । कृष्णपक्षे छिनोत्काष्ठमघुनं च प्रजायते ॥
छलेन कस्य द्रव्याणि नीत्वा तस्मै न दीयते । पञ्चजन्मसु जामाता भूत्वा द्रव्यं समाददे ॥
व्यभिचारप्रलोभेन दद्याद्दानं मिषेण च । तद्दानं निष्फलं जातमिच्छितार्थं विनाशयेत् ॥
गवादिधनधान्यादिवस्त्रहर्म्यादिभूमयः । वासमो दानमिच्छन्ति वाक्यदानविधायकः ॥
नैव दद्याच्च विप्राय समूलं तद्विनश्यति । विप्रं निमन्त्रयेद्यस्तु भोजनं नैव कारयेत् ॥
तदात्मकल्पनात्पापं प्राणहत्यासमाह्वयं । यदर्थं दीयते दानमन्यकस्मै प्रदीयते ॥
तदात्मकल्पनाल्लोकश्चाण्डालत्वं प्रजायते । धर्मकर्मविहीनस्तु वैमुख्यं देवपितृतः ॥
फलञ्च छेदने कस्य पुत्रशोकमवाप्नुयात । द्विजनैमंत्रणं कृत्वा यद्वस्तु भापयेत्क्वचित् ॥
तमेव नैव कुर्वन्ति भोजनं निष्फलं भवेत् । शिशुकं शुष्कबीजञ्च रक्तं व श्वेतचन्दनं ॥
जगन्नाथाम्बिकायैव भानुरूपायचिच्छिदे । हरिते नैव दोषः स्यात् प्रतिमानिर्मिताय वै ॥
बलान्मोहेन कस्यैव पुस्तकं जगृहे नृपः । समूलनाशमायाति ब्राह्मणात्मविकल्पनात् ॥
स्थानभ्रष्टं करोद्राजा समूलञ्च विनश्यति ।

इति प्रायश्चित्तनिषेधः । तत्रादौ गोवधप्रायश्चित्तः । स्कान्दे—

प्रायश्चितं विना गोहा नारीहस्ताद्वधं लभेत् । वर्षं षट्कं गृहं त्यक्त्वा सप्ततीर्थं समाचरेत् ॥
गंगा चर्मण्वती वेत्रा यमुना गण्डकी नदी । सिन्धुश्च कर्मनाशाख्या सप्ततीर्थाः प्रकीर्तिता ॥
एषां स्नपनमात्रेण गोहत्यान्मुच्यते नरः । देवीव्रतं समाचक्रे भुञ्जीयान्मिष्टफेणिका ॥
नक्तव्रतं च षड् वर्षं ब्रह्मचर्यसमन्वितः । स्त्रीयोनिं लभते कोको प्रायश्चित्तं विनाधमः ॥
देवप्रस्थप्रमाणेन सौवर्णिः सप्तगाःकरोत् । बहुधा रक्तपट्टेन वाससा गुप्तछादिताः ॥
सप्ततीर्थकृतादानात् गोहत्या मुच्यते यदा ॥ इति गोवधप्रायश्चित्तदाननिर्णयः ।

ततो गोबधापराधप्रायश्चित्ते विष्णुमन्त्रः । आदिपुराणे—

नमस्ते गरुडारूढ़ विष्णवे प्रभविष्णवे । कमलापतये देव गोऽपराधं निवारय ॥ इति द्वात्रिंशाक्षरो विष्णुमन्त्रः

अस्य मन्त्रस्य सांख्यायनर्षि, विष्णुर्देवता, गायत्रीछन्दः मम गोवधापराधविमोचने प्रायश्चित्ते जपे

विनियोगः न्यासं पूर्ववत् । शिरसि सांख्यायनाय ऋषये नमः मुखे गायत्री छन्दसे नमः हृदये विष्णुदेवतायै नमः इति न्यासः । अथ ध्यानं—

वन्दे विष्णुं रमाकान्तं पुण्यशीलादिभिर्युतं । गोघ्नापराधहन्तारं जगत्त्रयहितैषिणं ॥

इति विष्णुरूपं ध्यात्वा—

मृगचर्म समादाय लक्ष्मीनारायणस्तले । उत्तराभिमुखो भूत्वा त्रिसहस्रमिदं जपेत् ॥

द्वादशं ग्रन्थिसंज्ञकं प्रायश्चित्ते च दीयते । शक्रद्वारकृताभिक्षा गोलिंगेन समाकुलः ॥

तदैव मुच्यते हत्या गवां धर्मार्थनाशिनी ॥

इतीव दानतीर्थानि प्रायश्चित्तं विधाय च । गोवर्धने च श्रीकुण्डे उर्जस्नानसमाचरेत् ॥

तदापराधमुक्तस्तु सर्वसौभाग्यमाप्नुयात् ।

इति गोवधापराधप्रायश्चित्ते विष्णुमन्त्रः । देवराजर्षिशापान्वितोयंमन्त्रः—

अस्य श्रीदेवराजर्षिशापप्रमोचनम्यौर्व ऋषिः पद्मावती देवता कान्तिछन्दः मम देवराजर्षिशापप्रमोचने जपेवि०—इति देवराजर्षिशापमुक्ताभवः—अष्टवाराञ्जलीः नीत्वा ह्यष्टपूर्वादिषु क्षिपेत्- इति देवराजर्षि शापमोचनः ।

अथ वृषवधापराधप्रायश्चित्ते कृष्णमन्त्रः । वाराहे—

वृषहत्यापराधे च प्रायश्चित्तं च गोसमं ।

ओं कृष्णाय वासुदेवाय देवकीनन्दनाय च । नमस्ते वृषहत्याघ्ने गोपिकावल्लभाय च ॥

इति द्वात्रिंशाक्षरो कृष्णमन्त्रः । अस्य मन्त्रस्याश्वलायनर्षिः श्रीकृष्णो देवता जगती छन्दः मम वृषवधापराधविमोचने प्रायश्चित्ते कृष्णमन्त्र ज० वि० न्यास० पू० अथ ध्यानं—

पद्मोत्वन्नयने स्मरामि सततं भावो भवत्कुंतले ; नीलेमुह्यति किंकरोमिमहितैः प्रीतोस्मि ते विभ्रमैः॥

इत्युत्स्वप्नवचो निशम्य सरूषा निर्भत्सतो राधया । कृष्णस्तद्विपिनेतद्यपदिशः क्रीडाविटः पातु वः ॥

इति ध्यात्वा—व्याघ्रचर्म समादाय धातृवृक्षस्तले जपन् । ईशानाभिमुखो भूत्वाद्विसहस्रमिदं जपेत् ॥

रुद्रग्रन्थि च गोदानं विप्राय च प्रदापयेत् । रुद्रद्वारकृताभिक्षा वृषहत्या विमुच्यति ॥

प्रस्थैकादशमानेन शिवरुद्रस्वरूपकं । रुक्मस्य विधिवत्कृत्वा तण्डुलेन सुगोप्यकं ॥

सितेन वाससा बध्वा गुप्तदानं समाचरेत् । गोवर्धने प्रियाकुण्डे कार्तिकस्नानमाचरेत् ॥

पूर्वषट्तीर्थकं कृत्वा ततो गोवर्धनं चरेत् । गणेशस्य व्रतं कुर्यादन्नोदनमभोजयेत् ॥

वर्षत्रयं गृहं त्यक्त्वा ब्रह्मचर्यसमन्वितः । कर्षद्वयं रुक्मपात्रं प्रस्थतण्डुलपूरितं ॥

नित्यदानं करोद्धीमान् वृषहत्याद्विमुच्यते ।

इति वृषवधापराधप्रायश्चित्ते कृष्णमन्त्रः—शौनकर्षिशापान्वितोऽयं मन्त्रः ।

अस्य श्रीशौनकर्षिशापप्रमोचनमन्त्रस्य—मधुछन्दः ऋषिर्भुवनेश्वरी देवता—विश्वच्छन्दः मम शौनकर्षिशापविमोचने ज० वि० इति शौनकर्षिशापमुक्ताभवः । नवभिरञ्जलीर्नीत्वा पश्चिमस्यां दिशि क्षिपेत् ।

अथ महिषीवधापराधप्रायश्चित्तः । कुलार्णवे—

मासत्रयं गृहं त्यक्त्वा गंगायमुनयोः स्नपन् । यमराजं सुवर्णस्य पञ्चकर्षप्रमाणतः ॥

मूर्तिं कृत्वा विधानेन रक्तपट्टेन छादितां । कृष्णगोरवरुढाढ्यं तीर्थेदानं समाचरेत् ॥

स्वर्णं पलार्द्धकं नीत्वा सार्द्धप्रस्थं तिलं सितं । नित्यदानं करोत्यस्तु दक्षिणाभिमुखोभवन् ॥

यमस्य दीपदानं तु रात्रौ नित्यं समाचरेत् । तदैव महिषी हत्यान्मुच्यते नात्र संशयः ॥
सोमरुद्रव्रतं कुर्य्यात्प्रायश्चित्तमितीरितं । प्रायश्चित्तं विना रोगो मनस्तापं दरिद्रता ॥
दर्शनं यमराजस्य नित्यमेव प्रजायते । महिष्यारोहणस्यापि ह्यलक्ष्मी च वसेद्गृहे ॥

इति महिषीप्रायश्चित्तनिषेधः । ततो महिषीवधापराधप्रायश्चित्ते चंडीमन्त्रः—दुर्गारहस्ये । ओं क्लीं श्रां ग्लौं, चंडदेव्यै नमः इति दशाक्षरचंडीमन्त्रः अस्य मन्त्रस्य रुद्र ऋषिश्चंडी देवता उष्णिक् छन्दः मम महिषीवधापराधप्रायश्चित्ते चंडीमन्त्रजपे विनियोगः । न्यासं पूर्ववत् । अथ ध्यानं—

ध्यायेच्चंडीं महादेवीं चण्डमुण्डविनाशिनीं । महिष्यासुरहन्त्रीं त्वां महिषीपापनाशिनीं ॥
इति ध्यात्वा-त्रिसहस्रमिदं जप्त्वा श्यामकम्बलसंस्थितः । दक्षिणाभिमुखो भूत्वा बिल्ववृक्षस्तले जपन् ॥
गुह्यातिगुह्यगोप्त्रिस्त्वं गृहाण परमेश्वरि ! । त्रिवारांजलिमादाय नैरृतं कोणमुत्क्षिपेत् ॥

इति महिषीवधापराधप्रायश्चित्ते चण्डीमन्त्रः । अस्य मन्त्रस्य शापो नास्ति ।

अथाश्ववधापराधप्रायश्चित्तः । हयग्रीवपञ्चरात्रे—

दशमासं गृहं त्यक्त्वा गंगा वेत्रवतीं चरेत् । सूर्य्यस्य प्रतिमां कृत्वा नवकर्षसुवर्णतः ॥
रक्तवस्त्रेण संगोप्य तीर्थदानं समाचरेत् । पलद्वयं सुवर्णं तु नित्यदानं समाचरेत् ॥
पूर्वाभिमुखमाविश्य मन्त्रजाप्यं विधानतः । प्रायश्चित्तं विना तापं मनसस्तु प्रजायते ॥
सप्तम्यास्तु व्रतं कुर्य्याद्दध्योदनमभोजयेत् । अश्वहत्या विमुक्तस्तु सर्वदा विजयी भवेत् ॥

इत्यश्ववधापराधप्रायश्चित्तनिषेधः । ततो प्रायश्चित्तेऽश्विनीकुमा मन्त्रः । वायुपुराणे—ओं ह्रां ह्रीं ह्रूं अश्विनीकुमाराभ्यां स्वाहा इति द्वादशाक्षरोऽश्विनीकुमारमन्त्रः । अस्य मन्त्रस्य नारद ऋषिरश्विनीकुमारो देवता जगती छन्दः ममाश्ववधापराधविमोचने प्रायश्चित्तेऽश्विनीकुमारमन्त्रजपे वि० न्या० पूर्ववत् ।
अथ ध्यान—अश्वापराधहन्तारावश्विनौ देवसत्क्रिकौ । नमामि शुभदौ काम्यौ कुमारौ सुमनोहरौ ॥
इति ध्यात्वा – द्विसहस्रमिदं जप्त्वा पलाशपिप्पलस्तले । शुक्लासनं समादाय कुमारप्रीतये ततः ॥
सप्ताञ्जलौ जलं नीत्वा ह्युत्तरस्यां दिशि क्षिपेत् ।

इत्यश्ववधापराधप्रायश्चित्तेऽश्विनीकुमारमन्त्रः । अस्य मन्त्रस्य शापो नास्ति ॥

अथ श्वानवधापराधप्रायश्चित्तः । भैरवीयतन्त्रे—

श्वानस्य तु वधे कार्य्ये श्वानयोनिं व्रजेदसौ । पुनः पुनर्दशावृत्याऽकालमृत्युमवाप्नुयात् ॥
प्रायश्चित्तं विना हत्यां नरेभ्यो गुप्तमाचरेत् । पुत्रशोकं समालभ्य वध्वाः वैधव्यमीक्षयेत् ॥
श्वानवत्तत्रिमाप्नोति संतापं च क्षणे क्षणे । शुनीवधं करोत्यस्तु कन्यावैधव्यमीक्षते ।
सप्तजन्म भवेत्कन्या हृदयोपरिगामिनी । वर्षत्रयं गृहं त्यक्त्वा पंचतीर्थं समाचरेत् ॥
गंगा वेत्रवती भद्रा गण्डकी यमुना तथा । वर्षत्रयान्तरे पञ्चतीर्थानां स्नानमाचरेत् ॥
श्वानहत्या विमुक्तस्तु नक्तभोजनमाचरेत् । प्रकृतिप्रस्थमानेन सौवर्णैः पञ्चमूर्त्तयः ॥
श्यामांगपट्टवस्त्रेण छादयेद्विधिपूर्वकं । पंचतीर्थो कृतं दानं श्वानहत्याद्विमुच्यति ॥
सुवर्णं टंकमानेन गोधूमचूर्णगोप्यकं । विप्राय नित्यदानं हि दत्वा मुक्तिमवाप्नुयात् ॥

इति श्वानवधप्रायश्चित्ते दाननिर्णयः । ततः श्वानवधापराधप्रायश्चित्ते मुक्तिभैरवमन्त्रः । मंथानभैरवीये—" ओं ह्रां श्रीं क्लीं श्रीं मुक्ति भैरवाय स्वाहा" इति द्वादशाक्षरो मुक्तिभैरवमन्त्रः । अस्य मन्त्रस्य जन्हु ऋषि मुक्तिभैरवो देवता बृहती छन्दः । मम श्वानवधापराधमुक्तये प्रायश्चित्ते ज० विनियोग न्या० पूर्ववत्

अथ ध्यानं—श्वानापराधपापघ्नं मुक्तिदं भैरवं भजे । ऋणमुक्तिप्रदं नृणां शून्यदारिद्रनाशनं ॥
इति ध्यात्वा—कुञ्जाशोकतले स्थित्वा श्यामासनविराजितः । ईशानाभिमुखो भूत्वा द्विसहस्रमिदं जपेत् ॥
व्यतीय त्रिणिवर्षाणि ग्रामं नीत्वा करोदयम् । शीतकण्ठमहादेवं मुक्त्यै स्थापयेऽत्रहि ॥
मत्स्यावतारविष्णोश्च जन्मन्यवसरे दिने । स्थापयेद्रुद्रमूर्तिं तु स्नानपापौघमुक्तये ॥

मत्स्यावतारजन्मनिर्णयः । मात्स्ये—

मत्स्यादि पंच गोप्यास्ते तीर्यङ्कूर्म्मादिमूर्त्तयः । वराह राम कल्की च बौद्धो षङ्गोप्यसंज्ञिकं ॥
स्वकीयेषु पुराणेषु जन्मन्यवसरं दिनं । लिख्यते गोप्यसंज्ञाभिः दशधा जन्मसंज्ञिका ॥
मत्स्यकूर्मो वराहश्च नारसिंहोऽथ वामनः । रामो रामश्च रामश्च बौद्धः कल्कीरिति स्मृताः ॥
वृतो मध्यावतारस्तु सत्यार्थवरदानतः । प्रसंगाद्दशधा प्रोक्ताः देवोत्सर्गादिहेतवे ॥
पौष्यमास्यसिते पक्षे पंचमी सोमसंयुता । मघानक्षत्रसंयुक्ता प्रीतियोगसमन्विता ॥
सूर्योदयात्समारभ्य घटिका द्वितयं गता । लग्ने धनुषि संस्थे च शंखासुरप्रपीडितैः ॥
धर्म्मं कर्म्म विहीनैस्तु वेदाध्ययनवर्जितैः । देवैः प्रणोदितो विष्णुस्तीर्थराजे च नैमिषे ॥
ऋषेस्तु पितृभावेन ह्यञ्जलौ प्रपतद्भुवि । शयिता पुत्रभावेन संन्यसेच्चक मंडलौ ॥
तत्र प्रवर्द्धितो मत्स्यो कूपमध्ये विनिक्षिपेत् । निःसार्य्य कूपमध्याच्च तडागेऽसौ विनिक्षिपेत् ॥
तत्र प्रवर्द्धितो विष्णुरर्णवे निःक्षिपेत् मुनिः । मत्स्यावतारसंभूतो शंखदैत्यं विचिन्वयन् ॥
वेदवेदार्थलाभाय शंखदैत्यवधाय च । क्षीराब्धौ क्रीडमानोऽसौ मत्स्यो नारायणो भवत् ॥
वेदान्नीत्वा ददौ विष्णुः देवेभ्यो स्तुतिमाददे । एवं मत्यदिने जाते रामकृष्णादिमूर्त्तयः ॥
तेषां च मन्दिरेष्वेषु वेदस्तौर्ति समाचरेत् । सर्वदा सुखसम्पद्धिर्द्धिधान्यादिसंचयैः ॥
कुबुद्धिर्नश्यते ऽत्रैव सुबुद्धिस्तु प्रजायते । सर्वदा जाड्यसंपन्नो विद्यावान् जायते नरः ॥
वेदार्थभावको जातः मत्स्यजन्मोत्सवकृतात् । विष्णवे प्रणतिं कुर्य्यान्नानाद्रव्यार्थमाप्नुयात् ॥

इति मत्स्यावतारजन्मनिर्णयः ॥

अथ कूर्म्मावतारजन्मनिर्णयः । कौर्म्ये—

देवैर्विज्ञापितो विष्णुर्भूमेर्भारधृताय च । चैत्रे मासि सिते पक्षे द्वितीया सोमसंयुता ॥
अश्विन्यर्क्षप्रयुक्ता स्यात् प्रीतियोगसमन्विता । सूर्योदयात् समारभ्य घटिका षोडशा गताः ॥
कर्कलग्नोदये जाते कूर्म्मो नारायणोऽभवत् । वसुन्धरा बभौ तस्मिन् कूर्म्मे भारधृते यदि ॥
नद्यादौ जलपूजां च कुर्युर्नानार्थं मंगलैः । द्वितीये दिवसे गौरी जलपूजनमाचरेत् ॥

इति कूर्मावतारजन्मनिर्णयः ।

अथ वाराहावतारजन्मनिर्णयः । वाराहे—

प्रलयेऽब्धौ धरामग्ना देवैर्विज्ञापितो हरिः । तस्याः निःसारणार्थाय क्रीडाक्रोडतनुर्भवेत् ॥
मार्गे मासि सिते पक्षे नवमी शनिसंयुता । पूर्वभाद्रपदाविष्टा वज्रयोगसमन्विता ॥
सूर्योदयप्रवृत्या तु घटीसप्त व्यतीयते । लग्ने च मकरे संस्थे वाराहोऽवतरद्भुवि ॥
पातालादागता पृथ्वी तुंडाग्रधृतभूपिता । पृथिव्यां सर्वकर्म्माणि जायते ह्यनघाः फलाः ॥

इतिवाराहावतारजन्मनिर्णयः ।

अथ भार्गवावतारजन्मनिर्णयः । ब्रह्मांडे—

क्षत्रपापकुला पृथ्वी तस्याः ह्युद्धरणाय वै । क्षत्रियाणां विनाशाय निःक्षत्रियकृतार्थिने ॥

ब्रह्मर्षि र्यमदग्निस्तु रेणुकाख्या पतिव्रता । चक्रतुश्च व्रतं श्रेष्ठं विष्णुपुत्रार्थं दंपती ॥
सत्यव्रतो महाविष्णु र्ब्राह्मण्यकुलसंभवः । माघे मासि सिते पक्षे सप्तमी सोमसंयुता ॥
अश्विन्यर्क्षं समाविष्टा शुभयोगसमन्विता । मुहूर्ते ब्राह्मणे जाते लग्ने धनुषि संस्थिते ॥
रेणुका जनयत्पुत्रं जगज्ज्योतिकलामयं । यमदग्निः पिता तस्य रामेण वपुषा हरेः ॥
नाम्ना परशुरामाख्यं चकार कुलदीपकं । दीपे प्रज्वलिते कीटाः पतंगाद्याः विनश्यति ॥
यमदग्निसुते जाते क्षत्रियाः नाशमाप्नुयुः । अचला जायते पृथ्वी धर्म्य कर्म्म समाकुला ॥
ब्राह्मणैः राजभिः पूर्णा नानायज्ञार्थसंपदः । निःकल्मषा निरातंका नाना द्रव्यार्थदायिनी ॥

इति परशुरामावतारजन्मनिर्णयः ।

**अथ बौद्धावतार जन्म निर्णयः । भविष्योत्तरे—**

धर्म्माधर्मविवेकाय लोकानां भयहेतवे । अधर्म्म दर्शनार्थाय बौद्धो नारायणो ऽभवत् ॥
आश्विने कृष्णपक्षे तु दशमी गुरुसंयुताः । पुनर्वस्वर्क्षं सयुतां परिघेन समन्विता ॥
सूर्योदये घटी जाता षट्लग्ने तुलसंस्थिते । सत्यार्थभाषणार्थाय बौद्धो नारायणोऽभवत् ॥
ब्रह्मकुलजदैत्यानां वधपातकसंभवात् । हस्तौ छित्वा हरिः साक्षात्परस्त्रीगमनोद्भवात् ॥
पादौ छित्वा जगन्नाथः लोकानां दर्शनाय च । संस्थितो भगवान्भूमौ धर्म्माधर्म्म विवेकवित् ॥
मिथ्यात्मकलत्रनाद्दोषाद्धरिर्दारुकलेवरः । धर्मपत्न्यास्तु सीतायाः शुद्धायाः भगवान्प्रभुः ॥
एवं लोको भवेद्रोगी स्त्रीशापा दुःखितो सदा । मिथ्याभिशंसनाद् योषाद्दरिद्रेण सदान्वितः ॥

बौद्धायने—विप्राणां ताडनेनैव पाणिहीनो नरो भवत् । परस्त्रीगमनात्पापात्पादखंजस्तु जायते ॥
अपवादकलंकेन ह्यथवा कुष्ठसंभवात् । हस्तपादविहीनस्तु जायते पापसंभवात् ॥

इति बौद्धावतारजन्मनिर्णयः ॥

**अथ कल्क्यवतारजन्मनिर्णयः । भविष्ये—**

अति चौराकुलां पृथ्वीं दृष्ट्वा नारायणो हरिः । समराख्ये पुरे रम्ये कल्कीरूपो भवेत्स्वयं ॥
श्रावणे कृष्णसप्तम्यां रेवती भृगुसंयुते । धृतियोगसमायुक्ते दुर्दिने भयविह्वले ॥
चतुर्दशघटीजाते कन्यालग्नमुपस्थिते । चौराणां नाशनार्थायावतारद्धरिरीश्वरः ॥

इति दशावतार जन्म निर्णयः ॥

गोदानं सप्तसंख्याकं दत्वा मुक्तिमवाप्नुयात् । शतसंख्यान् द्विजांश्चैव भोजयेद्विधिपूर्वकम् ॥
श्वानहत्याविमुक्तस्तु प्रायश्चित्ताभिधानतः । मोक्षाख्यं पदवीं लब्ध्वा धनधान्यसुखं लभेत् ॥

इति श्वानवधापराधप्रायश्चित्ते मुक्तिभैरवमन्त्रः । धौम्यर्षिशापान्वितोऽयं मन्त्रः । अस्य श्रीधौम्यर्षि-शापप्रमोचनस्य बृहदारण्यकर्षिः महाकाली देवता त्रिष्टुप् छन्दः मम धौम्यर्षिशापप्रमोचने जपे विनियोगः । इति धौम्यर्षि शापमुक्ता भवः । "दशावृत्यांजलीः नीत्वा नैऋतं कोणमुत्क्षिपेत्" इति धौम्यर्षिशापप्रमोचनः ।

**अथ बिडालवधापराधप्रायश्चित्ते दामोदरमन्त्रः—**

ओं ह्रीं क्लीं श्रीं दामोदराय स्वाहा इति दशाक्षरो दामोदरमन्त्रः अनेन प्रा० त्र० कुर्यात् । अस्य मन्त्रस्य नारद ऋषिः दामोदरो देवता गायत्री छन्दः मम बिडालवधापराधविमुक्तये प्रायश्चित्ते जपे विनियोगः न्या० पू० अथ ध्यानं—

बिडालपापघ्नमजं सुरेशं दामोदरं सुन्दर विश्वसाद्यं । वन्दे सदा कारुणिकस्वरूपं जगत्त्रयेशं शुभ दायकान्तं ॥

इति दामोदरस्वरूपं ध्यात्वा—

त्रिसहस्रजपेन्मन्त्रं शमीवृक्षस्तले शुचिः । त्रिवर्णासनमादाय वायव्याभिमुखः स्थितः ॥
विडालवधपापात्तु मुच्यते नात्र संशयः । प्रायश्चित्तं विना लोकः समूलं च विनश्यति ॥
इति बौद्धायने ।
नवतीर्थं समाचक्रे गंगा वेत्रवती तथा । सरयू चन्द्रभागा च सिंधु कावेरी गंडकी ॥
वैसुली कर्मनाशा च नवसंख्या प्रकीर्तिताः । सार्द्धं वर्षत्रयं गेहं त्यक्त्वा तीर्थं समाचरेत् ॥
एकरोमं विडालस्य भ्रंशनं कुरुते नरः । तत्प्रमाणं सुवर्णस्य रोमदानं करोति सः ॥
तदैव मुच्यते पापात् धनधान्यसुखं लभेत् । नवरात्रं जिताहारस्त्वेकान्तरव्रतं चरेत् ॥
प्रायश्चित्तविधानेन पूर्वजां पदवीं लभेत् । नैव कुर्याद्विधानेन गर्वतो जडतांधतः ॥
अलक्ष्मीं लभते शीघ्रं सर्वथाः नश्यते क्षणात् । फलाहारं च भुञ्जीयादेकान्तरव्रतेन च ॥
चान्द्रायणं शुभं प्रोक्तं पापे वैडालसम्भवे । व्रजेच्चाण्डालकीं योनीं प्रायश्चित्तं विना नरः ॥
प्रस्थाष्टादशमानेन सौवर्णिः प्रतिमाःनवः । प्रस्थद्वयप्रमाणेन वैडालस्य कलेवरं ॥
एकमेकान्तरेणैव प्रतितीर्थे समागते । दधिनाछादितं कृत्वा दानं दद्याद्विजातये ॥
नवतीर्थ कृतादानात् स्नानाच्चैवमुपोषणं । विडालसंभवपापान्मुच्यते नात्र संशयः ॥
दशगुञ्जाप्रमाणैश्च घृते क्षिप्त्वाहिरण्मयम् । नित्यमेव कृतं दानं मोत हत्याद्विमुच्यते ॥
सार्द्धं च तृतीयं वर्षं व्यतीयासौगृहागमत् । तत्रैव दशगोदानं ग्रन्थिसंज्ञाकमाचरेत् ॥

ज्योतिर्निबन्धे—

विडालो भुक्तिजतान्नं वा कच्चान्नं भक्षयेद्यदि । वर्षत्रयान्तरे जातं दुर्भिक्षं स्यान्महर्घता ॥
नरादिपशुजातीनां मृत्युलाभादिनाशनं । तद्दोषशमनार्थाय शान्तिदानं समाचरेत् ॥
दुर्भिक्षशमनार्थाय प्रायश्चित्तमितीरितं । गोधूमयवशालीकमुद्गमासमसूरिका ॥
घृततैलमितिख्यातं चतुर्दशमणाभिधम् । समन्तान्नवकं धृत्वा स्वयं मध्यस्थलेविशत् ॥
अर्द्धरात्रे कृतं दानं दुर्भिक्षशमनं भवेत् । विडालस्य वधे कार्ये जगन्नाथस्वरूपकं ॥
सर्वदा पूजनार्थाय स्थापयेत्स्वच्छमन्दिरे । विडालस्यापराधोसौ सप्तजन्मसु दह्यते ॥
कौभेरिवैजकं शिशुः ह्याम्रीकाष्ठ चतुर्थकैः । कलेवरः शुभः प्रोक्तो जगन्नाथस्य सिद्धिदः ॥
एवं नन्दस्य भानोश्च कलेवरवरप्रदः । कुंभेरिनिर्मिते मूर्तौ सहस्रकलयान्वितः ॥
धनधान्यसुतोत्पत्तिरिष्टसिद्धिप्रदायकः । वीजैसारसमुद्भूते तदर्द्धं कलयान्वितः ॥
द्रव्यार्थकामनासिद्धिर्लोकप्राधान्यदायकः । शिशुकाष्ठसमुद्भूते तदर्थं कलयान्वितः ॥
पशुवाहगवादीनां नानाभोगप्रदायकः । आम्रीकाष्ठमयीभूतो भयहालोकसौख्यदः ॥
तदर्थकलयायुक्तो लक्ष्मीवन्तं जनं करोत् । नन्दभानुर्जगन्नाथस्तेषां मूर्तिप्रकीर्तिता ॥
पाषाणनिर्मितास्तेषां मर्तयो विघ्नतां ययुः । कदापि नैव कर्त्तव्याः पाषाणस्य स्वरूपकाः ॥
पंचकाष्ठेन देव्यास्तु मूर्तिः स्याच्छुभदायिनी । श्वेतार्क वैजसारश्च कुभेर्याम्री च शिंशुपाः ॥
एतैः काष्ठैः समुद्भूता चण्डिकाप्रतिमाशुभा । पाषाणसम्भवा देवी सर्वदैव वरप्रदा ॥
जगन्नाथानुसारेण सहस्रकलयान्विता । अन्यकाष्ठसमुद्भूताः मूर्त्तयो भयदायकाः ॥
देशोपद्रवकर्त्तारो समूलोत्पाटदाऽशुभाः । दशावतारमूर्त्तिनां पाषाणप्रतिमाशुभा ॥
कृष्णावतारोद्भवमूर्त्तयस्ते पाषाणरूपाः शुभदाः सदास्तु ।
राधादयो निर्मितधातुमूर्त्तयः पाषाणभूताः शुभदाः स्म लोके ॥

यथैव रामादिचतुः स्वरूपाः पाषाणधातुप्रचुराः शुभाः स्युः ॥
कृष्णादिषट्स्वरूपास्ते यदि स्युर्दारुरूपिणः ॥

षट्स्वरूपाः—श्रीकृष्णः बलदेवोऽथ गोविन्दो देव उच्यते । मदनमोहनो नाम गोपीनाथविहारिणः ॥
इति षट्स्वरूपाः ।

वायुना नोदिता वन्हिः निर्मूलं नगरं दहेत् । कदापि नैव तिष्ठेत ग्रामो भस्म भवो यदा ॥
दशवर्षप्रमाणेन मुखं नैवाविलोकयेत् ॥ इति ब्राह्मे ॥

विघ्नस्वरूपिणं पूजा ब्रह्महत्या दिने दिने । अमंगलमृणं दुःखं रोगशोकदरिद्रता ॥
विडालदोषशान्ताय स्थापयेत् बौद्धसंज्ञकं । कूर्मजन्मदिने प्राप्ते स्थापयेद्विधिपूर्वकं ॥
परकायाप्रवेशाख्यमन्त्रपूर्वप्रयोगकं । कलेवरे यदा पूर्णे मक्षिकाभ्यस्तु रक्षयें ॥
मस्तके जीवसंस्कारमेकस्मिन् दिवसेऽभवत् । द्वितीये हृदये जातं तृतीये बाहुमूलयोः ॥
चतुर्थे जंघयोश्चैव पंचमे नेत्रनासिके । षष्ठे कर्णद्वयोश्चैव सप्तमे पादमूलयोः ॥
अष्टमे पृष्ठिभागं च नवमे च स्तनद्वये । मुखं च दशमे जातं गलमेकादशे दिने ॥
नाभिलिंगगुदादन्तनेत्रं स्याद्द्वादशे दिने । जिह्वाकेशनखाः रोमाः स्युस्त्रयोदशवासरे ॥
सर्वांगावयवे पूर्णे त्रयोदश दिनान्तरे । कर्त्तव्यं पक्षमेकं तु प्रयोगं लक्षपञ्चकं ॥
एवं दारुमये प्रोक्ता पाषाणे धातुसंज्ञिके । त्रिविधे मूर्त्तिसंस्कारे विधिरेका प्रकीर्त्तिता ॥
राजसेवाधिकारे च त्रिविधाः मूर्त्तयः स्मृताः । विना मन्त्रप्रयोगेन नरेषु च यथाशवः ॥
अकल्याणकराः हि स्युर्दारुपाषाणधातवः ।

भविष्योत्तरे—पूजार्थध्यानार्थशुभार्थमेव विचिन्तनार्थं गुणगोप्यसंज्ञकं ।
स्वप्नार्थमष्टौ कथिताः स्वरूपाः प्रयोगसंज्ञाः भवतीह लोके ॥
शैली दारुमयी लौही लेप्या लेख्या च सैकती । मनोमयी मणिमयी प्रतिमाष्टौ प्रकीर्त्तिता ॥

अथ परकायाप्रवेशमन्त्रः । पारमेश्वरसंहितायां—

ओं ह्रीं क्लीं श्रीं ह्लीं ग्लौं परमात्मने हूं फट् स्वाहा इति पञ्चदशाक्षरो परकायाप्रवेशमन्त्रः । अनेन मन्त्रेण प्राणायामं दशधा कुर्य्यात् । अस्य मन्त्रस्य सनकसनन्दनसनातनास्त्रयो ऋषयः परब्रह्म नारायण-परमात्मनस्त्रयो देवताः गायत्र्युष्णिक्त्रिष्टुप् छन्दांसि विश्वम्भरीकामेश्वरीनन्दजास्त्रयो शक्तयः दुर्गामंगला-रक्तदन्तिकास्त्रयो बीजाः सूर्य्यवाय्वाकाशास्त्रयस्तत्वानि मम शैलदारुधातुमयस्वरूपपरकायाप्रवेशार्थे जपे विनियोगः । ततः अंगन्यासः शिरसि सनकसनन्दनसनातनेभ्यस्त्रृषिभ्यो नमः मुखे गायत्र्युष्णिक्त्रिष्टुप् छन्देभ्यो नमः हृदये विश्वंभरी कामेश्वरी नन्दजाभ्यस्त्रिभ्यो शक्तिभ्यो नमः ततो षडंगन्यासः । ओं ह्रीं अंगु-ष्ठाभ्यां नमः ओं क्लीं तर्जनीभ्यां नमः ओं श्रीं मध्यमाभ्यां नमः । ओं ह्लीं अनामिकाभ्यां नमः । ओं ग्लौं कनिष्ठकाभ्यां नमः । ओं परमात्मने हूं फट् स्वाहा इति करतलकरपृष्ठाभ्यां नमः । इति पञ्चदशाक्षराख्य-परकायाप्रवेशमन्त्रेण षडंगन्यासं कुर्यात् । एवं हृदयादिषु विन्यसेत् । अथ ध्यानं—

वन्दे विष्णुमनादिमीश्वरमजं नारायणं श्यामलं । लक्ष्मीकान्तमनन्तमूर्त्तिमनघं पीताम्बरालंकृतं ।
पद्माढ्यं सुमनोहरांगवपुषं सत्यव्रतं श्रीपदं । सर्वव्यापिजगन्मयं गुणनिधिं दैत्यारिं वेद्याखिलं ॥

इति ध्यात्वा—गोवालव्यजनेनैव स्वरूपे मन्त्रयोजयेत् । गुह्यातिगुह्यमन्त्रेण प्रविवेश हरेऽनघ ! ॥
शैलदारुमये मूर्त्तौ धातुरूपे कलेवरे । प्रसीद कृपयाविष्ट जगन्नाथ हरे प्रभो ! ॥

जितेन्द्रियो शुचि र्भूत्वा ध्युपोपपणपरायण: । दुग्धाहारसमायुक्तो नक्तभोजनमाचरेत् ॥

इति पाषाणदारुधातुमयी त्रिविध स्वरूप प्राणप्रतिष्ठायां परकायाप्रवेश—सिद्धमन्त्रप्रयोग: अस्य मन्त्रस्य शापो नास्ति । इति विडालवधापराधप्रायश्चित्ते दामोदरमन्त्र: अस्य मन्त्रस्य दुर्वासर्षि: । शापो नास्ति । तस्य मोचनप्रयोग: । वसिष्ठसंहितायां—

ओं अस्य श्रीदुर्वासऋषिशापमोचनमन्त्रस्य लोमहर्षण ऋषि दुर्गा देवता त्रिष्टुप् छन्द: मम दुर्वास-ऋषिशापप्रमोचने जपे विनियोग: इति दुर्वासाऋषिशापमुक्ताभव: "चतुर्भिरञ्जली नीत्वा उत्तरस्यां दिशि क्षिपेत्" इति दुर्वासाऋषिशापमोचन: ॥

अथ वानरवधापराधप्रायश्चित्त: । पाद्मे पातालखण्डे—

वानरस्य वधेनैव राक्षसीयोनिमाप्नुयात् । मासत्रयं गृहं त्यक्त्वा गंगापुष्करमाचरेत् ॥
भौमवारव्रतं कुर्य्याद्भोजनं मिष्टसंज्ञकं । ब्रह्मचर्य्यसमायुक्त: वानरद्वितयं करोत् ॥
चतु: प्रस्थ सुवर्णस्य रक्तवस्त्रेण छादितं । तीर्थयो: गोप्यसंज्ञकं दानं दद्यात् द्विजातये ॥
नित्यदानं करोद्यस्तु चतुर्गुञ्जाहिरण्यकं । प्रायश्चित्ते कृते दाने कपिहत्याद्विमुच्यते ॥

इति कपिवधापराधप्रायश्चित्ते स्नानदानप्रयोग: ।

ततो कपिवधापराधप्रायश्चित्ते राममन्त्र:—

कौशल्यानन्दनायैव रामचन्द्राय ते नम: । जानकीपतये तुभ्यं कपिपापविमुक्तये ॥

इति द्वात्रिंशाक्षरो राममन्त्र: । अनेन मन्त्रेण प्राणायाम त्रयं कुर्य्यात् । अस्य मन्त्रस्य अगस्त्यऋषि: रामो देवताऽनुष्टुप् छन्द: मम कपिवधापराधविमोचने प्रायश्चित्ते जपे विनियोग: । न्यासं पूर्ववत् । ध्यानं—

वन्दे रामं किरीटसुन्दरदृशं सीतापतिं श्यामलं । श्रीवत्सांकमनन्तमूर्त्तिमनघं पीताम्बरालंकृतं ॥
विश्वेश्वरं वानरघातपापहं कलानिधिं लक्ष्मणसेवितांघ्रिं ॥

इति ध्यात्वा-उत्तराभिमुखो भूत्वा सहस्रत्रितयं जपेत् । कदम्बस्य स्थले स्थित्वा गोदानं पञ्चकं ददौ ॥

वानरस्य कृता हत्या त्रैवर्गफलनाशिनी । तदापराधमुक्तस्तु सर्वसौख्यमवाप्नुयात् ॥
स्थापयेत् प्रतिमां रामं कपिहत्याविमुक्तये । धातुरूपमयं विष्णुं भार्गवस्य च जन्मनि ॥
नित्य संदर्शनार्थाय रामं नैवोत्थयेद्यदि । चतुर्जन्मसु दृश्यते कपिहत्या समुद्भवा: ॥

इति कपिवधापराधप्रायश्चित्ते राममन्त्र: । दधीच्यर्षि: शापान्वितोऽयं मन्त्र: । अस्य श्रीदधीच्यृषि शापप्रमोचनस्य विश्वामित्रर्षि: भवानी देवता जगती छन्द: मम दधीच्यृषिशापप्रमोचने जपे विनियोग: इति दधीच्यृर्षि शाप मुक्ता भव: "नवाञ्जली: समादाय कोणमाग्नेयमुत्क्षिपेत्" इति दधीच्यृर्षिशापमोचन: ।

अश्वत्थामावधापराधप्रायश्चित्ते कामेश्वरीमन्त्र: । वायुपुराणे—

ओं ऋीं त्रीं त्रौं खं कामेश्वर्य्यै स्वाहा इति दशाक्षरो कामेश्वरीमन्त्र: । अनेन मन्त्रेण प्राणायाम त्रयं कुर्य्यात् । अस्य मन्त्रस्यानन्दर्षि: कामेश्वरी देवता त्रिष्टुप् छन्द: मम श्यामावधापराधविमुक्तये प्राय-श्चित्ते जपे विनियोग: न्यासं पूर्ववत् । अथ ध्यानं—

कामेश्वरीं महादेवीं श्यामाहत्याविनाशिनीं । ध्यायेत्कामार्थदां शुक्लां जीवदोषापहारिणीं ॥

इति ध्यात्वा-ईशानाभिमुखो भूत्वा चन्दनस्य च मालया । जपेन्मन्त्रं सहस्राख्यं श्यामाहत्याविमुच्यति ॥

गृहार्थनाशिनी हत्या नव जन्म विदाहिनी । भागीरथीकृते तीर्थे प्रायश्चित्तं समाचरेत् ॥
तत: श्रीकुण्डस्नानेन श्यामा हत्या विमुच्यति । पञ्चकर्षप्रमाणेन सौवर्णीं मूर्त्तिमाचरेत् ॥

पीतवस्त्रं परिछाद्य दद्याद्विप्राय शान्तये । गोदानं नवकं दत्वा श्यामाहत्याविमुक्तये ॥
अब्दे पूर्णे यदा जाते स्थापयेत्कुंडमर्दिनीं । देव्याः व्रतं विधानेन नक्तभोजनमाचरेत् ॥
इति श्यामावधापराधप्रायश्चित्ते कामेश्वरीमन्त्रः—

कुंभयज्ञर्षिशापान्वितोऽयं मन्त्रः । ओं अस्य श्रीकुम्भयज्ञर्षिशापप्रमोचनस्य विमलर्षिः पद्मावती देवता अनुष्टुप् छन्दः मम कुंभयज्ञर्षिशापप्रमोचने जपे विनियोगः । इति कुंभयज्ञर्षिशापमोचनः ॥
अथ सीताशिखावधापराधप्रायश्चित्तं । मात्स्ये—

सीता सिखावधे कार्ये गवां हत्या शताधिकं । समूलोत्पाटनं कुर्यात् धनधान्यसमूहकं ॥
दशवर्षं गृहं त्यक्त्वा दशतीर्थं समाचरेत् । सरयू गंडकी गंगा यमुना चन्द्रभागका ॥
गोदा वेत्रवती कांची वेणी श्रीकुंडमुत्तमं । दशकल्पलतादानं प्रतितीर्थे हिरण्मयं ॥
दानात्स्नपनमात्रेण शिखाहत्या विमुच्यति । नवम्यास्तु व्रतं कुर्याच्चांद्रायणविधानतः ॥
दशाऽब्दकं व्यतीयाय स्थापयेल्लक्ष्मणं गृहे । नित्यसन्दर्शनार्थाय शिखाहत्या विमुक्तये ॥
वर्षद्वादशकं यावन्नित्यदानं समाचरेत् । दशगुंजाप्रमाणेन सुवर्णं घृतपात्रकं ॥
इति सीताशिखावधप्रायश्चित्ते दानस्नानं ।

ततः प्रायश्चित्ते लक्ष्मणमन्त्रप्रयोगः । वैष्णवीये—

उर्मिलापतये तुभ्यं लक्ष्मणाय नमोस्तु ते । सीताशिखापराधं मे निवारय प्रसीद मे ॥

इति वैष्णवमते द्वात्रिंशाक्षरो सिद्धलक्ष्मणमन्त्रः । अनेन मन्त्रेण प्राणायामत्रयं कुर्यात् । अस्य मन्त्रस्य गृत्समदर्षिः लक्ष्मणो देवता उष्णिक् छन्दः मम जानकीसिखावधापराधविमुक्तये प्रायश्चित्ते जपे विनियोगः । न्यासं पूर्ववत् । ध्यानं—

शेषं निरञ्जनं विष्णुं लक्ष्मणं त्रिपथस्थितं । भ्रातृजायाशिखादोषसर्वपापौघनाशनं ॥ इतिध्यात्वा—
पूर्वाभिमुखमाविश्य वृक्षपर्पटिकास्तले । सहस्रत्रितयं जप्त्वा चम्पकोद्भवमालया ॥
प्रायश्चित्तविधानेन शिखाहत्या विमुच्यति ।

इति सीताशिखावधापराधप्रायश्चित्ते लक्ष्मणमन्त्रप्रयोगः वाल्मीक्यर्षिशापान्वितोऽयं मन्त्रः । ओं अस्य श्री वाल्मीक्यर्षिशापप्रमोचनस्य भृगुर्षि पद्मा देवता कान्ति छन्दः मम वाल्मीक्यर्षिशापप्रमोचने जपे विनियोगः । इति वाल्मीक्यर्षिशापमुक्ता भव: "चतुर्भिरञ्जलीः नीत्वा चतुर्दिक्षु विनिःक्षिपेत्" । इति वाल्मीकर्षिशापमोचनः ॥
अथ प्रतिमाविघ्नकृदपराधप्रायश्चित्तः । वामनपुराणे—

चतुर्विंशे च दैवत्वे ब्रह्महत्याऽब्दद्वादशे । स्वरूपविघ्नकृल्लोको देवहत्याविधायकः ॥
चतुर्विंशाब्दमानेन गृहं ग्रामं परित्यजेत् । राधाकुंडविहीनानि द्वात्रिंशसंख्यकानि च ॥
शततीर्थकृतास्नानाद्देवहत्या विमुच्यति । पूर्वं द्वात्रिंशद्युन्यानि कृत्वा तीर्थानि ग्रामतः ॥
ततः श्रीकुण्डमागत्य षष्ठयाष्टतीर्थसंज्ञकं । स्नात्वा मन्त्रविधानेन व्रजयात्रां समाचरेत् ॥
ततस्तु वनयात्रां तु देवहत्याविमुक्तये । शततीर्थे कृतं दानं शतगोदानसंज्ञकं ।
दशकर्षसुवर्णं तु नित्यदानं समाचरेत् ।

अथ वनयात्रा क्रम प्रसंगः—

व्रजयात्रा प्रसंगे तु वक्ष्ययाम्यनुमानतः । षड्त्रिंशद् वन्हिप्रमाणेन क्रोशसंज्ञाऽभिधीयते ॥

चतुर्मासान्तरेणैव व्रजयात्रां समाचरेत् । नित्यं सार्द्ध द्वयक्रोशं परिश्रमविवर्जितः ॥
चैत्रपूर्णं व्यतीयाय ह्यारम्भो प्रतिपदिनात् । वैशाखाच्छ्रावणं यावत् चातुर्मासप्रदक्षिणा ॥
वैशाखकृष्णपक्षस्य प्रतिपदिने संयुता । बुधवारसमायुक्ता आरम्भोऽत्र विधीयते ॥
श्रावणशुक्लपूर्णायां श्रवणार्क्ष समन्विते । व्रजयात्रां समाप्येत रक्षाबंधनमाचरेत् ॥
ऋषीणां तर्पणं कुर्यात् ब्राह्मणानपि भोजयेत् ॥ १ ॥
व्रजयात्रा मर्य्यादाष्टकोण दिग्विदिक्सुप्रमाणं ।
आदिवाराहे-वनहास्यवनारभ्य पूर्वदक्षिणमध्यगे । एक कोणं समाख्यातं गोपानवनसंज्ञिकं ॥
ततो कोणं द्वितीयं च दक्षिणपश्चिमान्तरे । गोमयाख्यं वनं नाम गोपानातिर्यभागतः ॥
पश्चिमोत्तरयोर्मध्ये त्रिकोणं कमलावनं । पूर्वोत्तरान्तरे जातं चतुष्कोणं हरेर्वनं ॥

व्याख्या—हास्यवनजन्हुबनयो र्द्वयोरभ्यन्तरे गोपानबनं विश्राममेककोणमाग्न्येयं । चतुरशीति क्रोशपरिमितं द्वयोरभ्यन्तरतः द्विचत्वारिंशतिर्यग्भागं प्रदक्षिणाप्रमाणं जन्हुबनपर्वतबनयोर्द्वयोरभ्यन्तरे गोमयाख्यं बनं द्वितीयविश्रामं नैरृतं कोणं चतुरशीतिक्रोशपरिमितं द्वयोरभ्यन्तरतः द्विचत्वारिंशतिर्य्यग्भागं प्रदक्षिणाप्रमाणं पर्वतबनजन्हुबनयो र्द्वयोरभ्यन्तरे कमलाबनं तृतीयविश्राम वायव्यकोणं चतुरशीतिक्रोश-परिमितं द्वयोरभ्यन्तरतः द्विचत्वारिंशक्रोशतिर्य्यग्भागं प्रदक्षिणाप्रमाणं सुह्मवनजन्हुबनयोरभ्यन्तरे हरिबनं चतुर्थविश्रामसीशानकोणं चतुरशीति क्रोशपरिमितं द्वयोरभ्यन्तरतः द्विचत्वारिंशक्रोशतिर्य्यग्भागं प्रदक्षिणा प्रमाणं इति तिर्यग्भागप्रदक्षिणावर्त्तं व्रजमर्यादा षड्त्रिंश त्रिशतोत्तरक्रोशपरिमाणं विंशोत्तर शतसंख्याकप्रतिदिनेषु नित्यप्रत्यागममागमेषु ग्रामग्रामप्रतिप्रवासकेषु सार्द्ध द्वयक्रोशपरिमितग्रामाभिधानेषु वृहद्व्रजगुणोत्सवाख्ये ग्रन्थे समन्त्रमाहात्म्यं नाम्नः वक्षन्ते ॥ २ ॥

---

व्रजयात्रा प्रसंग में विचार पूर्वक अनुमान से ३३६ क्रोश परिमाण निर्णय करेंगे। चातुर्मास्य के बीच में व्रजयात्रा का आचरण होता है। नित्य साढ़े दो क्रोश भ्रमण से परिश्रम नहीं होता है। चैत्र पूर्णिमा बीतने पर वैशाख कृष्णा प्रतिपदा तिथी बुधवार से लेकर श्रावण शुक्ल पूर्णिमा श्रवण नक्षत्र पर्य्यन्त चातुर्म्मास्य है। वैशाख कृष्ण प्रतिपदा से आरम्भ तथा श्रावण पूर्णिमा में समाप्ति करें। समापनान्ते रक्षा बंधन करें। ऋषियों को तर्पण तथा ब्राह्मणों को भोजन देवें ॥ १ ॥

व्रजयात्रा की मर्य्यादा अष्ट कोण विशिष्ट प्रमाणित है। चार दिशा और चार कोण अष्ट कोण हैं। आदिवाराह में—हास्यबन से आरंभ कर पूर्व और दक्षिण के बीच गोपन बन पर्य्यन्त एक कोण है। दक्षिण और पश्चिम के मध्य गोपन बन को तिरछा करके गोमय नामक बन द्वितीय कोण है। पश्चिम और उत्तर के बीच कमलाबन तृतीय कोण है। पूर्व और उत्तर के बीच हरिबन चतुर्थ कोण है। इसकी व्याख्या यथा—हास्यबन और जन्हुबन दोनों का मध्यस्थल गोपानबन एक कोण है। जो आग्नेय कोण है और विश्राम स्थान है ८४ क्रोश व्रजमण्डल का अभ्यन्तर मध्यस्थल ४२ क्रोश तिरछे भाग से प्रदक्षिणा प्रमाण है। सुन्हबन और पर्वत बन के बीच गोमय नामक बन द्वितीय विश्राम स्थल नैरृत कोण है। ८४ क्रोश परि-माण से दोनों के ४२ क्रोश तिरछा भाव से प्रदक्षिणा है। पर्वतबन और सुन्हबन के अभ्यन्तर में कमला-बन तृतीय विश्राम स्थल वायव्य कोण है। ८४ क्रोश परिमाण से दोनों की ४२ क्रोश तिरछे भाव से प्रद-क्षिणा प्रमाण है। सुन्हबन और जन्हुबन का अभ्यन्तर हरिबन चतुर्थ विश्राम स्थल ईशान कोण है। ८४ क्रोश परिमाण से दोनों की ४२ क्रोश तिरछे भाव से प्रदक्षिणा प्रमाण हैं। इस प्रकार तिरछे भाव से

भविष्योत्तरे—

आदौ तु व्रजयात्रां च कुर्य्यात्पापविमुक्तये । ततस्तु वनयात्रां च कुर्य्यात्सर्वार्थसिद्धये ॥ ३ ॥
वनयात्राक्रमोऽत्रैव लिखितो नारदेन च । व्रजभक्तिविलासाख्ये ग्रन्थे सुफलदायके ॥
तथैव व्रजयात्रायाः क्रमो व्रजगुणोत्सवे । यथैव विधिना प्रोक्ता वनानां च प्रदक्षिणा ॥
व्रजभक्तिविलासाख्ये व्रजयात्रा तथैव च । बृहद्व्रजगुणोत्साहे षड्विंशाख्यसहस्रके ॥ ४ ॥

वनयात्रा क्रमं दर्शयेत् । विष्णुयामले—

वनयात्राप्रसंगस्तु त्रयोविंशदिनान्तरे । भाद्रे मास्यसिते पक्षे ह्यष्टमी बुधसंयुता ॥
रोहिण्यर्क्षसमायुक्ता योगहर्षणसंयुता । जन्माष्टमी समाख्याता कृष्णजन्मसमुद्भवा ॥
तद्दिने मथुरां प्राप्य कृष्णजन्मोत्सवं करोत् । तद्दिने वनयात्रायाः सुखसौभाग्यवर्द्धनः ॥
उषित्वा मथुरायां तु रात्रौ जन्मोत्सवं चरेत् । अष्टमीदिवसे चैव विधिरेषा उदाहृता ॥
प्रभातसमये प्राप्ते नवमीदिनसंभवे । नन्दगोपमहोत्साहं कुर्य्याद्ब्राह्मणभोजनं ॥
नानाविधान्नपक्वान्नमिच्छापूर्वं समाचरेत् । वनयात्राक्रमभङ्गं कदाचिन्नैव कारयेत् ॥
वनयात्राक्रमभंगो जायते च कदा ननु । द्विगुणं ह्यपराधं स्यात्पुण्यनाशस्तु जायते ॥
उषित्वा नवमीरात्रौ प्रभाते दशमीदिने । प्रदक्षिणां करोद्धीमान् मथुरायाः नवात्मिकां ॥ ५ ॥
उषित्वा दशमीरात्रौ दिने ह्येकादशीभवे । प्रभातसमये स्नात्वा वनं मधुवनं व्रजेत् ॥

---

प्रदक्षिणा रास्ता ३३६ कोश है, यह व्रज की मर्य्यादा है । १२० कोश ग्रामों का नित्य यातायात प्रतिवास से जानना क्योंकि २॥ कोश प्रमाण से ग्राम समूह हैं । बृहद्व्रजगुणोत्सव नामक सत्कर्तृक निर्मित ग्रन्थ में ग्रामों की महिमा नाम मन्त्र कहेंगे ॥ २ ॥

भविष्योत्तर में—पहिले पापों से विमुक्ति के लिये व्रजयात्रा करें । तदनन्तर सर्वार्थ सिद्धि के लिये वनयात्रा करें ॥ ३ ॥

सुन्दर फल को देने वाले व्रजभक्ति विलास नामक इस प्रस्तुत ग्रन्थ में नारदजी के आवेश स्वरूप हम वनयात्रा का क्रम लिखते हैं । उस प्रकार व्रजगुणोत्सव नामक ग्रन्थ में व्रजयात्रा का क्रम लिखते हैं । जिस प्रकार हमने विधि पूर्वक व्रजभक्तिविलास ग्रन्थ में वनों की प्रदक्षिणा कही है, उस प्रकार व्रजयात्रा २६ हजार श्लोक युक्त बृहद्व्रजगुणोत्साह नामक ग्रन्थ में कही है ॥ ४ ॥

विष्णुयामल में कहा है—वनयात्रा का प्रसंग २३ दिन के भीतर है । भाद्रमास कृष्णपक्ष अष्टमी बुधवार रोहिणी नक्षत्र योगहर्षण दिवस जन्माष्टमी है । जो श्रीकृष्ण के जन्म के कारण से है । उस दिन मथुरा में जाकर श्रीकृष्ण के जन्मोत्सव करें । उस दिन वनयात्रा का प्रारम्भ सुख सौभाग्य बढ़ाने वाला है । रात्रि में मथुरा वास पूर्वक जन्मोत्सव करने की विधि है, नवमी दिवस में प्रभात काल आने पर नन्द गोपों के महान उत्सव, विविध प्रकार पकवान द्वारा इच्छा पूर्वक ब्राह्मण भोजन का आचरण करें । वन-यात्रा में क्रमभंग कभी नहीं करें । यदि कभी क्रमभंग होवे तो द्विगुण अपराध और पुण्य समूह का नाश होता है । नवमी की रात्रि में वहाँ वास पूर्वक दशमी दिवस के प्रभात में ६ कोश परिमित मथुरा की प्रदक्षिणा करें ॥ ५ ॥

साद्धं कोश प्रमाणेन कुर्य्यात्पूर्णप्रदक्षिणां । मधुदानं विधानेन कांस्यपात्रं द्विजातये ॥
ततस्तालबनं गत्वा पादोनकोशसंज्ञिकां । प्रदक्षिणां करोत्यस्तु भूमिदानं समाचरेत् ॥
कौमदाख्यं बनं गत्वा क्रोशार्द्धं च प्रदक्षिणां । कुर्याद्व्रतोपवासेन प्रतिपागमनं चरेत् ॥
पुनर्मधुबनमेत्य फलाहारं समाचरेत् । एकस्मिन्दिवसे कुर्य्याद्बनत्रयप्रदक्षिणां ॥
एकादशीदिने भाद्रे कृष्णेऽदितिसमन्विते । द्वादशीदिनसंभूते प्रभातसमये सुधीः ॥
बहुलाख्यं बनं गच्छेत्द्विक्रोशपरिमाणतः । प्रदक्षिणाविधानेन कुर्य्याच्छांगप्रदक्षिणां ॥
द्वादशीदिवसे रात्रौ उषित्वा प्राप्नुयात्सुखं । कन्यादानं करोत्यत्र फलमिच्छासमं लभेत् ॥
त्रयोदशीदिने जाते राधाकुंडं ब्रजेत्शुचिः । प्रवासं कृतवान् रात्रौ यत्र च नियतेन्द्रियः ॥६॥
प्रभाते च चतुर्दश्यां कुर्य्याद्गिरिप्रदक्षिणां । सप्तक्रोशप्रमाणेन लक्ष्मीवानपिजायते ॥
कृत्वा प्रदक्षिणां पूर्णां चतुर्दश्यां दिने शुभे । प्रवासं कृतवान्रात्रौ गिरौ गोवर्द्धनालये ॥
ततो भाद्रप्रदे मासि कृष्णपक्षे ह्यमादिने । परमन्दिरनामानं बनं गच्छेत्सुधीर्नरः ॥
एकक्रोशप्रमाणेन कुर्य्यात्सांगप्रदक्षिणां । प्रवासं कृतवान्रात्रौ राज्यं प्राप्नोति मानवः ॥
शुक्ले भाद्रपदे मासि प्रतिपद्बुधसंयुता । उत्तरफाल्गुणी युक्ता प्रभाते समयोद्भवे ॥
ब्रजेत्काम्यबनं तस्मात्कामसेनिविनिर्मितं । उषित्वा प्रतिपद्रात्रौ तत्र काम्ये बने शुभे ॥
भाद्रशुक्लद्वितीयायां प्रभातसमये यदि । वैमलाख्ये महातीर्थे स्नात्वा कुर्य्यात्प्रदक्षिणां ॥
सप्तक्रोशमयीं श्रेष्टामष्टाषट्तीर्थगामिनीं । प्रदक्षिणां विधायात्र ब्राह्मणान्भोजयेत्सुधी. ॥
प्रवासं कृतवान्रात्रौ द्वितीयासंभवे दिने । उषितोदितग्रामेषु रात्रौ वासं न कारयेत् ॥
परिश्रमकृतायात्रा विफलत्वं प्रजायते ॥ ७ ॥
तृतीयादिनसंभूते प्रभाते हस्तासंयते । तस्माज्जगाम देवर्षे वृषभानुपुरं बनं ॥
द्विक्रोशसंज्ञकां यस्य कुर्य्यात्सांगप्रदक्षिणां । प्रवासं कृतवान्रात्रौ गौरीपूजा विधायिनीं ॥

---

दशमी की रात्रि में वास पूर्वक एकादशी के प्रभात में स्नानादि कर मधुबन गमन करें । वहाँ १॥ कोश प्रमाण से परिक्रमा करे । विधि पूर्वक ब्राह्मणों को मधु दान और कांस्यपात्र का दान कर तालबन को गमन पूर्वक पौन कोश प्रमाण प्रदक्षिणा और भूमिदान करे । वहाँ से कुमुदबन जाकर आधा कोश प्रदक्षिणा पूर्वक फिर मधुबन में आकर व्रत-विधान, किम्वा फलाहारादि करे । एकादशी के दिन तीनों बनों की प्रदक्षिणा विधि है । द्वादशी के दिन सकाल बहुलाबन को जाकर २ कोश प्रमाण यथाविधि सांग प्रदक्षिणा करें और रात्रि में वास करे । यहाँ कन्यादान करने से इच्छा फल मिलता है । त्रयोदशी आने पर सवेरे राधाकुण्ड में गमन पूर्वक इन्द्रिय निग्रह द्वारा रात्रि वास करें ॥ ६ ॥

सवेरे चतुर्दशी के दिन गिरिराज की ७ कोश प्रमाण से परिक्रमा करे रात्रि में गोवर्द्धन में वास का विधान हैं । अमावस्या के दिन परमदिरा नामक बन के गमन पूर्वक १ कोश प्रमाण प्रदक्षिणा करें । रात्रि में वहाँ वास करने से राज्य फल मिलता है । भाद्रपद का शुक्लपक्ष प्रतिपदा तिथी बुधवार, उत्तरा फाल्गुनि नक्षत्र दिवस सबेरे कामसेनि निर्म्मित काम्यबन को गमन करे । वहाँ उस रात्रि में वास पूर्वक द्वितीया को दिन सबेरे विमल नामक महातीर्थ में स्नान कर ७ कोश की प्रदक्षिणा करें जिसमें ६८ तीर्थ हैं । प्रदक्षिणान्त ब्राह्मणों को भोजन करावें । रात्रि में वहाँ वास करे । जिस दिन जिस रात्रि में जहाँ वास का विधान है सो अवश्य पालन करे । नहीं तो परिश्रम से हुई यात्रा निष्फल होती है ॥ ७ ॥

चतुर्थीदिवसे प्राप्ते प्रभाते त्वाष्ट्रसंयुते । आदौ खदिरवनं गत्वा सपादक्रोशसंज्ञकां ॥
कुर्यात्प्रदक्षिणां प्रीत्या नन्दग्रामं ततो व्रजेत् । तिर्य्यग्मार्गप्रमाणेन जातापूर्णप्रदक्षिणा ॥
तत्रैव नन्दग्रामस्य प्रदक्षिणामथ कुर्यात् । क्रोशद्वयप्रमाणेन परिपूर्णं वरप्रदं ॥
प्रवासं कुरुते चात्र नन्दग्रामे शुभप्रदे । भाद्रं विनान्यमासेषु कुर्य्याद्यदि प्रदक्षिणां ॥
तद्दशांशफलं तस्य जायते नात्र संशयः । भाद्रशुक्ले च पञ्चम्यामृषिपूजाविधायिनी ॥
गच्छेद्भद्रबनं नाम प्रभाते श्रेयवर्द्धनं । पादोनद्वयक्रोशेन कुर्य्याद्भद्रप्रदक्षिणां ॥
प्रवासं कृतवान्रात्रौ समस्तं पञ्चमीदिने ॥ ८ ॥
भाद्रशुक्ले षु षष्ठ्यां तु ललिताजन्मसंज्ञिके । शेषस्य शयनस्थानं लक्ष्मीनारायणस्य च ॥
गच्छेत्प्रभातकाले तु पादोनद्वयक्रोशतः । तस्य प्रदक्षिणां कुर्य्यात्सर्वदा सौख्यमाप्नुयात् ॥
रात्रौ च कृतवान् वासं सर्वान्तकविवर्जितः । भाद्रशुक्ले च सप्तम्यां व्रजेच्छत्रबनं शुभं ॥
सपादद्वयक्रोशेन कुर्य्यात्सांगप्रदक्षिणां । प्रवासं कुरुते रात्रौ छत्रधारी नरो भवेत् ॥
भाद्रशुक्लाष्टमीजाते व्रजेद्वृन्दावनं शुभं । पञ्चक्रोशप्रमाणेन कुर्य्यात्सांगप्रदक्षिणां ॥
उषित्वात्र सुखेनापि परिपूर्णसुखं लभेत् । एतेषां दक्षिणस्थानां बनानां च प्रदक्षिणा ॥ ६ ॥
ततस्तूत्तरदिक्स्थानां बनानां च प्रदक्षिणा । भाद्रशुक्लनवम्यां तु महाबनबनं व्रजेत् ॥
कुर्य्यात्प्रदक्षिणां सांगां चतुः क्रोशप्रमाणतः । प्रवासं कृतवान्रात्रौ पदवीं महतीं लभेत् ॥
दशमीदिनसंभूते प्रभातसमये यदि । बलदेवस्थलं गच्छेन्नानाभोगफलप्रदं ॥
सार्द्धक्रोशद्वयेनैव प्रदक्षिणामथाचरेत् । रात्रौ प्रवासमाचक्रे सर्वकामानवाप्नुयात् ॥
एकादशीदिनेजाते भाद्रमासे सितोद्भवे । व्रजेल्लोहवनं श्रेष्ठं लोहजंघानसंज्ञिकं ॥

---

तृतीया के दिन हस्तानक्षत्र योग प्रभात में वृषभानुपुर जावे । २ कोश प्रमाण से सांग प्रदक्षिणा कर रात्रि में वहाँ वास और गौरी पूजन करें । चतुर्थी दिवस त्वाष्ट्रनक्षत्र में खादिरबन जाकर सवा कोश प्रदक्षिणा पूर्वक नन्दग्राम को जावें । तिरछा भाव से प्रदक्षिणा संपूर्ण होती है । अनन्तर २ कोश प्रमाण से नन्दगाँव की प्रदक्षिणा कर रात्रि में वहाँ वास करें । भाद्रमास के बिना अन्य मास में प्रदक्षिणा दशांश फल को देने वाली है । भाद्र शुक्ल पञ्चमी प्रभात में ऋषि पूजा विधान पूर्वक भद्रबन को जाकर १॥ कोश प्रमाण से प्रदक्षिणा करें । समस्त रात्रि वहाँ वास करें ॥ ८ ॥

भाद्र शुक्ल षष्ठी ललिता जी की जन्म तिथि में प्रभात समय लक्ष्मीनारायण के शेषशयन स्थल को जाकर पौने दो कोश प्रमाण से प्रदक्षिणा करें । रात्रि में शंका आतंक से निर्म्मुक्त होकर वहाँ वास करें । भाद्रपद शुक्ल सप्तमी में छत्रबन को गमन कर २। कोश प्रमाण से सांग प्रदक्षिणा करें । वहाँ रात्रि में वास करने से यात्री छत्रधारी राजा हो जाता है । भाद्र शुक्ला अष्टमी में वृन्दावन के गमन पूर्वक पाँच कोश प्रमाण से सांग प्रदक्षिणा करें । रात्रि में सुख पूर्वक वहाँ वास करें । यह सब दक्षिण भाग की परिक्रमा है ॥ ६ ॥

अब उत्तर भाग में स्थित बनों की प्रदक्षिणा कहते हैं । भाद्र शुक्ला नवमी में महाबन के गमन पूर्वक ४ कोश प्रमाण से सांग प्रदक्षिणा करें । रात्रि में वहाँ वास करने से महान् पदवी को प्राप्त होता है । दशमी के दिन प्रभात में नाना प्रकार के भोग फल को देने वाले बलदेव स्थल को जाकर २॥ कोश

सार्द्धक्रोशप्रमाणेन कुर्य्यात्सांगप्रदक्षिणां । प्रवासं कृतवान्रात्रौ निश्चलेन्द्रियसंयुत: ॥
भाद्रशुक्ले च द्वादश्यां श्रवणर्क्षसमन्विते । गच्छेद्वटं च भाण्डीरं कुर्य्यात्तस्यप्रदक्षिणां ॥
क्रोशद्वयप्रमाणेन बनेन च समन्वितं । भाण्डीरं तु नमस्कारं कुर्य्यात्तत्प्रदक्षिणां ॥
ततो बिल्वबनं गच्छेदर्द्धक्रोशप्रमाणत: । प्रदक्षिणां करोत्तत्र रात्रौ वासं च कारयेत् ॥
त्रयोदशीदिने जाते शुक्ले भाद्रशुभप्रदे । पुनरागमनं कुर्य्यान्मथुरानगरेऽर्थदे ॥
ब्राह्मणान्भोजयेद्यत्र रात्रौ वासं चकार ह । धनधान्यसमृद्धिं च लभते नात्र संशय: ॥
भाद्रशुक्लचतुर्दश्यामनन्तव्रतसंज्ञके । पुनरागमनं कुर्य्याद्दिने काम्यवने शुभे ॥
कृत्वानन्तव्रतं श्रेष्ठं रात्रौ गच्छेद्गढं बनं । तत्र रासोत्सवं दृष्ट्वा रात्रौ वासं चकार ह ॥
प्रभाते पूर्णिमायां तु भाद्रशुक्ले शुभे दिने । दृष्ट्वा कृष्णोत्सवं पूर्णं बनयात्रां समापयेत् ॥
समस्तांचिन्तितान् कामान्प्राप्नोत्यत्र न संशय: । संपूर्णफलदा भाद्रे त्रयोविंशदिनान्तरे ॥
समस्तबनयात्रा स्यात्तदर्द्धं ह्यूर्जमार्गयो: । गोपाष्टम्यां समारभ्य मार्गशीर्षे ह्यमादिने ॥
त्रयोविंशदिनेष्वेषु बनयात्रा समाचरेत् । अनेनैव क्रमेणैव भाद्रादर्द्धफलं भवेत् ॥

इति बनयात्राक्रमप्रसंग: ॥ ११ ॥

प्रतिमाविघ्नप्रायश्चित्ते दानस्नाननिर्णय: । ततो प्रतिमाविघ्नकृदपराधप्रायश्चित्ते विश्वम्भरमन्त्र: । विष्णुयामले—

विश्वम्भराय देवाय देवदोषापहारिणे । नमो ब्रह्मण्यदेवाय देवानां हितकारिणे ॥

इति द्वात्रिंशाक्षरो विश्वम्भरमन्त्र: । अनेन मन्त्रेण प्राणायामत्रयं कुर्य्यात् । अस्य मन्त्रस्य मैत्रावरुणाऋषि: विश्वम्भरो देवता गायत्री छन्द: मम प्रतिमाविघ्नकृदपराधविमुक्तये प्रायश्चित्ते जपे विनियोग: । न्यासं पूर्ववत् । अथध्यानं—

---

प्रमाण से परिक्रमा करे । रात्रि में वहाँ वास करने से समस्त कामना प्राप्त होती है । एकादशी के दिन लोहजंघान नामक लोहवन के गमन पूर्वक १॥ कोश प्रमाण से सांग प्रदक्षिणा करे । वहाँ शान्त चित होकर रात्रि में वास करे । भाद्र शुक्ला द्वादशी श्रवण नक्षत्र में भाण्डीरवट के गमन पूर्वक २ कोश प्रमाण से प्रदक्षिणा करे । भाण्डीरवट को नमस्कार करे । तदनन्तर बिल्वबन जाकर आधा कोश प्रमाण से प्रदक्षिणा पूर्वक रात्रि वास करें ॥ १० ॥

त्रयोदशी तिथि आने पर फिर मथुरा नगर में आवे । वहाँ ब्राह्मणों को भोजन करावे और रात्रि वास करें तो धन, धान्य, समृद्धि लाभ होता है इसमें कोई सन्देह नहीं है । भाद्र शुक्ला चतुर्दशी अनन्तव्रत के दिवस काम्यवन में आकर श्रेष्ठ अनन्त व्रत करें और रात्रि में गढ़बन को जावें । वहाँ रासोत्सव का दर्शन कर रात्रिवास करें । पूर्णिमा के दिन प्रभात में श्रीकृष्ण के उत्सव दर्शन कर बनयात्रा का समापन करें । यात्री चिन्तित फल समूह प्राप्त होता है, इसमें कोई सन्देह नहीं है । भाद्र मास में जो यात्रा है सो सम्पूर्ण फल को देती है । इसका २३ दिन का विधान है, कार्तिक और मार्गशीर्ष में आधा फल मिलता है । गोपाष्टमी के दिन से आरम्भ पूर्वक मार्गशीर्ष अमावस्या पर्य्यन्त २३ दिन का विधान है । इति यह बनयात्रा का प्रसंग है ॥ ११ ॥

अब प्रतिमाविघ्नकारी अपराध का प्रायश्चित कहते हैं अध्याय समाप्ति पर्य्यन्त ।

विश्वम्भरं जगन्मूर्त्तिं सच्चिदानन्दरूपिणं । स्वरूपदोषहन्तारं प्रणमामि कलामयं ॥
कदम्बनिकटे स्थित्वा जपेन्मन्त्रं सहस्रकं । उत्तराभिमुखो भूत्वा ब्रह्मचर्य्यसमन्वितः ॥
पञ्चस्वरूपविघ्नाख्यं प्रतिमां पञ्च वेश्मप् । स्थापयेत्पञ्चगोदानं ग्रन्थिसंज्ञाकमाचरेत् ॥
प्रायश्चित्तमितिप्रोक्तमपराधविमुक्तये ।

इति प्रतिमाविघ्नकृदपराधप्रायश्चित्ते विश्वम्भरमन्त्रप्रयोगः । हिरण्यगर्भशापान्विर्वोऽयं मन्त्रः । ओं अस्य श्री हिरण्यगर्भर्षिशापप्रमोचनस्यार्चर्षिः कामो देवता पंक्ती छन्दः मम हिरण्यगर्भर्षिशाप-प्रमोचने जपे विनियोगः । इति हिरण्यगर्भर्षिशापमुक्तामवः "विशांजलीः समादाय कोणं वायव्यमुद्दिपेत्" इति हिरण्यगर्भर्षिशापमोचनः ।

इति जपित्वा सकलांश्च दोषान्विमुक्तस्तेऽहं प्रवदामि शान्तिं ।
तेषां स्वरूपो नरदेवसंभवो श्रीभट्टनारायणनामधेयः ॥

इति श्रीमद्भास्करात्मज श्रीनारायणभट्टगोस्वामि विरचिते व्रजभक्तिविलासे परमहंससंहितोदाहरणे व्रजमाहात्म्यनिरूपणे श्यामकुंडदृष्टान्ते गवादिवधप्रायश्चित्ताभिधानाख्याने सप्तमोऽध्यायः ॥

## ॥ अष्टमोऽध्यायः ॥

अथ गरुडविघ्नकृदपराधप्रायश्चित्तः । गारुडे—

गरुडध्नेऽपराधे च पदायोरुभयोरपि । मृत्युश्च भूयसी जाता शरीरी विघ्ननामियात् ॥
तद्दोषसमनार्थाय प्रायश्चित्तं समाचरेत् । मासमेकं गृहं त्यक्त्वा श्रीकुण्डे वासमाचरेत् ॥

गरुडविघ्नकृदपराधप्रायश्चित्ते सौपर्णमन्त्राः । बौद्धायने—

"ओं ह्रीं श्रीं स्मैं सः डः सौपर्णाय स्वाहा" इत्येकादशाक्षरो सौपर्णमन्त्रः इत्यनेन मन्त्रेण प्राणायाम त्रयं कुर्यात् अस्य मन्त्रस्य ब्रह्मर्षिः सौपर्णो देवता कात्यायनी छन्दः मम सौपर्णविघ्नकृदपराधमुक्तये प्रायश्चित्ते जपे विनियोगः शिरसि ब्रह्मर्षये नमः मुखे कात्यायिनीछन्दसे नमः हृदये सौपर्णदेवतायै नमः इति न्यासः । अथ ध्यानं—

कुलपन्नगहंतारं गरुडं विष्णुवाहनं । त्वद्विघ्नकृतदोषघ्नं निवारय प्रसीद मे ॥
इति ध्यात्वा-नैऋताभिमुखो भूत्वा जपेन्मन्त्रं सहस्रकं । दशप्रस्थप्रमाणेन दशघंटान् प्रदीयते ॥
तन्दुलं त्रिमणं दत्वा घंटादोषविमुक्तये । एवं कांस्यादिधातूनां घटयादिपात्रसंभवाः ॥
हस्ताद्विघ्नाः भवन्तीह तेषां दोषविमुक्तये । तंदुलानां कृतं दानं यथाशक्त्यानुसारतः ॥
एवं पाषाणपात्राणि हस्ताद्विघ्नानि जायते । तदेव परिमाणेन दानं तन्दुलमाचरेत् ॥
पाषाणसंभवात्पापाद्विमुक्तो जायते नरः । लोभाद्दानं न कुर्वीत शरीरी विघ्नतां व्रजेत् ॥
शतधा संभवैः रोगैरथवा क्षतपीडया । षण्मासपूरिता पीडा जायते नात्र संशयः ॥

इति गरुडविघ्नकृत् कांस्यादिधातुपात्रविघ्नकृद्वा पाषाणपात्रविघ्नकृदपराधप्रायश्चित्तदाने सौपर्णमन्त्रप्रयोगः । अस्य मन्त्रस्य शापो नास्ति ।

अथ शंखविघ्नकृदपराधप्रायश्चित्तः । पाद्मे—

शंखविघ्ने यदा जाते वाक्यहीनो नरो भवेत् । रोगेन वन्हिना वापि क्षतेन कटिदंशतः ॥

जिह्वादन्तौ विनश्येत मूको दोषसमुद्भवः । तद्दोषशमनार्थाय शंखदानं समाचरेत् ।।
प्रस्थार्द्धपरिमाणेन रूक्मशंखं तु कारयेत् । मध्ये कर्षसुवर्णं च धृत्वा विप्राय दापयेत् ।।
मासत्रयं गृहं त्यक्त्वा शोणभद्रं च गोमतीं । स्नात्वा शखापराधात्तु मुक्तो भवति मानवः ।।

ततः शंखविघ्नकृदपराधप्रायश्चित्ते पांचजन्यमन्त्रः । अगस्त्यसंहितायां—

विघ्नदोषविमुक्ताय पांचजन्याय धीमते । कमलापतिनिलयाय नमो पापं प्रशाम्यतु ।।

इति द्वात्रिंशाक्षरो पांचजन्यमन्त्रः । अनेन मन्त्रेण प्राणायामत्रयं कुर्य्यात् अस्य मन्त्रस्य नारायणर्षिः कमला देवता गायत्री छन्दः मम शंखविघ्नकृदपराधमुक्तये प्रायश्चित्ते जपे विनियोगः न्यासं पूर्ववत् । अथ ध्यानं—

ध्यायेत् क्षीरसमुद्रसंभवमयं शंखं हरेर्वल्लभं । विघ्नं पापप्रणाशनं कलिमलापघ्नं सुभद्राप्रियं ।।
सर्वव्याधिविनाशनं सुखकरं सर्वार्थकामप्रदं । माङ्गल्यं शुभवर्द्धनं हरिगुणालंकारभूपोज्वलं ।।

इति स्वरूपं ध्यात्वा—

द्विसहस्रमिदं जप्त्वा भास्कराभिमुखे स्थितः । द्वितयं ग्रन्थिसंज्ञाकं गोदानं च द्विजातये ।।
लक्ष्मीनारायणस्थाने जपेन्मन्त्रं सुधीर्नरः । शंखविघ्नकृतात्पापान्मुच्यते नात्र संशयः ।।

इति शंखविघ्नकृदपराधप्रायश्चित्ते पुण्डरीकाक्षमन्त्रप्रयोगः । अस्य मन्त्रस्य शापो नास्ति ।

अथ हरिद्वृक्षसमूलोत्पाटप्रायश्चित्ते पुण्डरीकाक्षमन्त्रः । वाधूलसंहितायां—

पुण्डरीकविशालाक्ष वृक्षपापप्रणाशक ! । कमलापतये तुभ्यं प्रणमामि प्रसीद मे ।

इति वृक्षहत्याप्रायश्चित्ते पुण्डरीकाक्षमन्त्रः । अनेन मन्त्रेण प्राणायामत्रयं कुर्य्यात् । अस्य मन्त्रस्याथर्वणर्षिः पुण्डरीकाक्षो देवता त्रिष्टुप् छन्दः मम हरिद्वृक्षसमूलोत्पाटापराधविमोचने प्रायश्चित्ते जपे विनियोगः । न्यासं पूर्ववत् । ध्यानं—

पुण्डरीकं विशालाक्षं वन्दे नारायणं प्रभुं । समस्तवृक्षपापघ्नं रमाकान्तमजं हरिं ।।

इति ध्यात्वा-त्रिसहस्रमिदं जप्त्वा पूर्वाभिमुखतो स्थितः । वटस्तले विधानेन मन्त्रं जप्त्वा सुधीर्नरः ।।

मासमेकं गृहं त्यक्त्वा प्रायश्चित्तं समाचरेत् । कृच्छ्रदानं करोत्यस्तु वृक्षहत्यादिमुच्यते ।।
कृष्णलीलोद्भवान् तीर्थान् व्रजमण्डलशोभितान् । तेषां स्नानमात्रेण वृक्षहत्या विमुच्यते ।।
गोदानग्रन्थिसंज्ञकान् द्विजेभ्यो दानमाचरेत् । हस्त्यश्वरथदानं च वटाश्वत्थकदम्बकं ।।
त्रिवृक्षघ्ने त्रयं दानं सर्वद्रव्यार्थसंयुतं । प्रायश्चित्तं विना लोको समूलं च विनश्यति ।।
सहस्रपरिमाणेन धामांसं दन्तधावनं । द्विजेभ्यो नित्यदानं स्याद्वृक्षहत्या विमुच्यते ।।

इति समूलहरिद्वृक्षोत्पाटापराधप्रायश्चित्ते पुण्डरीकाक्षमन्त्रप्रयोगः ।

अथ परक्षेत्र ग्रामभूमिगृहादिवस्तुद्रव्यादिहरणप्रायश्चित्तः । धर्मप्रदीपे—

बलान्मोहाच्च विद्वेषाद्ग्रामभूमिं समाददे । अथ वा गृहवस्तूनि द्रव्यादीनर्थसंचयान् ।
नारीभोजनपात्रांश्च लोभादाहरते नरः । तस्यैव जायते दोषस्तादृशं फलमीक्षयेत् ।।
छलेनाहरते द्रव्यं धान्यादिवस्तुसंचयान् । मासद्वयान्तरे शीघ्रं फलमाप्नोति मानवः ।।
मिथ्यापरात्मनश्चैव कल्पनं कारयेत् क्वचित् । दिनत्रयान्तरे दोषस्तादृशं फलमाप्नुयात् ।।
द्विगुणं त्रिगुणं हानिरेकादशगुणाभिधा । स्थानभ्रष्टं करोत्यस्तु त्रिलोकेष्वजयी भवेत् ।।
यत्र यत्र व्रजन् लोके तत्र तत्रापमानता । एतेषां दोषशान्ताय प्रायश्चित्तं समाचरेत् ।।
वनयात्रां करोत्यस्तु व्रजतीर्थान्समाचरेत् । वर्षमेकं गृहं त्यक्त्वा श्रीकुंडे वासमाचरेत् ।।

ग्रामदानं करोद्यस्तु ग्रामपापो विनश्यति । भूमीदानं करोद्धीमान् भूमिदोषप्रशान्तये ॥
गृहदानं करोद्यस्तु गृहदोषादिशान्तये ।

एतेषां दोषशांताय प्रायश्चित्ते पुरुषोत्तममन्त्रः । विष्णुयामले—

ओं ह्रां ह्रीं क्लीं सौ पुरुषोत्तमाय स्वाहा इति मन्त्रः अनेन मन्त्रेण प्राणायामत्रयं कुर्यात् । अस्य मन्त्रस्य कश्यपर्षिः पुरुषोत्तमो देवताष्टी छन्दः । मम ग्रामभूमिगृहादिसर्ववस्तु द्रव्यापहिहरणपरद्रोहादिदोष-परिहारार्थं प्रायश्चित्ते जपे विनियोगः । न्यासं पूर्ववत् । अथ ध्यानं—

सर्वपापहरं देवं पुण्यं श्री पुरुषोत्तमं । कलाधरं कलाकान्तं प्रणमामि परेश्वरं ॥

इति ध्यात्वा-ईशानाभिमुखो भूत्वा द्विसहस्रमिदं जपेत् । दशगोदानसंज्ञाकं ग्रन्थिसंयुक्तशोभनं ॥

पलमाणसुवर्णं च नित्यदानं समाचरेत् । एकान्तरव्रतं कुर्यान्नक्तभोजनमाचरेत् ॥

इति गृहादिदोषप्रायश्चित्ते पुरुषोत्तममन्त्रप्रयोगः । अस्य मन्त्रस्य शापो नास्ति ।

अथ राक्षसाज्ञातसुनशिवासुनादिघातापराधप्रायश्चित्तः । भविष्योत्तरे—

अज्ञात बालजीवं च हन्यतेऽशुभरूपिणं । कुलघ्नी जायते हत्या मृतवत्सं करोत्नरः ॥
तद्दोषशमनार्थाय प्रायश्चित्तं समाचरेत् । त्रिवेण्यां क्रियते स्नानं श्रीकुण्डे वासमाचरेत् ॥
सार्द्धवर्षद्वयं गेहं त्यक्त्वा चान्द्रायणं चरेत् ॥

ततोऽज्ञानशिवाबालवधापराधप्रायश्चित्ते नरकान्तकमन्त्रः । गोभिलसंहितायां—

ओं नरकान्तस्वरूपाय विष्णवेऽनन्तरूपिणे । अज्ञातबालपापघ्ने नमस्ते कमलासन ! ॥

इति मन्त्रः । अनेन मन्त्रेण प्राणायामत्रयं कुर्यात् । अस्य मन्त्रस्य सप्तर्षिः नरकान्तकस्वरूपो देवता अनुष्टुप् छन्दः । ममाज्ञातजीवबालापराधविमुक्तये प्रायश्चित्ते जपे विनियोगः न्यासं पूर्ववत् ।

अथ ध्यानं-भौमादिनररूपाणां कुलघ्नं देवसेवितं । भजेऽहं नरकान्तं तं जीवदोषादिनाशनम् ॥ इति ध्यात्वा—

उत्तराभिमुखो भूत्वा सहस्रत्रितयं जपेत् । बिल्ववृक्षस्तले स्थित्वा गोदानं पञ्चकं ददौ ॥
पञ्चकर्षं सुवर्णस्य स्वरूपं जीवबाचकं । आच्छाद्य पीतवस्त्रेण गुप्तदानं समाचरेत् ॥
मुक्तो जीववधादोषात् शिवारक्तकुलोद्भवः ॥ अस्य मन्त्रस्य शापोनास्ति—

अथ नीलकण्ठवधप्रायश्चित्तः । गौरीरहस्ये—

नीलकण्ठवधं कुर्यात् हत्या ह्यजयवर्धिनी । सर्वदा जयहीनं च सर्वमांगल्यवर्जितं ॥
सप्तमासान्तरे लोको कुरुते नात्रसंशयः । प्रायश्चित्तं विना लोको मृत्युर्वर्षैकान्तरे ॥ इति निषेधः—

ततो प्रायश्चित्ते विश्वरूपमन्त्रः । त्रैलोक्यसंमोहनतन्त्रे—

ओं विश्वरूपाय देवाय नीलकण्ठापराधह । विश्वराट् रूपणेतुभ्यं नमामि प्रलयान्तक ॥

अनेन प्रा० त्र० अस्य मन्त्रस्य विभाण्डकर्षि विश्वरूपो देवता अनुष्टुप् छन्दः मम नीलकण्ठवधापराधविमो-चने प्रायश्चित्ते ज० वि० न्यासं । पूर्ववत् । अथ ध्यानं—

विश्वरूप निराकारं निरञ्जनमजं हरिम् । प्रलयान्तकरं देवं प्रणमामि कलानिधिम् ॥

इति ध्यात्वा-पूर्वाभिमुखमाविश्य सहस्राख्यमिदं जपेत् । ग्रन्थसंख्यकगोदानं चतुर्थं दानमाचरेत् ॥

सार्द्धमासद्वयं त्यक्त्वा श्रीकुण्डमावसेच्छुधीः । नीलकण्ठे कृतं दानं सामग्रीभिः समन्वितं ॥
पञ्चकर्षसुवर्णस्य नीलकण्ठस्वरूपकं । नीलकण्ठवधादोषान्मुच्यते नात्र संशयः ॥
गुञ्जाचतुःप्रमाणेन स्वर्णं नित्यं प्रदापयेत् ॥ इति अस्य मन्त्रस्य शापोनास्ति—

अथ मयूरवधापराधप्रायश्चित्त: । स्कान्दे—

मयूरस्य कृता हत्या समूलगृहनाशनं । तद्दोषशमनार्थाय गंगावेत्रवतीञ्चरेत् ॥
मासत्रयं गृहं त्यक्त्वा श्रीकुण्डवासमाचरेत् । मयूरत्रितयं कृत्वा प्रस्थमानसुवर्णत: ॥
दश मुक्ताकृता माला त्रिमालात्रिंशसंख्यया । मयूराणां त्रयाणाञ्च कण्ठेषु मालिकान् क्षिपेत् ॥
पीतरक्तहरिद्वस्त्रै राच्छाद्य पटसम्भवैः । त्रिषु तीर्थेषु दानानि गुप्तसंज्ञानि यानि च ॥
मुक्तात्रयप्रबन्धेन नित्यदानं समाचरेत् । प्रायश्चित्तं विना हत्या कदाचिन्नैव मुंचति ॥

निर्णयतरंगे—

हत्या केषाञ्च जीवानां कदाचिन्नैव मुंचति । विना कन्याविवाहेन द्वारमार्गप्रवेशत: ॥
कन्योद्वाहं विना गेहो सदा हत्यासमाकुलः । सदा कपाटबद्धस्तु मध्ये हत्या च क्रीडति ॥
देवपित्रर्चनादिभ्यो वैमुख्यो जायते ग्रहः । विना कुलोद्भवा कन्या गोत्रान्यकुलसंभवा: ॥
तस्या वैवाहिकं यज्ञं स्वगृहे कुरुते यदि । नैव मुच्येत्तदाहत्या कृतं निष्फलतां व्रजेत् ॥
स्वगोत्रकुलसम्भूतं कन्योद्वाहं गृहेऽकरोत् । तदैव मुच्यते हत्या द्वारागमनसम्भवः ॥
यावद्द्वारप्रबन्धस्तु तावत्कन्याकुलेऽभवत् । तस्या:वैवाहिकं कुर्यान् नि:प्रबन्धो भवेत्तदा ॥
विना कन्याद्भवोद्वाहे विप्रो लोभसमन्वितः । भोजनं क्रियमाणस्तु गेहे हत्यान्वितस्य च ॥
षण्मासाभ्यन्तरे मृत्युमाप्नोत्यत्र न संशयः । भोजनं क्रियमाणस्य हत्यायां ब्राह्मणस्य च ॥
प्रतीपं जायते हत्या द्वितीया ब्राह्मणस्य च । राजाज्ञा परिमाणेन पञ्चानामाज्ञयापि वा ॥
हत्या विमुच्यते तस्माद्दशांश फलभागिनी ।

ततो मयूरवधापराधेऽनन्तमन्त्र: । शौनकीये—

नमस्त्वनन्तदेवाय शिखाया: पापहारिणे । त्रैलोक्यजगदानन्दहेतवे ब्रह्ममूर्तये ॥

इति अ० प्रा० त्र० अस्य मन्त्रस्यापस्तम्भर्षिरनन्तो देवता—अक्षरा पंक्ति छन्दः । मम मयूरवधापराधविमोचने प्रायश्चित्ते ज० वि० न्या० पू० । अथ ध्यानं—

अनन्तं सर्वपापघ्नं शंखचक्रगदाधरं । त्रैलोक्यमोहनं देवं नीलेन्दीवरलोचनं ॥

इति ध्यात्वा-पूर्वाभिमुखमाविश्य जपेन्मन्त्रं शतत्रयं । नाभिमात्रे जले स्थित्वा प्रायश्चित्तमिदं चरेत् ॥

गोदानं ग्रन्थिसंख्याकं दानं दद्याद्विजातये । मयूरवधपापस्य मुक्तये च तृतीयकं ॥
नक्तंव्रतं करोद्धीमान् शिखिहत्याद्विमुच्यते ॥

अथ चात्रगवधापराधप्रायश्चित्त: । विष्णुधर्मोत्तरे—

चात्रगस्य वध कार्ये हत्यास्यात् कुलपीडिनी । सदारोगसमायुक्ता प्रायश्चित्तं विनाशुभा ॥
एकं मासं गृहं त्यक्त्वा गंगां स्नात्वा विधानतः । कुर्याच्चात्रगदानञ्च हिरण्यं ह्यर्द्धप्रस्थकं ॥
गुप्तदानमितीत्यातं चात्रग पापशान्तये ।

ततश्चात्रगवधापराधप्रायश्चित्ते मुकुन्दमन्त्र:—

ओं ह्रां क्लीं श्रीं श्रौं मुकुन्दाय स्वाहा अनेन म० प्रा० त्र० अस्य मन्त्रस्य विभाण्डकर्षिर्मुकुन्दो देवता त्रिष्टुप् छन्दः । मम चात्रागवधापराधविमुक्तये प्रायश्चित्ते ज० वि० न्या० पू० । अथ ध्यानं—

ध्यायेद्देवं मुकुन्दाख्यं यशोदानन्दनं हरिं । बालक्रीडासुखासीनं चात्रगदोषनिवारणं ॥

इति ध्यात्वा—वायव्याभिमुखो भूत्वा ह्याम्रवृक्षतले विशन् । जपेन्मन्त्रं सहस्राख्यं सन्नियम्यजितेन्द्रियः ॥

चात्राग् हत्यादिमुक्तस्तु सुखसौभाग्यमाप्नुयात् । एवं शुकसारिकापिकचर्मेनिकावकचिडीपण्डू प्रभृतयः ।
एतेषाञ्चैव जीवानां प्रयोगोऽयमुदाहृतः । तथापि सर्वजन्तूनां वधपापविमुक्तये ॥
प्रयोगविधिराख्याता प्रायश्चित्तानुसारतः ॥
इति चात्रगादिजन्तूनां वधापराधप्रायश्चित्ते मुकुन्दमन्त्रप्रयोगः ॥

अथगर्दभोष्ट्राजैडकवधापराधप्रायश्चित्तः । वृहत्पाराशरे—

गंगादि पञ्चतीर्थानि कालिन्दो यमुना नदी । कर्मनाशा च वेत्रा च स्नानाद्धत्या विमुच्यते ॥
चतुर्णां गर्दभादीनां चतुर्धातुस्वरूपिणः । पित्तलिस्ताम्रलोहाढ्याः निर्मिताः मणसंख्यया ॥
पीतरक्तासितस्वेतैर्वस्त्रेराच्छादयेत्क्रमात् । चणमाषतिलाजिका चतुर्द्वाष्टमणाः स्मृताः ॥
दद्याद्विप्राय दानं हि हत्यामुक्तो भवेन्नरः ।

एतेषामपराधप्रायश्चित्ते मुरारिमन्त्रः—

मुरान्तकाय देवाय वासुदेवाय धीमते । तीर्त्युष्ट्रगर्दभोच्छेदपापघ्नाय नमोस्तु ते ॥

अनेन मन्त्रेण प्रा० त्र० अस्य मंत्रस्य वैमलर्षिर्मुरारिदेवता ज्योतिः छन्दः मम पञ्च प्रकारजीवगर्दभ तित्र्युष्ट्रछागमेषवधापराधमोचने प्रायश्चित्ते ज० न्या० पू० । अथ ध्यानं—

शंख चक्र गदा पद्मैः शोभितं मुरमर्दनं । ध्यायेद्देवं रमाकान्तं पञ्चपापापहारिणं ॥
इति ध्यात्वा-जलाशयेऽश्वत्थवृक्षे तले स्थित्वा जपेत्सुधीः । द्विसहस्रमिदं मन्त्रमुत्तराभिमुखोविशन् ॥
गोदानं वृतयं दद्यात् वृषग्रन्थिसमन्वितं । पञ्चहत्यापराधात्तु मुक्तो भवति मानवः ॥

अथ परद्रोहादिवैवाहादिकमांगल्ययज्ञविध्वंसनादि ताम्बूलादिफलाहरणमित्थ्यात्मकल्पापराध प्रायश्चित्ते यज्ञपुरुषमन्त्रः । योगयाज्ञवल्के—श्रीं ह्रीं क्लीं त्रं ह्रैं यज्ञपुरुषाय विष्णवे नमः स्वाहा इति अनेन मन्त्रेण प्रा० त्र० अस्य मन्त्रस्य साकलर्षिर्यज्ञपुरुषो देवता वृहती छन्दः । मम परद्रोहादिवैवाहिक मांगल्ययज्ञविध्वंसनादिताम्बूलफलहरणमिथ्यात्मकल्पापराधविमोचने ज० त्रि० न्या० पू० शिरसि साकलर्षये नमः । मुखे वृहतीछन्दसे नमः । हृदये यज्ञपुरुषाय देवतायै नमः इति न्यासः । अथ ध्यानं—

विवाहयज्ञादिकदोषसम्भवपापघ्नमीशं कमलायताक्षं ।
वन्दे कृपासिन्धुमनन्तरूपं नारायणं यज्ञपुरापुरुषं ॥
इति ध्यात्वा-लक्ष्मीनारायणस्थाने द्विसहस्रमिदं जपेत् । पूर्वाभिमुखमाविश्य यज्ञपापाद्विमुच्यते ॥
गोदानं ग्रन्थिसंज्ञाकं गंगादिषु त्रयोदश । कन्यादानं करोत्तर्हि यज्ञहत्या विमुच्यति ॥
प्रायश्चित्तं विना पापाः मुक्तिमायान्ति केशव । यज्ञविध्वंसनात्पापाः सप्त जन्म प्रपीडिताः ॥
इतीव पापाः कथिताः प्रशस्ता प्रायश्चित्ताः जीवविघातसम्भवाः ।
विवाहयज्ञादिकध्वंशनोद्भवाः परात्मद्रोहादिकशान्तये शुभाः ॥
वने काम्यवने तीर्थे तेषां मध्ये महत्स्थलं । श्यामकुण्डं समाख्यातं तद्दृष्टान्तमिलीरितम् ॥

इति श्रीभास्करात्मज श्रीनारायणभट्टगोस्वामीविरचिते व्रजभक्तिविलासे परमहंससंहितोदाहरणे व्रजमहात्म्यनिरूपणे श्यामकुण्डदृष्टान्ते नानाप्रकार पार्षदादिविघ्नप्रायश्चित्ताभिधायने अष्टमोऽध्यायः ॥

॥ नवमोऽध्यायः ॥

अथातः सम्प्रवक्षामि तीर्थाः काम्यवनोद्भवाः । गोमहत्यादयो कुण्डास्तेषां मन्त्रमुदाहरेत् ॥
महात्म्यं दर्शये तादृक्फलमेतत्प्रकीर्त्तयेत् ।

ततः काम्यबने गोमतीकुंडस्नानाचम प्रा० मंत्रः । आदिवाराहे-

धेनुकृत्तीर्थराजाय सर्वदा पुष्टिवर्धन ! । जयवाल्यप्रदस्तीर्थ सर्व्व बाधां निवारय ॥

इति मन्त्रं समुच्चार्य नवभिर्मज्जनाचमैः । यत्र तीर्थे कृतं दानं धेनुं सोपस्करैर्युतं ॥ १ ॥

धेनुदाननिर्णयः । गौडनिबन्धे—

सोपस्करयुतां धेनुं दद्याद्दानं द्विजातये । कृतकृत्यो भवेल्लोको वैष्णवीपदवीं लभेत् ॥
जीवन् यावन्नृलोकेस्मिन्नैश्चर्यपदवीं लभेत् । नानाद्रव्यधनैर्धान्यैर्वस्त्रालंकरणादिभिः ॥
वैवाहादिकमांगल्यैरिच्छापूर्वं सुखं लभेत् । सोपस्करं विना धेनुं दद्याद्विप्राय तुष्टये ॥
वस्त्रालंकारभूषादिपात्रं धान्यादिभिः क्रमात् । दुःखितो बहुदारिद्र्यं सदा संपीड्यते नरः ॥
द्वाभ्यां दानं तु विप्राभ्यामेकधेनोश्च कारयेत् । धेनुशापात्कृता ह्याशाखण्डत्वं च प्रजायते ॥
यत्र यत्रेच्छितं कामं तत्र तत्रैव नश्यतु । यतो धेन्वैकदानं हि एकस्मै तु प्रदापयेत् ॥
इच्छया सादृशं कामं परिपूर्णं तु जायते । विभागं तु कदा नैव कारयेच्च सुधीर्नरः ॥
निष्कं द्रव्यसमुद्भूतं विप्रेभ्यो दानमाचरेत् । तत्रैव नैव दोषः स्यात्सहस्रगुणितं फलं ॥
कन्यादानं यथा पुण्यं गोदाने च तथा फलं । सर्वालंकारसंयुक्तां कन्यां रूपगुणान्वितां ॥

वामनपुराणे—

तदा तस्यैव दानं तु कुर्यान्मोक्षाय दम्पती । तान्येव भूषणादीनि जामात्रे तु समर्पयेत् ॥
कन्यादानकृतात्पश्चाद्धेनुदानं समाचरेत् । धेनुदानं विना कन्यादानं सांगं न जायते ॥
कन्योद्वाहे च जामातु र्भूषणान् धारयेत्प्रियां । गौरीमूर्त्तिं गले न्यस्य मुक्तास्यामाक्षमालकां ॥
तदा कन्या प्रिया जाता लक्ष्मीसौभाग्यवर्द्धिनी । गौर्य्यादिभूषणैर्हीनं कन्योद्वाहं यदा भवेत् ॥
सा प्रिया विभवा जाता ह्येकवर्षदिनान्तरे । विनोत्साहं विवाहादीन्मांगल्यान् कारयेत् कत्रचित् ॥
सर्वदाऽमंगलान्येव जायंते सर्वदा चिरं । तस्य गेहे करोद्वासं शोको मृत्युसमुद्भवः ॥
गीतमांगल्यहीनेन वैवाहादीन् शुभान् चरेत् । अमंगलं गृहे तस्य सर्वदैव प्रजायते ॥

कन्योद्वाहे द्रव्यदाननिषेधः । स्कान्दे—

नग्नकन्याकृतं दानं सदा नग्नत्वसंप्रदं । मातृपित्रौ सदा दुःखौ वस्त्रधान्यादिभिर्विना ॥
यदि वा लोभमोहेन कन्यादत्तं समाददे । सर्वदा दुःखदारिद्रैः कदा तृप्तिं न गच्छति ॥
क्षुत्तृट् प्रपीडितो नित्यमपमानसदान्वितः । बहुधा ऋणसंपूर्णो यत्रस्थो विनिरादरः ॥

---

अब काम्यवन में उद्भव गोमहती प्रभृति कुण्डों के मन्त्र, महिमा, फल वर्णन करते हैं। गोमहती कुंड का स्नानाचमन प्रार्थनामन्त्र यथा आदिवाराह में—हे गाभीगण कर्तृक रचित तीर्थराज गोमहती कुण्ड ! आपकी जय हो। आप सर्वदा पुष्टि को बढ़ाने वाले हैं और समस्त बाधा निवारण करने वाले हैं। इस मन्त्र के पाठ पूर्वक ६ बार स्नान, आचमन, प्रदक्षिणा करें। यहाँ सोपस्कर के साथ धेनुदान की विधि है। विधि, फल बतलाते हैं—द्वारावती कुंड की बात उठाने के पर्यन्त ॥ १ ॥

कन्यार्थमागतं द्रव्यं चिन्तितं वापि याचितं । न तदर्थं करोत्यस्तु ह्यन्यकार्य्ये समापयेत् ॥
समूलं नश्यते कार्य्यो हानिः स्याद्द्विगुणाभिधा ।
कन्यार्थ-देवार्थ-द्विजार्थमेव गवार्थ-तीर्थार्थ-गृहार्थद्रव्यं ।
विचिन्तयित्वा नहि दातुमिच्छन्समूलनाशं द्विगुणान्यहानिः ॥

कौर्म्ये—एतद्देवालयं स्थानं गेहं तीर्थं समूलकं । कुलनाशं यदा हि स्यात्तमेव पुनरुद्धरेत् ॥
तस्यैव जायते पुण्यं सहस्रगुणितं फलं । प्रतिवासरसंभूता कुलवृद्धिः प्रजायते ॥
अखण्डपदवीं लब्ध्वा सराजा धार्म्मिको भवेत् । जीर्णोद्धारं प्रकुर्व्वन्ति पुस्तकादिस्थलेषु च ॥
असंख्या फलदं पुण्यं वैकुण्ठपदमाप्नुयात् । आविर्भावं करोत्स्थानमुच्छिन्नं गोप्यसंज्ञकं ॥
प्रतापस्तुत्कुले वृद्धो सहस्रगुणितोऽभिधः ।

हेमाद्रौ—लब्धद्रव्यादिवान्येभ्यो दशांशं दानमाचरेत् । वस्त्रालंकारधान्यादि गोपश्वादिसमागमे ॥
दशांशभागतः कुर्य्याद्दानं दशगुणप्रदं । बालकौमारपौगण्डवलदेवादिमूर्त्तिषु ॥
उपायनं यदा जातं तद्दशांशस्तु दक्षिणा । उपायनप्रमाणेन दशांशं दानमाचरेत् ॥
लोभान्नैवं दशांशस्य दानं यदि न कारयेत् । तत्समूलं विनश्यन्तु प्रतिमाविघ्नतामियात् ॥
द्विगुणं जायते हानिः प्रायश्चित्तं विना यदा । यथैव शतविप्राणां भोजनादीन्समाचरेत् ॥
एको वैमुख्यतां जातस्तस्य शापात्तु निष्फलाः । शतगोपानमाचक्रे ह्येका स्याच्च तृषार्दिता ॥
तस्यास्तु निष्फलाः जाताः शापच्छलप्रपूरणाः । एवं राजादिलोकाश्च प्राप्तद्रव्यादिमध्यतः ॥
दशांशं कुरुते दानं सहस्रगुणितं भवेत् । लोभान्नैव कृतं दानं समूलं नाशमाप्नुयात् ॥
विप्राणामपमानेन यज्ञो विध्वंसनां नयेत् । अपराधकृतो विप्रो शूद्र द्वेषप्रचारकः ॥
कुलपूज्यो पितृपूज्यो दौहित्रस्तीर्थपूजकः । अयमाने च तस्यैव नैव दोषः प्रजायते ॥
मुक्तादिभूषणादाने विप्रेभ्यो दक्षिणां ददौ । सहस्रगुणिता वृद्धिर्जायते च दिने दिने ॥
इमां शान्तिं न कुर्व्वन्ति समूलं नाशमाप्नुयात् । शरीरव्याधिभिर्गेहे हानिश्च विपुला भवेत् ॥
इतिलाभादिके दशांशदाननिषेधः ॥

नारायणस्वरूपेषु बलदेवादिमूर्त्तिषु । सहस्रगुणितं जातमुपायनमिति स्मृतं ॥

पाद्मे—शंखरुक्ममयं कृत्वा प्रस्थमात्रं मनोहरं । कमलापतये कान्तमर्पयेत्कामनान्वितः ॥
सर्वदा विजयी भूयान्नैव तिष्टन्ति वैरिणः । घंटां च विष्णवे दद्यात्सदा मांगल्यमाप्नुयात् ॥
आरात्तिं हरये दद्यात्कांचनीं परिपूर्णकां । त्रैलोक्यसुखसम्पत्त्या धनधान्यादिसम्पदा ॥
संयुता वसते लक्ष्मी तस्य गेहे पतिव्रता । विनारात्तिंस्थितामूर्त्तिस्त्रैलोक्यसुखनाशिनी ॥
घंटी समर्पणे तस्य सर्वदा जयमंगलं । रुक्मस्नानमयं पात्रं ह्यर्पयेत् विष्णवेऽखिलं ॥
सहस्रगुणितं सौख्यं पात्रान्तरगृहे लभेत् । ताम्रपित्तलिपात्रेषु सामान्यफलमाप्नुयात् ॥
रुक्मे पानमये पात्रे हरेः सौख्यं करोति यः । तत्सुखं लभते शीघ्रं चिरायुःसुखमाप्नुयात् ॥
छत्रं स्वर्णमयं धृत्वा कमलापतये शुभं । तस्माल्लक्षगुणं छत्रं धारयेत्स्वयमुच्छ्रितं ॥
त्रैलोक्याधिपतिर्भूत्वा छत्रधारी नरो भवेत् । अर्पयेद्रुक्मछत्रं तु सहस्रगुणितं लभेत् ॥
छत्रधारी भवेद्राजा समस्तपृथिवीतले । अखण्डं कुरुते राज्यं नैव तिष्ठन्ति कंटकाः ॥
अन्यैर्नानाविधैर्वस्त्रै भूषणैर्बहुपार्षदैः । बहुधा कारयेत्सौख्यं हरये मूर्त्तिरूपिणे ॥

सदा लक्षगुणैः सौख्यं प्राप्नुयात्पृथिवीतले । मकमस्वर्णमयीं कृत्वा विष्णवेऽर्थचतुष्पथीं ॥
समर्पणं करोद्धीमान् सर्वदा विजयी भवेत् । राजद्वारे च संग्रामे शत्रुपक्षविमर्दकः ॥
अजयं नैव पश्यन्ति कदाचिद्बहुसंकटे । यत्स्वरूपेषु नैवास्ति मनोज्ञास्समयी पथी ॥
बालकौमारपौगण्डेष्वेषु सौख्यविवर्द्धिनी । उदासीना सदामूर्त्तिं वसते ह्यजयप्रदा ॥
एवं मन्त्रमयीं कृत्वा विष्णवे च समर्पयेत् । राज्यवश्यकृतो लोको राज्यं निष्कंटकं करोत् ॥
सुबुद्धिर्जायते नित्यं मन्त्रविद्याविशारदः । यन्मन्दिरे सुबुद्धिस्तु जायते नात्र संशयः ॥
कुबुद्धेस्तु भवेन्नाशो सदा सौबुद्धिवर्द्धनः । पूजाविधानं कृष्णस्य कुर्य्याच्च विधिवन्नरः ॥

समयनिरूपणं-कृष्णार्च्चनचन्द्रिकायां—

विना चतुष्पथीं पूजांस्थापनं तु हरेश्चरेत् । बहु क्रोधमयो विष्णुः शश्वतेऽजयवर्द्धनः ॥

विष्णुधर्म्मोत्तरे—

विष्णुशापात्प्रजायते कुबुद्धिस्तु दरिद्रता । ऋणापमानव्याधिश्च बहुक्लेशसदान्वितः ॥
विना दर्शनकालेन हरेरीक्षणमाचरेत् । निष्कला जायते मूर्त्तिः स्थानभ्रष्टं चकार ह ॥
परिवारक्षयं जातं मिथ्याद्रोहकलंकता । ब्रह्महत्या फलं लब्ध्वा ह्यलक्ष्मीं भजते सदा ॥
तद्दोषशमनार्थाय प्रायश्चित्तं समाचरेत् । तदैव सकलामूर्त्तिर्जायते शुभवर्द्धिनी ॥
विष्णोश्च मन्दिरे दीपौ ज्योतिषौ दक्षिणोत्तरे । चतुर्दिक्षु भवेज्ज्योतिस्त्रैलोक्यजयमंगला ॥
एक दीपं स्थितं तत्र द्वि दिशोर्जयमंगलं । द्विदिशोऽन्धकारस्तु सर्वदा ह्यशुभं भयं ॥
एकपक्षे भवेल्लक्ष्मीरेकपक्षे दरिद्रता । वामदक्षिणयोर्भागे विष्णोरग्रे वरप्रदौ ॥
एकदीपं करोद्यस्तु नेत्रहीनो नरो भवेत् । यस्मात्कदा न कर्त्तव्यमेकदीपं सुरालये ॥
चामरं केशवायैव स्वर्णरौप्यविनिर्मितं । अर्पयेन्मनसेच्छाभिः परिपूर्णसुखं लभेत् ॥
तद्गृहे वसते पद्मा सदा क्लेशविवर्जितः । अलक्ष्मीं नैव पश्येत तद्गृहेषु च निर्मलं ॥
चमरेण विना मूर्त्तिरशुचिः सर्वदा स्थिता । मक्षिका स्पृशते मूर्तिं किञ्चिद्दोषं कलेवरे ।
क्षीयते त कलंकश्च मक्षिकाभ्यस्तु रक्षयेत् ॥

धर्मप्रदीपे—मक्षिका सततं धारा भूमि रापो हुताशनः । शिशु मार्जारद्रव्यं च सप्तैते च पवित्रकाः ॥
उच्छिष्टं शिवनिर्म्माल्यं वमनं शवकर्पटं । काकविष्ठासमुत्पन्नं पंचैते च पवित्रकाः ॥

इति पवित्राभिधाः ॥ अगस्त्यसंहितायां—

भगवच्छपथं मिथ्या कारयेदधमो जनः । विंशवृत्या धृत जन्म निरये पच्यते चिरं ॥
सपथस्य प्रभावं तु समक्षं शीघ्रमीक्षयेत् । पुत्रशोकमृणं व्याधिर्दारिद्रं क्लेशपीडनं ॥
पथहत्याऽभवत्तस्य सदा सौख्यविनाशिनी । मिथ्या सपथदोषेन प्रतिमा विघ्नतां ययौ ॥
षण्मासाभ्यन्तरे मिथ्या दर्शयेत्स्वकृतं फलं । एवं पुत्रादिजीवेषु मिथ्या सपथमाचरेत् ॥
गोविप्रादिषु जीवेषु मिथ्या सपथमाचरेत् । षण्मासाभ्यन्तरे तेषां मृत्युरेव न संशयः ॥
तेषां वधकृतोद्भूता हत्या स्यात्कुष्ठवर्द्धिनी । भक्ष्याभक्ष्यविवेकेन मिथ्यासपथमाचरेत् ॥
ब्रह्मत्वरहितो जातश्चाण्डालसदृशो द्विजः । प्रायश्चित्तं विना तस्य चतुर्मासे फलं दृशेत् ॥
पुत्रशोकजराव्याधिरतिदीर्घ दरिद्रता । ऋणं कलहसन्तापं कुरुते ब्रह्मघातिनी ॥
स नरो देवपितृभ्यो लोकेभ्यो विमुखः स्मृतः । मिथ्याया सपथे कार्य्ये प्रायश्चित्तं विधीयते ॥

विष्णुयामले—गंगां च मानसीं स्नात्वा श्रीकुण्डे वासमाचरेत् । चातुर्मासं गृहं त्यक्त्वा सपथस्य प्रशान्तये ॥
पञ्चकर्षसुवर्णं च ताम्रपात्रे निधाय च । तिलैश्च छादनं कृत्वा ब्राह्मणाय प्रदीयते ॥
काले ब्राह्ममुहूर्त्ताख्ये नित्यदानं समापयेत् । मिथ्यासपथदोषात्तु मुक्तो भवति मानवः ॥
मिथ्यासपथकारस्य कदा स्थानं न जायते ॥

अथ मिथ्यासपथप्रायश्चित्ते वैकुण्ठमन्त्रः—

ओं ह्रीं क्लीं ग्लौं श्रौं ग्लैं ग्रां वैकुण्ठाय नमः इति द्वादशाक्षरो वैकुण्ठमन्त्रः । अनेन मन्त्रेण प्राणायामत्रयं कुर्यात् । अस्य मन्त्रस्य सोम ऋषिः वैकुण्ठो देवता कात्यायिनी छन्दः मम मिथ्यासपथदोषविमुक्तये प्रायश्चित्ते जपे विनियोगः । न्यासं पूर्ववत् । अथ ध्यानं—

वैकुण्ठमीश्वरं विष्णुं मिथ्यासपददोषहं । वन्दे कलिमलापघ्नं चतुर्भुजस्वरूपिणं ॥ इति ध्यात्वा—
उत्तराभिमुखो भूत्वा जपेन्मन्त्रं सहस्रकं । नक्तव्रतविधानेन नक्तभोजनमाचरेत् ॥
मिथ्यासपथदोषात्तु मुक्तो भवति पातकी । सपथस्य द्वयोर्दोषो जायते फलदायकः ॥
सपथं सत्यं वा मिथ्यां ह्यापाढे परिवर्जयेत् । सपथोद्भवदोषस्तु षण्मासे फलदोऽभवत् ॥
मिथ्यासपथभावेन परधर्मं विनाशयेत् । जलादिभोजने पाने छादने स्पर्शकारके ॥
धर्महत्या महत्पापं कृतकस्यैव जायते । विनादृष्टिप्रयोगेन दोषो नैव प्रजायते ॥
धर्मप्रपालको विष्णुः किंचिद्भ्रान्तिमुपार्जयेत् । समूलं नाशमायाति धर्महत्या कृते यदि ॥
इति मिथ्यासपथप्रायश्चित्ते वैकुण्ठमन्त्रप्रयोगः । संकुष्टिक ऋषिशापान्वितोऽयं मन्त्रः । तस्य मोचनप्रयोगः कौंडिन्यसंहितायां—अस्य श्री संकुष्टिकर्षिशापप्रमोचनस्य बुध ऋषिः विश्वेश्वरी देवता अनुष्टुप् छन्दः मम संकुष्टिकर्षिशापप्रमोचने ज० इति संकुष्टिकर्षिशापमुक्ताभवः "नवाञ्जलीः जलं नीत्वा वायव्यं कोणमुत्क्षिपेत् । इति संकुष्टिकर्षिशापमोचनप्रयोगः ।

इत्यष्टषष्ट् समाख्यातास्तीर्था श्रीकुण्डमागताः । नरादिदेवपितॄणां गोपश्वादिप्रभृतीनां ॥
हत्यापराधसंभूते श्रीकुण्डस्नानमात्रतः । मुच्यते नात्र सन्देहो ह्यस्तीर्थं गमे यदि ॥
इति गोमहर्षीकुण्डे दृष्टान्तं समुदाहृतं । ततो द्वारावतीकुंडमाहात्म्यं च निरूप्यते ॥

ततो द्वारिकाकुंडस्नानाचमनप्रार्थनमन्त्रः । ब्रह्माण्डे—

गोपिकानाथ देवाय द्वारिकेशाय विष्णवे । तीर्थराज नमस्तुभ्यं द्वारिकाकुण्डसंज्ञक !
इति मन्त्रं समुच्चार्य नवभिर्मज्जनाचमैः । नमस्कुर्याद्विधानेन वैष्णवीं पदवीं लभेत् ॥ २ ॥

ततो मानकुण्डस्नानाचमनप्रार्थनमन्त्रः । ब्राह्मे—

मानवत्यै च राधायै नमः कृष्णाय केलिने । दम्पती सौख्यदस्तीर्थं मानकुंड नमोस्तु ते ॥
इति मन्त्रं समुच्चार्य्य दशभिर्मज्जनाचमैः । नमस्कारं प्रकुर्वीत सर्वदा प्रीतिमाप्नुयात् ॥३॥

---

अनन्तर द्वारावती कुंड का महिमा वर्णन करते हैं—द्वारकाकुंड स्नानाचमन प्रार्थनमन्त्र यथा-ब्रह्माण्ड में—हे गोपिकानाथ ! हे देव ! हे द्वारकेश ! हे द्वारिकाकुंड नामक तीर्थराज ! आपको नमस्कार ! इस मन्त्र के पाठ पूर्वक ६ बार स्नान, आचमन, नमस्कार करने से वैष्णवीपद को लाभ करता है ॥२॥

अनन्तर मानकुंड है । स्नानाचमन मन्त्र यथा—ब्राह्म में—हे मानवती राधिके ! हे केलिपरायण कृष्ण ! हे दम्पती के सुख को देने वाले मानकुंड तीर्थ ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक

ततो ललिताकुंडस्नानाचमनप्रार्थनमन्त्रः । वाराहे -

सर्वदा प्रीतिदे देवि ललिते कृष्णवल्लभे ! तीर्थराज नमस्तुभ्यं ललिताकुंडसंज्ञक ! ॥

इति मन्त्रं समुच्चार्य द्वादशैर्मज्जनाचमैः । प्रणमेत्कृतकृत्यस्तु परमोक्षपदं लभेत् ॥ ४ ॥

ततो विशाखाकुण्डस्नानाचमनप्रार्थनमन्त्रः । भविष्योत्तरे—

विशाखारमणतीर्थं नमो वैमल्यरूपिणे । श्रीकृष्णाय नमस्तुभ्यं यशोदानन्दनाय च ॥

इति चतुर्दशावृत्या मज्जनाचननैर्नमन् । अखंडपदवीं लेभे धनधान्यमवाप्नुयात् ॥ ५ ॥

ततो दोहनीकुंडस्नानाचमनप्रार्थनमन्त्रः । आदिपुराणे—

नन्दादिनिर्म्मिते तीर्थे दोहनीतीर्थसंज्ञके । सर्वदा पयःपूर्णाय तीर्थराज नमोऽस्तु ते ॥

इति मन्त्रं षडावृत्या मज्जनाचमनै नमन् । सदा दोहप्रपूर्णस्तु लक्ष्मीवानपि जायते ॥ ६ ॥

ततो मोहनीकुंडस्नानाचमनप्रार्थनमन्त्रः । संमोहनतन्त्रे—

जगन्मोहकृते तीर्थे यशोदामोहकारके । मोहनीकुंडसंज्ञाय तीर्थराज नमोऽस्तु ते ॥

इति मन्त्रं समुच्चार्य्य सप्तभिर्मज्जनाचमैः । प्रणमन् लभते मोहं जगत्सु ह्यखिलं सुखं ॥ ७ ॥

ततो बलभद्रकुंडस्नानाचमनप्रार्थनमन्त्रः । पाद्मे—

बलभद्रकृते तीर्थे सर्वदा बलवर्द्धने । तीर्थराज नमस्तुभ्यं प्रसीद वरदो भव ॥

इति मन्त्रं दशावृत्या मज्जनाचमनै र्नमन् । सर्वदा बलसंयुक्तो त्रैलोक्यविजयी भवेत् ॥ ८ ॥

---

१० बार स्नान, आचमन, नमस्कार करने से सर्वदा प्रीति को प्राप्त होता है ॥ ३ ॥

अनन्तर ललिताकुंड का स्नानाचमन मन्त्र यथा वाराह में—हे सर्वदा प्रीति देने वाली देवि ललिते ! हे कृष्णवल्लभा ! हे ललिताकुंड ! तीर्थराज आपको नमस्कार । इस मन्त्र के १२ बार पाठ पूर्वक स्नानाचमन मज्जन कर प्रणाम करने से कृत्य-कृत्य होकर परम मोक्ष को प्राप्त होता है ॥ ४ ॥

अनन्तर विशाखाकुंड है । स्नानाचमन प्रार्थनामन्त्र यथा भविष्योत्तर में—हे विशाखारमण-तीर्थ ! विमल रूप आपको नमस्कार । हे यशोदानन्दन श्रीकृष्ण ! आपको नमस्कार । इस मन्त्र के १४ बार पाठ पूर्वक मज्जन, आचमन, स्नान, नमस्कार करने से धन, धान्य से युक्त होकर अखण्ड पदवी को लाभ करता है ॥ ५ ॥

अनन्तर दोहनीकुंड है । स्नानाचमन प्रार्थनामन्त्र यथा आदिपुराण में—हे नन्दादि के द्वारा निर्म्मित दोहनी कुंड नामक तीर्थराज ! आपको नमस्कार । आप सर्वदा दुग्ध से परिपूर्ण हैं । इस मन्त्र के ६ बार पाठ पूर्वक स्नानाचमन नमस्कार करे तो समस्त कामना से परिपूर्ण होकर लक्ष्मीवान् होता है ॥६॥

अनन्तर मोहनीकुंड है । स्नानाचमन प्रार्थनामन्त्र यथा सन्मोहन तन्त्र में- हे जगत् मोहनकारी तीर्थ ! हे यशोदाजी को मोह करने वाले मोहनीकुंड ! हे तीर्थराज ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ७ बार मज्जन, आचमन स्नान, नमस्कार करने से अखिल मोहनकारी सुख को लाभ करता है ॥७॥

अनन्तर बलभद्रकुंड है । स्नानाचमन प्रार्थनमन्त्र यथा पाद्म में—हे बलभद्र के द्वारा निर्म्मित सर्वदा बल बढ़ाने वाले बलभद्र कुंड ! हे तीर्थराज ! आपको नमस्कार । प्रसन्न होकर वर दीजिये । इस मन्त्र के १० बार पाठ पूर्वक स्नानाचमन प्रणाम करे तो सर्वदा बलवान् होकर तीन लोक में विजयी होता है ॥ ८ ॥

This page

ततश्चतुर्भुजकुंडस्नानाचमनप्रार्थनमन्त्रः । आदिवाराहे—

चतुर्भुजस्वरूपेण विष्णुना निर्म्मितस्थले । चतुर्युगसमुत्पन्न तीर्थराज नमोऽस्तु ते ॥

इति मन्त्रं समुच्चार्य चतुर्दिक्षु मुखो भवन् । मज्जनाचमनैः षड्भिः परिपूर्णसुखं लभेत् ॥९॥

ततो सुरभीकुंडस्नानाचमन प्रार्थनामन्त्रः । मात्स्ये—

सुरभीकृततीर्थाय विष्णुप्रीतिप्रदाय च । पापांकुश स्वरूपाय सदा वैमल्यहेतवे ॥

इति त्रयोदशावृत्या मज्जनाचमनैं र्नमन् । चामरैं र्वीज्यमानस्तु नराणामधिपो भवेत् ॥ १० ॥

ततो वत्सकुंडस्नानाचमनप्रार्थनमन्त्रः । ब्राह्मे—

गोवत्सकृततीर्थाय यशोदाप्रीतिदायके । तीर्थराज नमस्तुभ्यं पुत्रपौत्रसुखप्रद ॥

विंशावृत्या पठन्मन्त्रं मज्जनाचमनैं र्नमन् । पुत्रवान् जायते वंध्यो जगद्धारसत्यतामियात् ॥११॥

ततो गोविन्दकुंडस्नानाचमनप्रार्थनमन्त्रः । विष्णुरहस्ये—

शक्रादिनिर्म्मिते तीर्थेऽभिषेकसमुद्भव ! । गोविन्दकुंडसंज्ञाय तीर्थराज नमोस्तु ते ॥

इति मन्त्रं समुच्चार्य्य नवभिर्मज्जनाचमैः । प्रणमन् विजयी भूयात् सर्व्वदा प्रियवल्लभः ॥

इति काम्यवने तीर्थाः कुंडसंज्ञाभिधायिनः । एषु स्नानकृताल्लोकाः जायन्ते मुक्तिभागिनः ॥१२॥

ततो ऽक्षमीलनादिस्थानप्रार्थनमन्त्रः । आदित्यपुराणे—

विष्णुरूपेक्षणार्थाय चक्षुः शैतल्यवर्द्धन ! । दिव्यदृष्टिप्रदायैव निरन्धे दृष्टिदायिने ! ॥

इति मन्त्रं समुच्चार्य्य पञ्चभिः प्रणतीन् चरेत् । दिव्यदृष्टिसमायुक्तो नित्यं विष्णुं विलोकयेत्॥१३

---

अनन्तर चतुर्भुज कुंड है। स्नानाचमन प्रार्थनामन्त्र यथा आदिवाराह में—हे चतुर्भुज स्वरूप से विष्णु कर्तृक निर्म्मित स्थल ! हे चार युग में समुत्पन्न तीर्थराज ! आपको नमस्कार। इस मन्त्र के पाठ पूर्वक चार ओर को मुख करके ६ बार मज्जन,आचमन,प्रणाम करने से परिपूर्ण सुख को प्राप्त होता है ॥९॥

अनन्तर सुरभीकुंड है। स्नानाचमन मन्त्र यथा-मात्स्य में—सुरभी कर्तृक निर्म्मित और विष्णु में प्रीति देने वाले सुरभीकुंड ! आप पाप के अंकुश स्वरूप हैं और सर्वदा पवित्रता के लिये हैं। इस मन्त्र के १६ बार पाठ पूर्वक स्नानाचमन करे तो विविध छत्र चमर से युक्त होकर तीन लोक का अधिपति होता है ॥ १० ॥

अनन्तर वत्सकुण्ड है। स्नानाचमन प्रार्थनामन्त्र यथा ब्राह्म में—गोवत्स द्वारा रचित यशोदा प्रीतिदायी तीर्थराज ! आपको नमस्कार। आप पुत्र, पौत्र, सुख को देने वाले हैं। इस मन्त्र के २० बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करने से बांझ भी पुत्रवान् होता है ॥ ११ ॥

अनन्तर गोविन्दकुण्ड है । स्नानाचमन प्रार्थनामन्त्र यथा विष्णुरहस्य में—शक्रादि कर्तृक निर्म्मित अभिषेक से उत्पन्न तीर्थराज गोविन्दकुंड ! आपको नमस्कार। इस मन्त्र के पाठ पूर्वक ९ बार स्नान, आचमन, नमस्कार करे तो सर्वदा विजयी होकर प्रिय हो जाता है। इति यह सब काम्यबन के तीर्थ कुण्ड हैं। इसमें स्नान करने से मनुष्य मुक्ति भाग हो जाता है ॥ १२ ॥

अनन्तर आँखमींचनी स्थान है। प्रार्थनामन्त्र यथा-आदित्यपुराण में—हे विष्णु के रूप के दर्शन के लिये अक्षमीलन स्थल ! आप नेत्रों में शीतलता देने वाले हैं, निरन्तर दिव्य दृष्टि के भी दाता हैं। महान्

This page

ततो खिलिनीशिलाप्रार्थनमन्त्रः । पुराणसमुच्चये—

कृष्ण गोपालरूपाय ललितावल्लभाय च । नमो गोपीभिरम्याय शिलातीर्थ स्थलाय च ॥
इति मन्त्रं दशावृत्या नमस्कारं समाचरेत् । सदा क्रीडासमायुक्तो कौटुम्बकुलनायकः ॥ १४ ॥

ततो गोमासुरगुफाप्रार्थनमन्त्रः । महाभारते—

कृष्णकृतार्थरूपाय सखिरूपाय ते नमः । मुक्ति गोमासुरस्थान घोरकल्मशनाशन ! ॥
इत्येकादशभिर्मन्त्रमुच्चरन् प्रणतींश्चरेत् । कृतकृत्यो भवेल्लोको वैष्णवं पदमाप्नुयात् ॥ १५ ॥

ततो भोजनस्थलप्रार्थनमन्त्रः । विष्णुधर्मोत्तरे—

अष्टवर्षस्वरूपाढ्य कृष्णपाणितलाङ्कित ! । नमोऽस्तु भोजनस्थल सर्वदा भोगवर्द्धन !
इति षोडशभिर्मन्त्रमुदाहृत्य नमश्चरेत् । सदा सौभाग्यसंपन्नो नानाभोगसुखं लभेत् ॥
अत्रैव कुलदेवांश्च ब्राह्मणांश्चैव भोजयेत् । ईप्सिताः सकलाः कामाः जायन्ते परिपूर्णतां ॥
सुभोजनस्थलं विष्णोः पूजाभिर्विमुखं चरेत् । क्षुधार्त्तो भवते नित्यमृणदारिद्रपीडितः ॥
वनप्रदक्षिणा जाता निष्फला दुःखभागिनी । दत्तं परात्मकं द्रव्यं मध्ये गोप्त्वा न दीयते ॥
चतुर्गुणं भवेद्धानिस्तत्समूलं विनश्यति ॥ १६ ॥

ततो ललितास्थलप्रार्थनमन्त्रः । नारदीय-पञ्चरात्रे—

भोजनस्य शिलायां तु भागपश्चिमभूषिते । ललितानिर्म्मिते स्थाने नमस्ते प्रियवल्लभे ! ॥
इति मन्त्रं समुच्चार्य नवधा प्रणतिश्चरेत् । सदा लालित्यसंयुक्तो धनधान्यसुखं लभेत् ॥ १७ ॥

---

अन्ध को भी नेत्र देने वाले हैं । इस मन्त्र के पाँच बार पाठ पूर्वक प्रणाम करें तो दिव्यदृष्टि पाकर विष्णु-लोक को जाता है ॥ १३ ॥

अनन्तर खिसिलिनी शिला है । प्रार्थनामन्त्र यथा-पुराण समुच्चय में—हे श्री कृष्ण गोपालरूप हे खिसलिनीशिलास्थल ! हे ललिताजी के प्रिय ! हे गोपियों के मनोहरस्थल आपको नमस्कार । इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करें तो सर्वदा कुटुम्बीगणों के साथ क्रीड़ा करता है ॥ १४ ॥

अनन्तर गोमासुर की गुफा है । प्रार्थनामन्त्र यथा-महाभारत में—हे श्री कृष्ण कर्त्तृक कृतार्थ रूप गोमासुर की गुफा आपको नमस्कार । आप श्रीकृष्ण के सखा रूप हैं और भयानक कल्मष के नाशक हैं । इस मन्त्र के ११ बार पाठ पूर्वक प्रणाम करे तो मनुष्य कृतकृत्य होकर वैकुण्ठ पद को प्राप्त होता है ॥१५॥

अनन्तर भोजनस्थल है । प्रार्थनामन्त्र यथा-विष्णु धर्मोत्तर में—हे आठ वर्ष स्वरूप श्रीकृष्ण के हस्ततल से अंकित ! हे सर्वदा भोग को बढ़ाने वाले भोजनस्थल ! आपको नमस्कार । इस मन्त्र के १६ बार पाठ पूर्वक नमस्कार करे तो सर्वदा नाना भोगों को प्राप्त होकर सौभाग्यवान होता है । यहाँ कुल के देवताओं को तथा ब्राह्मणों को भोजन देने से समस्त कामना परिपूर्ण हो जाती हैं । यह भोजन स्थल की पूजा न कर विमुख होकर चले जाने से नित्य क्षुधार्त्त होकर ऋणी व दरिद्र हो जाता है । वनप्रदक्षिणा निष्फल होकर दुःखदायी हो जाती है । यहाँ दानादि न करने से और स्थल में दिया हुआ दानादिक चतुर्गुण हानि को पहुँचाते हैं और समस्त पुण्य विफल हो जाता है ॥ १६ ॥

अनन्तर ललितास्थल है । प्रार्थनामन्त्र यथा नारदीय और पञ्चरात्र में—भोजनशीला के पश्चिम भाग में भूषित ललिता कर्त्तृक निर्म्मित स्थल ! हे प्रिय ! हे वल्लभ ! आपको नमस्कार । इस मन्त्र

ततो सुमनासखीविवाहस्थलप्रार्थनमन्त्रः । बृहद्गौतमीये—

रहस्यसंयुता देवी ललिता प्रियग्रन्थिदा । सुमनासखिमुद्राहरमणीकस्थले नमः ।

इति चतुर्दशावृत्या नमस्कारान्समाचरेत् । सदा वैवाहिकोत्साहैश्चिरायुः सुखमाप्नुयात् ॥१८॥

ततो गरुडस्थलप्रार्थनमन्त्रः । गारुडे—

गरुडाधिष्ठिते स्थाने सर्वापद्विनिवारणे । नारायणकृतोत्साह तीर्थराज नमोऽस्तु ते ॥

इति मन्त्रं दशावृत्या प्रणमेद्गरुडस्थलं । कदाचित् परेभ्यस्तु भयं नैव विलोकयेत् ॥ १९ ॥

ततो कपिलतीर्थ स्नानाचमनप्रार्थनमन्त्रः । भविष्ये-

गुप्तयोगसमायुक्त कपिलाधिष्ठितस्थले । नमो ब्रह्मण्यरूपाय देवहूतीसुताय ते ॥

इति मन्त्रमुदाहृत्य द्विपंचाशनतींश्चरेत् । सर्वदा ज्ञानसंपन्नो लोकानां वश्यकारकः ॥ २० ॥

ततो लोहजंघर्षिस्थानप्रार्थनमन्त्रः । स्कान्दे—

लोहजंघर्षये तुभ्यं देव वज्रांगदायिने । आयुरारोग्यसौख्याय नैरुजं मां सदा कुरु ॥

इति मन्त्रं समुच्चार्य्य सप्तभिः प्रणतींश्चरेत् । सदा नैरोग्यमालभ्य त्रैलोक्ये रमते सुखं ॥२१॥

अथेन्दुलेखास्थानप्रार्थनमन्त्रः । वाराहे—

नानाचित्रांगरूपाय देवानां सुखहेतवे । इन्दुलेखामनोरम्य सुस्थलाय नमो नमः ॥

इति मन्त्रं षडावृत्या प्रणतीन् विधिवच्चरेत् । चित्रवैचित्र्यरूपाढ्यं हर्म्यसौख्यमवाप्नुयात् ॥२२॥

---

के पाठ पूर्वक ९ बार प्रणाम करने से सर्वदा धन, धान्य से सुखी होता है ॥ १७ ॥

अनन्तर सुमनासखी का विवाहस्थल है । प्रार्थनामन्त्र यथा-बृहद्गौतमीय में—हे रहस्यस्थल ! हे ललिता द्वारा रचित मनोहर गाँठ बन्धन ! हे सुमनासखी के विवाहस्थल ! आपको नमस्कार । इस मन्त्र के १४ बार पाठ पूर्वक नमस्कार करने से सर्वदा चिरायु सुखी होकर विवाह उत्सव सुख को प्राप्त होता है ॥ १८ ॥

अनन्तर गरुडस्थल है । प्रार्थनामन्त्र गारुड में—हे गरुड कर्तृक अधिष्ठित स्थल ! हे समस्त विपत्ति नाश करने वाले ! हे नारायण कर्तृक उत्साहित स्थान ! आपको नमस्कार । इस मन्त्र का १० बार पाठ करके स्थल को प्रणाम करने से कभी औरों से भय प्राप्त नहीं होता है ॥ १९ ॥

अनन्तर कपिलतीर्थ है । स्नानाचमनप्रार्थनमन्त्र यथा-भविष्य में—हे गुप्तयोग से युक्त कपिल कर्तृक अधिष्ठित स्थल ! आपको नमस्कार । हे ब्रह्मण्यदेव ! हे देवहूतीपुत्र ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ५२ बार नमस्कार करें । सर्वदा ज्ञान सम्पन्न होकर लोकों को वश में रखता है ॥२०॥

ततो लीलावतीकुण्डस्नानप्रार्थनमन्त्रः—

कृष्णलीलासमुत्पन्न लीलावतीकृताय ते । नमस्ते तीर्थराजाय सखीहेलोद्भवाय च ॥

इत्यष्ट्धा पठन्मन्त्रं मज्जनाचमनै र्नमन् । सदा क्रीडान्वितो राजा शतपत्नीसुखं लभेत् ॥

क्रोशार्द्धपरिमाणेन प्रदक्षिणामथाकरोत् ॥ इति ब० सखी० प्र० ॥८॥

अथ बन०कृष्णान्तर्ध्यानबनप्रदक्षिणा । आदिवाराहे—

सप्तम्यां ज्येष्ठकृष्णे तु कृष्णान्तर्ध्यानसंज्ञकं । आजगाम बनं यात्री प्रार्थयेच्छुद्धचेतसा ॥

प्रा० मन्त्रः—गोपिकाप्रीतिनाशाय क्षणान्तर्ध्यानचेष्ठिने । नमोऽन्तर्ध्यानसंज्ञाय गोपीहरिस्वरूपिणे ॥

इति मन्त्रं षडावृत्या नमस्कारं समाचरेत् । कृतार्थपदवीं लब्ध्वा गोपीवप्रीतिमाप्नुयात् ॥६॥

ततो कृष्णस्य कुण्डस्नानाचमनप्रार्थनमन्त्रः—

कृष्णोद्भवस्वरूपाय गोपिकाप्रीतिदायिने । कृष्णकुण्डाय तीर्थाय नमस्ते पापशान्तये ॥

इति मन्त्रं द्वादशभिर्मज्जनाचमनै र्नमन् । कृतकृत्यो भवेल्लोको लक्ष्मीवान्धनवान्सदा ॥

क्रोशद्वयप्रमाणेन प्रदक्षिणामथाचरेत् ॥ इति ॥१०॥

अथ बन०मुक्तिवनप्रदक्षिणा । आदिपुराणे—अष्टम्यां ज्येष्ठशुक्ले तु नाम मुक्तिवनं गतः ॥

प्रार्थनमन्त्रः—मुक्तये मुक्तिरूपाय मुक्तिसंगवनाय ते । देवगन्धर्वलोकानां मुक्तिदायनमो नमः ॥

इति चतुर्दशावृत्या नमस्कारं समाचरेत् । मुक्तिभागी भवेल्लोको विष्णुसायुज्यमाप्नुयात् ॥११॥

---

अब बनयात्रा प्रसंग में सखीबन की प्रदक्षिणा कहते हैं । ब्राह्म में—भाद्र कृष्णा चतुर्दशी में गोवर्द्धन के निकट सखीबन को जाकर विधिवत् प्रार्थना करें । मन्त्र यथा—हे चौंसठि सखियों को आवास सुख देने वाले कृष्णवल्लभ सखीबन ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक ६४ बार नमस्कार करें तो भगवान के सखी स्वरूप को प्राप्त होकर लोकपूज्य होता है ॥ ७ ॥

अनन्तर लीलावती कुण्ड है । स्नानादि मन्त्र यथा—हे श्रीकृष्ण की लीलाओं से लीलावती कर्तृक स्थापित लीलावतीकुण्ड ! तीर्थराज आपको नमस्कार । आप सखियों की हेला से उत्पन्न हैं । इस मन्त्र के ८ बार पाठ पूर्वक मज्जनादि करें तो राजा सर्वदा शत पत्नी का सुख लाभ करता है । अर्द्ध कोश प्रमाण से प्रदक्षिणा करें ॥ ८ ॥

अब व्रजयात्रा प्रसंग में कृष्णान्तर्द्धानबन की प्रदक्षिणा कहते हैं । आदिवाराह में—ज्येष्ठ कृष्णा सप्तमी में कृष्णान्तर्द्धान बन को आकर बनयात्री शुद्धभाव से प्रार्थना करें । मन्त्र यथा—हे गोपिका प्रीति बाधक क्षणार्द्ध अन्तर्द्धान चेष्टा करने वाले ! हे अन्तर्द्धान नामक गोपिका तथा हरिस्वरूप बन ! आपको नमस्कार । इस मन्त्र के ६ बार पाठ पूर्वक नमस्कार करें तो कृतार्थ पदवी का लाभ कर गोपियों के तुल्य प्रेमी होता है ॥ ६ ॥

अनन्तर कृष्णकुण्ड है । स्नानाचमन मन्त्र यथा—हे कृष्ण के द्वारा उत्पन्न स्वरूप ! हे गोपिका प्रीति को देने वाले तीर्थराज कृष्णकुण्ड ! पाप शान्ति के लिये आपको नमस्कार । इस मन्त्र के १२ बार पाठ पूर्वक मज्जनादि करें तो मनुष्य कृत्य न होकर लक्ष्मीवान् होता है । २ कोश प्रमाण से बन की प्रदक्षिणा करें ॥१०॥

अब व्रजयात्रा प्रसंग में मुक्तिवन की प्रदक्षिणा कहते हैं । आदिपुराण में—ज्येष्ठ शुक्ला अष्टमी

ततो मधुमंगलकुंडस्नानाचमन प्रार्थनमन्त्रः—

मधुमंगलकुण्डाय कृष्णकेलिविधायिने । गोपीश्रमविनिर्धौत पीताभाय नमोऽस्तु ते ॥
इति सप्तदशावृत्या मज्जनाचमनैं र्नमन् । कृतार्थपदवीं लब्ध्वा सखीत्वमाप्नुयाद्धरेः ॥
पादोनद्वयक्रोशेन प्रदक्षिणामथाचरेत् । यद्यशौचं लभेन्मृत्युं मुक्तिभागी भवेन्नरः ॥१२॥

अथ वन०वियोगवनप्रदक्षिणा -वैशाखशुक्लद्वादश्यां वियोगवनमागतः ।
प्रा०मन्त्रः—वियोगगोपिकानित्यकृष्णचिन्ताभिधायिने । वियोगशमनार्थाय नमस्ते हरिवल्लभ ॥
इति मन्त्रं नवावृत्या नमस्कारं समाचरेत् । वियोगं नैव पश्येत कदाचित्पापभाक् यदि ॥१३॥

ततो उद्धवकुण्डस्नानाचमनप्रार्थनमन्त्रः—

उद्धवस्नपनोद्भूत तीर्थराज नमोऽस्तु ते । गोपिरक्षणमोदाय तत्वज्ञानप्रदायिने ॥
इत्यष्टभिर्पठन्मत्रं मज्जनाचमनैं र्नमन् । बुद्धिमान्नीतिवाल्लोके जायतेऽस्य प्रसादतः ॥
क्रोशार्द्ध परिमाणेन प्रदक्षिणामथाचरेत् ॥ इति ॥१४॥

अथ वनयात्राप्रसंगे गोदृष्टिवनप्रदक्षिणा । वामनपुराणे—

भाद्रे मासि सिते पक्षेऽमावस्यादिनोत्सवे । गोदृष्टिवनमायातः प्रार्थनं कारयेत्सुधीः ॥
प्रा०मंत्रः—गोकृष्णेक्षणसंभूत गोदृष्ट्याख्यवनाय ते । गोपालवचनारम्य मोक्षरूपाय ते नमः ॥
इति मन्त्रं समुच्चार्य नमस्कारं समाचरेत् । दिव्यदृष्टिमवाप्नोति मोक्षाख्यपदवीं लभेत् ॥ १५ ॥

---

में मुक्तिवन की यात्रा करें । प्रार्थनामन्त्र यथा—हे मुक्ति के लिये मुक्तिस्वरूप मुक्तिवन ! आपको नमस्कार है । आप देवता, गन्धर्व, मनुष्यों को मुक्ति देने वाले हैं । इस मन्त्र के १४ बार पाठ पूर्वक नमस्कार करें तो मनुष्य मुक्तिभागी होकर विष्णुसायुज्य को प्राप्त होता है ॥ ११ ॥

वहाँ मधुमंगलकुण्ड है । स्नानाचमन प्रार्थनामन्त्र यथा—हे मधुमंगल से किये हुए स्नान ! हे कृष्णकेलि देने वाले ! हे गोपियों का श्रम को दूर करने वाले ! आपको नमस्कार । आपका पीला जल है । इस मन्त्र के १७ बार पाठ पूर्वक मज्जनादि करें तो कृतार्थ पदवी को प्राप्त होकर सखी रूप को धारण करता है । १॥ कोश प्रमाण से प्रदक्षिणा करें । यदि अशौच अवस्था में मृत्यु हो जाय तो भी मुक्तिभागी होता है ॥१२॥

अब वनयात्रा प्रसंग में वियोगवन की यात्रा करें । प्रार्थनामन्त्र यथा-हे वियोगिनी गोपिकाओं के नित्य श्रीकृष्ण स्वरूप चिन्तन स्थल ! वियोग नाश के लिये हरिवल्लभ आपको नमस्कार करता हूँ । इस मन्त्र के ६ बार पाठ पूर्वक नमस्कार करने से कभी पाप भागी भी वियोग नहीं देखता है ॥१३॥

वहाँ उद्धवकुण्ड है । स्नानादि मन्त्र यथा-हे उद्धवजी के स्नपन से उत्पन्न तीर्थराज ! हे उद्धव-कुण्ड ! गोपिका रक्षण में आनन्दित तत्वज्ञान देने वाले आपको नमस्कार । इस मन्त्र के ८ बार पाठ पूर्वक मज्जनादि करें तो मनुष्य बुद्धिमान् व नीतिवान् होता है । अर्द्ध कोश प्रमाण से वन की प्रदक्षिणा करें॥१४॥

अब वनयात्रा प्रसंग में गोदृष्टिवन की प्रदक्षिणा कहते हैं । वामनपुराण में-भाद्रकृष्णा अमावस्या में गोदृष्टिवन को जाकर प्रार्थना करें । मन्त्र यथा-हे गौ कृष्ण की इक्षण से उत्पन्न गोदृष्टि नामक वन ! हे गोपाल के वचन से रम्य ! हे मोक्षरूप ! आपको नमस्कार । इस मन्त्र के ० बार पाठ पूर्वक प्रणाम करें तो मनुष्य दिव्यदृष्टि के लाभ पूर्वक मुक्तिभागी होता है ॥ १५ ॥

ततो गोपालकुंडस्नानाचमनप्रार्थनमन्त्रः—

गोपालश्रमनाशाय गोपालवरदायिने । चिरायुर्वर्द्धनार्थाय तीर्थराज नमोऽस्तु ते ॥

इति मन्त्रं दशावृत्त्या मज्जनाचमनं नमन् । गृहबालसुखं लब्ध्वा नानाभोगसमाप्नुयात् ॥१६॥

ततो स्वप्नेश्वराय महादेवेक्षणप्रार्थनमन्त्रः—

स्वप्नेश्वराय देवाय हिंसवृक्षाधिवासिने । सुस्वप्नवरदायै च नमस्तेऽर्थप्रदायिने ॥

इत्येकादशाभिर्मन्त्रं जपित्वा प्रणतिं चरेत् । दुःस्वप्नं नश्यते तस्य सुस्वप्नवरमाप्नुयात् ॥

सार्द्धक्रोशत्रयेणैव प्रदक्षिणामथाचरेत् ॥ इति ॥१७॥

अथ बन० स्वप्नबनप्रदक्षिणा । मात्स्ये—

आषाढ़े कृष्णपक्षे तु नवम्यां भृगुसंयुते । नामस्वप्नबनं श्रेष्ठमाजगाम मुनीश्वर ॥

प्रा०मन्त्रः—सुस्वप्नदर्शनार्थाय दुःस्वप्नशमनाय ते । अक्रूरवरद श्रेष्ठ स्वप्नाख्याय नमो नमः ॥

इत्यष्टधा जपन्मन्त्रं नमस्कारं समाचरेत् । स्वप्ने लक्ष्मीवरं लब्ध्वा परिपूर्णसुखं लभेत् ॥१८॥

ततोऽक्रूरकुंडस्नानाचमनप्रार्थनमन्त्रः—

क्रूराक्रूरकृतार्थाय दुर्बुद्धिशमनाय ते । अक्रूरस्तपनोद्भुत तीर्थराज नमोऽस्तु ते ॥

इति मन्त्रं समुच्चार्य्य दशभिर्मज्जनाचमैः । नमस्कारं प्रकुर्वीत सुखचरममाप्नुयात् ॥

क्रोशार्द्धपरिमाणेन प्रदक्षिणामथाचरेत् ॥ इति व्रजयात्राप्रसंगे स्वप्नवनप्रदक्षिणा ॥

स्वप्नशुभाशुभयोगं व्रजोत्सवाल्हादिन्यां ॥ १६ ॥

अथ व्रज० शुकबनप्रदक्षिणा । ब्रह्माण्डे ॥ नीतिप्रस्तावे--ज्येष्ठशुक्लदशम्यां तु शुकनामबनं गतः ॥

---

वहाँ गोपालकुण्ड है । स्नानादि मन्त्र यथा-हे गोपाल के श्रमनाश के लिये गोपालकुण्ड ! आप गोपाल को वर देने वाले हैं । हे तीर्थराज चिरायु होने के लिये आपको नमस्कार । इस मन्त्र के १० बार पाठ पूर्वक मज्जनादि करने से गृह, बालक, सुख और भोग प्राप्त होता है ॥ १७ ॥

अनन्तर वहाँ स्वनेश्वर महादेव के दर्शन हैं । प्रार्थनामन्त्र यथा-हे हींस वृक्षों के बीच वास करने वाले स्वनेश्वर महादेव ! आप दुःस्वप्न का नाश करने वाले हैं । समस्त अर्थ को देने वाले हैं । इस मन्त्र के ११ बार जपपूर्वक प्रणाम करें तो दुःस्वप्न का नाश और सुस्वप्न की प्राप्ति होती है । ३॥ कोश प्रमाण से बन की प्रदक्षिणा करें ॥ १७ ॥

अब व्रजयात्रा प्रसंग में स्वप्नबन की प्रदक्षिणा कहते हैं । मात्स्य में—आषाढ़ कृष्णपक्ष की नवमी भृगुवार के दिन हे मुनीश्वर स्वप्नबन की यात्रा करें । प्रार्थनामन्त्र यथा--हे सुस्वप्न के दाता ! हे दुःस्वप्न के नाशक ! हे अक्रूर को वर देने वाले श्रेष्ठ स्वप्न नामक बन ! आपको नमस्कार । इस मन्त्र के ८ बार जपपूर्वक प्रणाम करने से स्वप्न में लक्ष्मीवर को प्राप्त होता है ॥ १८ ॥

अनन्तर अक्रूरकुंड है । स्नानादि मन्त्र यथा--हे क्रूर अक्रूर को कृतार्थ करने वाले ! हे मन्दबुद्धि को नाश करने वाले ! हे अक्रूरजी के स्नान से उत्पन्न अक्रूरकुंड ! तीर्थराज आपको नमस्कार । इस मन्त्र के पाठ पूर्वक १० बार मज्जनादि करें तो सुन्दर बुद्धि को प्राप्त होता है । आधा कोश प्रमाण से परिक्रमा करें । इति यह व्रजयात्रा प्रसंग में स्वप्नबन की प्रदक्षिणा । स्वप्न का शुभ, अशुभ प्रयोग मत्कर्तृक रचित व्रजोत्सवल्हादिनी नामक ग्रन्थ में हैं ॥ १६ ॥

प्रा० म०—गोपिकाहितकृद्रूप कृष्णस्य वासहेतवे । नमः शुकबनाय च षट्शास्त्रवरदायिने ॥
इति मन्त्रं दशावृत्या नमस्कारं समाचरेत् । ज्ञानवान्नीतिवाल्लोको धार्मिको नृपति र्भवेत् ॥
द्विजदानसमं पुण्यं कृष्णस्तु प्रीतिदोऽभवत् ॥ २० ॥

ततो द्वारिकाकुण्डस्नानाचमनप्रार्थनमन्त्रः—
कृष्णसंभावनोद्भूत गोपिकाप्रीतिदायक । द्वारिकाकुण्डतीर्थाय नमस्ते गोपीवल्लभ ! ॥
इतिमन्त्रं समुच्चार्य्य पञ्चभिर्मज्जनाचमैः । नमस्कारं प्रकुर्वीत द्वारिकास्नानजं फलं ॥
पादक्रोशप्रमाणेन प्रदक्षिणामथाचरेत् ॥ इति ॥२१॥

अथ बन०प्र० लघुशेषशयनबनप्रदक्षिणा । पाद्मे—
भाद्रशुक्लर्षिपञ्चम्यां शेषाख्यशयनं बनं । जगाम प्रार्थनं कुर्य्यात्सर्वकामवाप्नुयात् ॥
प्रा०म०—शेषशयनश्रीकृष्णसुखावासस्वरूपिणे । लक्ष्मीपादांघ्रि सेव्याय नमस्ते कमलाप्रिये ॥
इति मन्त्रं समुच्चार्य्य नवभिः प्रणतिं चरेत् । सर्वदा सुखवासेन परिपूर्णसुखं लभेत् ॥२२॥

ततो लक्ष्मीकुण्डस्नानाचमनप्रार्थनमन्त्रः—
कमलास्नपनोद्भूतपीताम्भसलिलाय ते । नमः कैवल्यनाथाय त्रैवर्गफलदायिने ॥
इति षोडशभिर्मन्त्रं मज्जनाचमनै र्नमन् । कलाकाष्ठामुहूर्त्तेन लक्ष्मीवान्जायते नरः ॥२३॥

अथ ब्रज०दोलाबनप्रदक्षिणा । स्कान्दे—श्रावणशुक्लपञ्चम्यां दोलाबनमुपागतः ॥

---

अब ब्रजयात्रा प्रसंग में शुकबन की प्रदक्षिणा कहते हैं। ब्रह्माण्ड में—नीतिप्रस्तावपर-ज्येष्ठ शुक्ला दशमी में शुक नामक बन को जावें। प्रार्थनामन्त्र यथा—हे गोपियों के हितकारक रूप वाले! हे कृष्ण वास के लिये शुकबन! षट्शास्त्र वर को देने वाले आपको नमस्कार। इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करें तो मनुष्य ज्ञानवान् नीतिवान् और राजा धार्म्मिक होता है। ब्राह्मण को दान देने से जो पुण्य होता है वह उसको प्राप्त होता है और श्रीकृष्ण सर्वदा प्रसन्न होते हैं ॥२०॥

अनन्तर द्वारिकाकुंड है। स्नानादिमन्त्र यथा—हे कृष्ण की संभावना से उत्पन्न गोपियों को प्रीति देने वाले द्वारिकाकुंड! गोपीवल्लभ आपको नमस्कार है। इस मन्त्र के पाठ पूर्वक ५ बार मज्जनादि करें तो द्वारिका स्नान का फल प्राप्त होता है। पाव कोश प्रमाण से बन की प्रदक्षिणा करें ॥२१॥

अब ब्रजयात्रा प्रसंग में लघुशेषशयन बन की प्रदक्षिणा कहते हैं। पाद्म में—भाद्र शुक्ल ऋषि पंचमी में शेषाख्य शयन बन को जाकर प्रार्थना करने से समस्त कामना मिलती है। मन्त्र यथा—हे शेष शयनकारी श्रीकृष्ण के सुखवास स्वरूप! हे लक्ष्मी कर्तृक श्रीहरि के चरण कमल सेवन स्थल! हे कमला-प्रिय! आपको नमस्कार। इस मन्त्र के पाठ पूर्वक ९ बार प्रणाम करें तो सर्वदा परिपूर्ण सुख को प्राप्त होता है ॥ २२ ॥

वहाँ लक्ष्मीकुंड है। स्नानादि मन्त्र यथा—हे कमलाजी के स्नान से उत्पन्न पीले जल वाले कमलाकुंड! कैवल्य नायक, त्रैवर्ग फल के दाता आपको नमस्कार। इस मन्त्र के १६ बार पाठ पूर्वक मज्जनादि करें तो मनुष्य कलाकाष्ठा मुहूर्त्त द्वारा लक्ष्मीवान् होता है। १॥ कोश प्रमाण से बन की प्रदक्षिणा करें ॥२३॥

अब ब्रजयात्रा प्रसंग में दोलाबन की प्रदक्षिणा कहते हैं। स्कान्द में—श्रावण शुक्ल पञ्चमी में

प्रा०म०—दोलोत्साहसखीरम्य कृष्णोल्लासविधायिने । दोलाबन नमस्तुभ्यं सर्वदा सुखदायिने ॥
इति मन्त्रं समुच्चार्य्य चतुर्विंशावृतेन च । नमस्कुर्य्याद्विधानेन परिपूर्णसुखं लभेत् ॥२४॥
ततो विशाखाकुण्डस्नानाचमनप्रार्थनमन्त्रः—
चतुःषष्ठिसखीरम्यस्नपनोद्भवकेलिने । नमस्ते तीर्थराजाय विशाखाकृतशोभिने ॥
इत्यष्टधापठन्मन्त्रं मज्जनाचमनं नमन् । सर्वदा रमणीभिस्तु सकलार्थसुखं लभेत् ॥
क्रोशार्द्धपरिमाणेन प्रदक्षिणामथाचरेत् ॥ इति ॥२५॥
अथ बन०प्रसगे हाहाबनप्रदक्षिणा । भविष्योत्तरे—ज्येष्ठशुक्ले च द्वादश्यां हाहाबनमुपागतः ।
प्रार्थनमंत्रः—गोपिकाक्षोभकृत्कृष्णनानानृत्यविधायिने । विमलोत्सवरूपाय हाहाबन नमोऽस्तु ते ॥
इति मन्त्रं समुच्चार्य्य दशधाप्रणतिं चरेत् । सर्वदा विमलोत्साहचीरंजीवसुखं लभेत् ॥२६॥
ततो रतिकेलिकूपस्नानाचमनप्रार्थनमन्त्रः—
रतिकेलिसखास्नानकूपतीर्थं नमोऽस्तु ते । गंगावेत्रवतीगोदात्रिधाजलस्वरूपिणे ॥
इति मन्त्रं समुच्चार्य्य सप्तविंशावृतेन च । मज्जनाचमनात्पार्थ्यं रतिकेलिसुखं लभेत् ॥
पादक्रोशप्रमाणेन प्रदक्षिणामथाचरेत् ॥ इति ॥२७॥
अथगानबनप्रदक्षिणा । कौर्म्ये—प्रतिपज्ज्येष्ठकृष्णे तु गानसंज्ञं बनं गतः ।
प्रार्थनमन्त्रः—गोप्युत्साहकृतोद्गान कृष्णेंगितविधायिने । सर्वदोत्सवरूपाय नमो गानबनाय ते ॥
इति मन्त्रं दशावृत्या नमस्कारं समाचरेत् । वैवाहादिकमांगल्यैः सर्वदासुखमन्वभूत् ॥२८॥

---

दोलाबन में उपस्थित होवें । प्रार्थनमन्त्र—हे दोलोत्सव परायण सखियों से रम्य ! हे श्रीकृष्ण को उल्लास देने वाले दोलाबन ! सर्वदा सुख दाता आपको नमस्कार । इस मन्त्र के पाठ पूर्वक २४ बार नमस्कार करें तो परिपूर्ण सुख की प्राप्ति होती है ॥२४॥

अनन्तर विशाखाकुंड है । स्नानादि मन्त्र यथा—हे चौषठी सखीयों के स्नान द्वारा उत्पन्न ! हे केलिरूप तीर्थराज ! विशाखा कर्तृक शोभा प्राप्त आपको नमस्कार । इस मन्त्र के ८ बार पाठ पूर्वक मज्जनादि करें तो सर्वदा रमणियों के साथ समस्त अभीष्ट को प्राप्त होता है । आधा कोश प्रमाण से बन की प्रदक्षिणा करें ॥ २५ ॥

अब व्रजयात्रा प्रसंग में हाहाबन की प्रदक्षिणा कहते हैं । भविष्योत्तर में—ज्येष्ठ शुक्ला द्वादशी में हाहाबन में उपस्थित होवें । प्रार्थनामन्त्र यथा—हे गोपियों की क्षोभकारी श्रीकृष्ण के नाना प्रकार नृत्य करने के स्थल ! हे विशुद्ध उत्सवरूप हाहाबन ! आपको नमस्कार । इस मन्त्र के पाठ पूर्वक १० बार प्रणाम करें तो सर्वदा उत्साही होकर चिरञ्जीवी होता है ॥२६॥

वहाँ रतिकेलिकूप है । स्नानाचमन मन्त्र यथा—हे रतिकेलि सखी के स्नान से उत्पन्न ! हे गंगा, गोदावरी, वेत्रवती के जलरूप ! आपको नमस्कार है । इस मन्त्र के पाठ पूर्वक २७ बार मज्जनादि करें तो रतिकेलि सुख को प्राप्त होता है । पाव कोश प्रमाण से प्रदक्षिणा करें ॥२७॥

अब व्रजयात्रा प्रसंग में गानबन की प्रदक्षिणा कहते हैं । कौर्म्य में—ज्येष्ठ कृष्णा प्रतिपदा के दिन गान नामक बन को गमन करें । प्रार्थनामन्त्र यथा—हे गोपियों के द्वारा उत्साह पूर्वक किये गये गान जिसमें ! हे श्रीकृष्ण की इंगित का विधान करने वाले गानबन ! सर्वदा उत्सव स्वरूप आपको नमस्कार ।

ततो गन्धर्वकुण्डस्नानप्रार्थनमन्त्रः—

शुभारत्यभिरामाय तीर्थराज नमोऽस्तु ते। विश्वावसुकृतस्नान सुकण्ठवरदायिने ॥
इत्येकादशभिर्मंत्रं मज्जनाचमनैर्नमन्। कटुवाक्यो सुवाक्योऽभूल्लोकवल्लभतां व्रजेत् ॥
सपादक्रोशमात्रेण प्रदक्षिणामथाचरेत् ॥ इति ॥२९॥

अथ वन०प्रसंगे लेपनवनप्रदक्षिणा। नृसिंहपुराणे—भाद्रशुक्लद्वितीयायां लेपनाख्यवनं ययौ।
प्रा० मंत्रः—गोपिकागोमयोत्साहलिप्तभूमिवनाय ते। कृष्णपूर्णसुखाल्हाद लेपनाख्याय ते नमः ॥

इत्येकविंशदावृत्या मन्त्रमुक्त्वा नमश्चरेत्। रमणीकगृहाद्यैस्तु समस्तसुखमाप्नुयात् ॥३०॥
वैवाहपुत्रकोत्साहे वस्तु नीत्वा पथि व्रजन्। कोपि विक्रयवाक्येन तं ब्रवीद्वचनं भ्रमात् ॥
षड्मासाभ्यन्तरे तस्य फलमाप्नोति तादृशं। शवस्य दहनार्थाय काष्टं नीत्वा पथि व्रजन् ॥
पथिको पृच्छते वाक्यं सहसा विक्रयाय च। षड्मासाभ्यन्तरे स मृत्युमाप्नोति न संशयः ॥
इन्धनादिं समादाय प्राणी संख्याविधायकं। पञ्चाशत्प्रातरे चैव विनापात्रादिभिर्युतः ॥
तस्यैव भवते नूनं मृत्युसंस्कारजं फलं। तस्मात्परित्यजेद्यत्नाद्धस्तेंधनपरिग्रहं ॥
दीपसंस्कारजावन्हिः शवाग्निरिव जायते। मृत्सूनकाऽन्तरेस्नायात्पुनर्भृत्सूनकं लभेत् ॥
विनामृद्गोमयालिप्ताद्यशुभाशुभवर्द्धिनी ॥ इति गोमयलिप्तभूमिदृष्टान्तः ॥३१॥

ततो नरहरिकुण्डस्नानाचमनप्रार्थनमन्त्रः—

गोपिकाभयकृद्रूपकृष्णस्नपनसम्भव। तीर्थराज नमस्तुभ्यं सर्वबाधा प्रशान्तये ॥
इतिमन्त्रं समुच्चार्य्य द्वाविंशैर्मज्जनाचमैः। प्रणतिं कुरुते धीमान् सर्वबाधाद्विमुच्यते ॥
सार्द्धक्रोशप्रमाणेन प्रदक्षिणमथाचरेत् ॥ इति ॥३२॥

अथ वनयात्राप्रसंगे परस्परवनप्रदक्षिणा। वाराहे—भाद्रकृष्णचतुर्दश्यां परस्परवनं गतः।

---

इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करें तो विवाह सम्बन्धी मांगल्यों से सर्वदा सुख का अनुभव करता है ॥ २८ ॥

अनन्तर गन्धर्वकुण्ड है। स्नान, आचमन, प्रार्थनामन्त्र यथा- हे सुन्दर वाणी से अभिराम तीर्थराज! हे विश्वावसुकृत स्नान स्थल! सुकण्ठ वर को देने वाले आपको नमस्कार। इस मन्त्र के ११ बार पाठ पूर्वक मज्जनादि करें तो कटुवाक्य मीठा वाक्य हो जाता है और मनुष्य लोकप्रिय होता है। १। कोश प्रमाण से प्रदक्षिणा करें ॥२९॥

अब वनयात्रा प्रसंग में लेपनवन की प्रदक्षिणा कहते हैं। नृसिंहपुराण में—भाद्र शुक्ल द्वितीया में लेपन नामक वन को जावें। प्रार्थनामन्त्र यथा-हे गोपिका कर्तृक गोमय द्वारा लिप्त स्थल! हे श्रीकृष्ण के परिपूर्ण सुखाल्हादकारी लेपनवन! आपको नमस्कार। इस मन्त्र के २१ बार पाठ पूर्वक नमस्कार करें तो रमणीय गृहादि से सुखी होता है ॥३०॥ अनुवाद सरल है। मूल श्लोक देखें ॥३१॥

ततो नरहरिकुंड स्नानाचमन मन्त्र—हे गोपिकाओं को भय देने वाले रूप को धारण करके श्रीकृष्ण कर्तृक स्नान द्वारा उत्पन्न तीर्थराज! सर्वदा बाधा शान्ति देने वाले आपको नमस्कार। इस मन्त्र के पाठ पूर्वक २२ बार मज्जनादि करें। प्रणाम से समस्त बाधा दूर हो जाती है। १॥ कोश प्रमाण से वन की प्रदक्षिणा करें ॥३२॥

प्रा०मंत्रः—परस्परोद्भवप्रीति राधाकृष्णविहारिणे । परस्परवनायैव नमस्तुभ्यं प्रसीद मे ॥
इति मन्त्रं समुच्चार्य्य नवभिः प्रणतिञ्चरेत् । युगले बहुधाप्रीतिश्चिरायुर्वरदायिनी ॥
अत्रैवपूजनं कुर्याद्युगलस्य विधानतः । यथेष्टफलमाप्नोति प्रतिमापूजनाद्धरेः ॥ ३३ ॥
अष्टप्रकारमूर्त्तीनां बलदेवप्रभृतिनां । बालपौगण्डकौमारं युगलैकस्वरूपिणां ॥
तेषां पूजाफलं ब्रूहि तादृशं देवकीसुत ! ॥ पूजनप्रकारं भिन्नभिन्नत्वेन कृष्णार्च्चनचन्द्रिकायां ॥
व्रजभक्तिविलासाख्ये ग्रन्थपूजाफलं लिखेत् । अरिष्टदर्शनं शान्तिर्बृहद्व्रजगुणोत्सवे ॥
आगमागममुत्पातमष्टादशपरिच्छेदे । कलिकालप्रमाणेन ह्युत्पातं लिखितं मया ॥
सप्तग्रन्थान्तरे सोऽयं व्रजभक्तिविलासकः । इष्टो कृष्णांगसंज्ञस्तु नित्यपूजाविधायकः ॥
रंगनाथकुलोद्भूताः प्रयत्नेन च गोपयेत् । न दातव्यं न दातव्यं न दातव्यं कदाचन ॥
लिखित्वा न्यस्यते कंठे बाहौ वा विनिर्बंधयेत् । व्रजमण्डलभूगोलं यन्त्रं विष्णुकलेवरं ॥
अष्टसिद्धिमवाप्नोति ज्येष्ठो भास्करसंभवः ॥३४॥ इति श्रीभट्टोक्तिः ॥

अथ स्वरूपाणां पूजनफलमाह । विष्णुयामले—
गोकुलचन्द्रमादीनां बालसंज्ञाभिधायिनां । परिचर्य्याकृते यस्तु विंशप्राकारकं सुखं ॥
प्रतापैश्वर्य्यधर्म्मश्च विजयं धर्म्मकर्म्मणः । अर्थकर्मसुखं मोक्षं धनधान्यकलत्रता ॥
उत्सवोत्साहवैहारलक्ष्मीकेलिरतिः शुभं । रमणं मंगलं ह्येतानेकविंशान् लभेत्सदा ॥
बालमूर्त्तौ च पाषाणे अथवा धातुसंज्ञके । कृष्णक्रीडामये मूर्त्तौ मुकुन्दादिप्रभृतिनि ॥
लाडिलेयं समभ्यर्च्य फलमेतदवाप्नुयात् । श्रीगोवर्द्धननाथादिसंज्ञाकौमारकेषु च ॥
पाषाणरूपश्रीकृष्णहरिदेवादिषु क्रमात् । परिचर्य्याकृते यस्तु द्विवेदाप्त ४२ सुखं लभेत् ॥

---

अत्र बनयात्रा प्रसंग में परस्परबन की प्रदक्षिणा कहते हैं । वाराह में—भाद्र कृष्णा चतुर्दशी में परस्परबन को जावें । प्रार्थनामन्त्र यथा—हे परस्पर प्रेम से उत्पन्न राधाकृष्ण विहार स्थल ! हे परस्पर नामक बन आपको नमस्कार । आप प्रसन्न हों । इस मन्त्र के पाठ पूर्वक ९ बार प्रणाम करें तो दम्पति में बहुत प्रकार से प्रेम होकर मनुष्य चिरायु होता है । यहाँ यथा विधि युगल की पूजा करें तो यथेष्ट फल को प्राप्त होता है ॥३३॥

बलदेव स्वरूप प्रभृति बाल्य, पौगण्ड, कौमार की युगल रूप की सेवा पूजा करें । पूजा का प्रकार अलग २ कृष्णार्च्चनचन्द्रिका नामक ग्रन्थ में है । इस व्रजभक्तिविलास ग्रन्थ में ग्रन्थ पूजा का फल लिखते हैं । अरिष्ट दर्शन, शान्ति प्रभृति बृहद्व्रजगुणोत्सव में १८ अध्याय लिखे हैं । कलिकाल प्रमाण से उत्पात प्रभृति का वर्णन मैंने किया है । सात ग्रन्थों के बीच यह व्रजभक्तिविलास, नामक ग्रन्थ है, जो श्रीकृष्ण के अंग रूप तथा नित्य पूजा करने के योग्य है । रंगनाथ कुलोद्भव वैष्णव गण इस ग्रन्थ को यत्नपूर्वक रखें । कभी अवैष्णवों को दान न करें । विष्णु के अंग स्वरूप व्रजमण्डल भूगोल यन्त्र बनाकर कण्ठ में अर्पण पूर्वक बाहु में बाँधे तो अष्टसिद्धि को प्राप्त होता है ॥३४॥

अत्र स्वरूप के पूजन का फल कहते हैं । विष्णुयामल में– गोकुलचन्द्रमा प्रभृति बाल मूर्त्ति की परिचर्या में प्रतापादि २० प्रकार सुख को प्राप्त होता है । पाषाण किम्बा धातुमय मुकुन्द प्रभृति बाले मूर्त्ति और लाडिलेय मूर्त्ति के पूजन से उक्त २० प्रकार फल को ही प्राप्त होता है । श्रीगोवर्द्धननाथ, हरिदेव प्रभृति

भोगमांगल्यदातृत्व सुखसिद्धिविहारकं । तपः सिद्धिश्च भांडारसम्पत्तिः कोशराज्यकं ॥
कलानिधित्वं सौभाग्यवस्त्राभूषणवैमलं । सुखसद्मसुखारामगोधनं श्रेयःधान्यकं ॥
मोक्षार्थधर्मकर्मायुरैश्वर्यं विक्रमं धनं । लक्ष्मीप्रतापवैहाररतिकेलिकलत्रता ॥
उत्साहोत्सवकामांश्च लोकेषु विजयं लभेत् । मूर्त्तौ एकाकिनिसंस्थे फलमेतत्प्रकीर्त्तितं ॥
इति कौमारसंज्ञानां पूजाफलमुदाहृतं । बलदेवादिपौगण्डधातुपाषाणरूपिणां ॥
सदा युगलसंस्थानां रेवत्यादिप्रभृत्तिनां । मूर्त्तिनां रामकृष्णाणां पूजायां फलमीरितं ॥
पंचषष्ठिसुखान् लब्ध्वा लोकपूज्यो भवेन्नरः । भोगैश्वर्य्यप्रतापश्च विजयार्थकलासुखं ॥
दातृत्वधर्मकर्माणि मोक्षसिद्धिश्च विक्रमं । तपःसिद्धिर्धनधान्यं राज्यं भाण्डारकोषकं ॥
गोधनं श्रेयःसौभाग्यं वस्त्राभरणसद्म च । पद्मारामकलत्रं च रतिकेलिश्च मंगलं ॥
उत्साहोत्सववैहाररमणं निर्भयं सुखं । वापीकूपतडागानामधिपो धर्मशीलवान् ॥
कीर्त्तिवान् यशसंयुक्तो देशग्रामाधिपो भवेत् । सुबुद्धिज्ञानसम्पन्नः गुणज्ञो सत्यवाक् सदा ॥
प्रशंसया समायुक्तो विष्णुलोकमवाप्नुयात् । प्रभुशक्तिसमायुक्तो रमणीवश्यकारकः ॥
राज्यवश्यकृतः पूज्यो लोकानां वश्यकारकः । एतत्फलमवाप्नोति युगले पूजिते यदि ॥
अयशारिष्टदुर्बुद्धिरोगशोकदरिद्रता । क्लेशोपद्रवशंका च पराजयममंगलं ॥
असिद्धयज्ञानदुःखं च द्रव्यवस्त्रापहारकः । एतद्दोषकृतात्पापान्मुच्यते नात्र संशयः ॥
बालसेवादिके कार्य्ये भ्रूणहत्यादिमुच्यते । गर्भहत्यानीव हत्या पशुहत्या दरिद्रता ॥
ऋणं स्वानादिहत्या च ब्रह्महत्यादिमुच्यते । बालसेवादिके कार्य्ये एते दोषा व्यपोहति ॥
ब्रह्मलोकमवाप्नोति बालसेवारतो सुधीः । कौमारसंज्ञके सेवाकृते मुक्तिमवाप्नुयात् ॥
अज्ञातपातकाद्दोषाद्गम्यागम्यापराधतः । निर्दोषबधदंडाच्च भक्ष्याभक्ष्यापराधतः ॥
इति धातुमयें मूर्त्तौ पाषाणे ह्यथवास्थिते । बालकौमारपौगण्डे फलमेतत्प्रकीर्त्तितं ॥

इति शैले धातुमये त्रिविधस्वरूपपूजनफलं ॥

अथ दारुमयीमूर्त्तौ भानुनंदाविकाहरौ । पूजिते द्वादशान् कामान् तादृशं फलमाप्नुयात् ॥
भोगैश्वर्य्यप्रतापश्च मुक्तिमांगल्यश्रेयसं । विक्रमं धनधान्यं च कमलोत्सवराज्यकं ॥
एतद्द्वादशसंख्याकं फलमाप्नोति पूजकः । भ्रूणहत्यादिकं पापं मुच्यते नात्र संशयः ॥

इतिदारुमयस्वरूपपरिचर्य्याफलं ॥

अथारिष्टविनाशाय मूर्त्तिं लोहमयीं यजेत् ॥

स्कान्दे—अमंगलमकल्याणं पराजयभयं रुजः । असिद्धयज्ञानविद्वेषक्लेशोपद्रवनाशनं ॥
कुदृशोद्भवनाशाय व्याधिबाधाप्रशांतये । सर्वकामानवाप्नोति लोहमूर्त्तौ प्रपूजके ॥

इति लोहमूर्त्तिपूजनफलं ॥

अथ लिप्रमयीं मूर्त्तिं यजेत्कामार्थसिद्धये ॥

पाद्मे—गोष्यकामधनं धान्यं यशः कीर्त्तिं च निर्भयं । दातृत्वसुखसम्पत्तिः श्रेयसौभाग्यमीप्सितं ॥
वस्त्राभरणलक्ष्मी च परिपूर्णसुखं लभेत् । इति लिप्रमये मूर्त्तौ पूजिते फलमाप्नुयात् ॥

इति लिप्रमयीपूजनफलं ॥

अथ चित्रमयीं मूर्त्तिं लिखित्वा पूजयेन्नरः ॥

ब्राह्मे—सुबुद्धिमंगलं भद्रं वस्त्रालंकारमुत्सवं । सुखसम्पत्तिधान्यानि लक्ष्मीसौभाग्यराज्यकं ॥

क्रीडाविमलकेलिश्च तपः सिद्धिरतिः कलाः । एतच्चित्रस्वरूपे च पूजने फलमाप्नुयात् ॥
इति चित्रस्वरूपपूजनफलं ॥

अथ सैकतीप्रतिमार्च्चनफलं । ब्रह्माण्डे—
मृन्मयीप्रतिमार्चायां फलं ब्रूहि विधानतः । धनधान्यसमृद्धिश्च लक्ष्म्यैश्वर्य्यकलत्रता ॥
सुखं प्रतापसौभाग्यं श्रेयमंगलवाञ्छितं । जगन्मोहनवश्यत्वं नानाभोगजयं यशः ॥
एतत्फलमवाप्नोति मृन्मयीप्रतिमार्च्चने । व्याधिदुःखभयद्वेषकल्मषान्मुच्यते नरः ॥
रुद्रलोकमवाप्नोति तपसां सिद्धिदायकः ॥ इति सैकतीप्रतिमार्चनफलं ॥

अथ मनोमयीप्रतिमार्चनफलं । रामार्च्चनचन्द्रिकायां—
मनसोद्भवजामूर्त्तिपूजने फलमीरितं । भोगैश्वर्य्यधनं धान्यं सुखं सौभाग्यमेव च ॥
यशः कीर्तिप्रतापश्च विजयं धर्ममोक्षकं । राज्यवश्यं जगद्वश्यं सर्वदा लोकपूजितः ॥
मनोमये स्वरूपेऽर्च्ये फलमेतदवाप्नुयात् । ब्रह्महत्यादिपापात्तु मुच्यते नात्र संशयः ॥
विष्णुलोकमवाप्नोति त्रैलोक्यविजयी नरः ॥ इति मनोमयीप्रतिमार्चनफलं ॥

अथ मणिमयस्वरूपार्चनफलं । आदिपुराणे—
मणिमयप्रतिमायां फलमेतदुदाहृतं । कलत्रसुखसम्पत्तिः सल्लक्ष्मीधनधान्यकं ॥
भोगैश्वर्य्ययशो कीर्तिमंगलं श्रेयराज्यकं । सौभाग्यरतिकेलिश्च गोधनं विक्रमं शुभं ॥
तपःसिद्धिश्च मोक्षश्च धर्मकामार्थसंपदः । नैरोग्यविजयं लाभं सभायां विजयं लभेत् ॥
मणिकांचनरत्नाद्यं गृहहर्म्यादिकं लभेत् । ब्रह्महत्यादिकात्पापात् मुच्यते नात्र संशयः ॥
विष्णुलोकमवाप्नोति विष्णुसायोज्यतां गतः । परमायुः प्रमाणेन चिरंजीवी भवेन्नरः ॥
नवप्रकारमूर्तीनामर्च्चने कीर्त्तितं फलं ॥ इति नवप्रकारस्वरूपार्चनफलं ॥ ३५ ॥

ततो परस्परवने कलाकेलिविवाहस्थलप्रार्थनमन्त्रः । ब्रह्मयामले—
चन्द्रावलिकृतोत्साह ग्रन्थिबंधनरूपिणे । कलाकेलिविवाहाद्यस्थलाय च नमोऽस्तु ते ॥
इति मन्त्रं षडावृत्त्या नमस्कारं समाचरेत् । सर्वदा मंगलोत्साहैः परिपूर्णसुखं लभेत् ॥३६॥

ततो सुमनाकुण्डस्नानाचमन प्रार्थनमन्त्रः—
सुमनास्नपनोद्भूत तीर्थराज नमोऽस्तु ते । देवर्षिमुनिगन्धर्वविमलोत्सवदायिने ! ॥
इति षोडशभिर्मन्त्रं मज्जनाचमनं नमन् । सदानन्दसुखैः पूर्णो लोकपूज्यसुखं लभेत् ॥३७॥

---

कौमार मूर्त्ति के पूजन से ४२ प्रकार का सुख मिलता है। बलदेव प्रभृति पौगण्ड युगल मूर्त्ति के पूजन से ६४ प्रकार का सुख प्राप्त होता है और अयश, अरिष्टादि दोष समूह नाश होता है। इस प्रकार दारुमयी-मूर्त्ति, लोहमयीमूर्त्ति, लिप्तमयीमूर्त्ति, चित्रमयी, सैकतीमयी, मनोमयी, मणिमयी ९ प्रकार के भेद प्राप्त मूर्त्ति के युगलरूप पूजन के फल अलग २ हैं। मूल श्लोकों में फलों की गणना है। सरल अर्थ है। अनुवाद नहीं किया है ॥३५॥

अब परस्परवन में कलाकेलिविवाहस्थल है। प्रार्थनामन्त्र-ब्रह्मयामल में—हे चन्द्रावली कर्तृक उत्साह पूर्वक कलाकेलीसखी की विवाहलीला के गठि-बन्धन स्थल ! आपको नमस्कार। इस मन्त्र के ६ बार पाठ पूर्वक नमस्कार करें तो सर्वदा मंगल उत्साह से परिपूर्ण सुख को प्राप्त होता है ॥३६॥

ततो रासमण्डलप्रार्थनमन्त्रः—

नमो रासस्थलायैव सर्वानन्दप्रदायक । सुमनाकृष्णरूपाय नमो रासविहारिणे ॥३८॥

सकलव्रजपुरादीन् तीर्थदेवश्च ग्राम कथित व्रजविलासे गोकुलं रम्य धाम ॥

सुरगणमुनिपूज्यं धाम गोलोक नाम । परमरसिकभक्त्या निर्मितं नारदेन ॥३६॥

इति श्रीमद्भास्करात्मज श्रीनारायणभट्टगोस्वामिविरचिते व्रजभक्तिविलासे परमहंससंहितोदाहरणे व्रजमाहात्म्यनिरूपणे द्वादशोऽध्यायः ॥

## ॥ त्रयोदशो ऽध्यायः ॥

अथ व्रजयात्राप्रसंगे रुद्रवीर्य्यस्खलनवन प्रार्थनमन्त्रः । आदिपुराणे—

वैशाखस्यासिते पक्षे दशम्यां व्रजयात्रया । रुद्रवीर्य्यस्खलनाख्यं वनमभ्याययौ सुधीः ॥

प्रा०म०—रुद्रवीर्य्यपतद्रम्य वनाख्याय नमो नमः । देवर्षिमुनिगन्धर्वलोकानां वरदायिने ॥

इति मन्त्रं दशावृत्त्या नमस्कारं समाचरेत् । पुत्रवान् धनवान् लोके लक्ष्मीवान् जायते नरः ॥१॥

ततो मोहनीकुंडस्नानाचमनप्रार्थनमन्त्रः—

मोहनीधृतरूपाढय कृष्णस्नपनसंभवे । मोहनीकुंडतीर्थाय जगन्मोहनरूपिणे ॥

इति मन्त्रं नवावृत्त्या मज्जनाचमनं नमन् । लोकानां वश्यकृल्लोको जायते नात्र संशयः ॥२॥

ततो रुद्रकूपस्नानाचमनप्रार्थनमन्त्रः—

रुद्रशांतस्वरूपाय रुद्रकूपाय ते नमः । देवगन्धर्वलोकार्तिहर उमापते नमः ॥

---

अनन्तर सुमनाकुण्ड है । स्नानाचमन प्रार्थनमन्त्र यथा—हे सुमना के स्नान से उत्पन्न ! देवर्षि मुनि, गन्धर्वों को विमल उत्सव देने वाले तीर्थराज ! आपको नमस्कार । इस मन्त्र के १६ बार पाठ पूर्वक स्नानादि करें तो सर्वदा आनन्द सुख के लाभ पूर्वक लोक पूज्य होता है ॥३७॥

वहाँ रासमण्डल है । प्रार्थनामन्त्र यथा—हे रासस्थल ! हे सर्वानन्द प्रदायक ! हे सुमना तथा कृष्णरूप ! हे रासविहारी आपको नमस्कार । यह प्रार्थनमन्त्र है ॥३-॥

यह व्रजविलास नामक ग्रन्थ में समस्त व्रजपुर, तीर्थ, देवता, ग्राम कहे गये हैं । जो सुरगण, मुनिगण, देवतागणों के पूज्य गोलक नामक मनोहर परम गोकुल धाम हैं । परम रसिकगणों की भक्ति से नारदरूप मैंने इस ग्रन्थ का निम्मार्ण किया है ॥ ३६ ॥

इति श्रीमद्भास्करात्मज श्रीनारायणभट्ट गोस्वामी विरचित व्रजभक्तिविलास के द्वादश अध्याय समाप्त हुआ ।

अब व्रजयात्रा प्रसंग में रुद्रवीर्यस्खलन वन की प्रदक्षिणा कहते हैं । आदिपुराण में—वैशाख कृष्णपक्ष दशमी में व्रजयात्री रुद्रवीर्यस्खलन नामक वन को जावे । प्रार्थनामन्त्र यथा—हे रुद्र के वीर्यपतन से रम्य ! हे देवर्षि, मुनि, गन्धर्व, मनुष्यों को वर देने वाले ! आपको नमस्कार । इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करें तो मनुष्य पुत्रवान् , लोकवान्, धनवान, लक्ष्मीवान् होता है ॥१॥

वहाँ मोहनीकुण्ड है । स्नानाचमन प्रार्थनामन्त्र यथा—हे मोहिनी रूपधारी श्रीकृष्ण के स्नान से उत्पन्न जगन्मोहकारी मोहिनीकुण्ड ! आपको नमस्कार । इस मन्त्र के ६ बार पाठ पूर्वक मज्जनादि करें तो मनुष्यों को वश में करता है ॥२॥

इत्यष्टभिर्जपन्मन्त्रं मज्जनाचमनै र्नमन् । रुद्रलोकमवाप्नोति तपोनिधिरिवाभवत् ॥ ३ ॥
ततो श्रमितमहादेवप्रार्थनमन्त्रः –

भूम्यर्द्धशयलिंगाय महादेवाय ते नमः । मोहनीदर्शनार्थाय परिश्रमितमूर्त्तये ॥
इति त्रयोदशावृत्या नमस्कारं समाचरेत् । विष्णुसायुज्यमाप्नोति जगन्मोहनशीलवान् ॥
क्रोशद्वयप्रमाणेन प्रदक्षिणमथाकरोत् ॥ इति व्रजयात्राप्रसंगे रुद्रवीर्य्यस्खलनवनप्रदक्षिणा ॥४॥

अथ व्रजयात्राप्रसंगे मोहनीवनप्रदक्षिणा । संमोहनतन्त्रे—

एकादश्यां च वैशाखे कृष्णपक्षे व्रजोत्सवे । मोहनीवनमायातो प्रार्थयेद्विधिपूर्वकं ॥
प्रा०म०—मोहनीवेशधृक्विष्णूद्भवनैमित्तिहेतवे । त्रैलोक्यमोहरूपाय नमस्ते मोहनीवन ! ॥
इति षोडशभिर्मन्त्रं नमस्कारं समाचरेत् । जगन्मोहनतां लब्ध्वा सर्वकामानवाप्नुयात् ॥५॥

ततः कमलासरःस्नानाचमनप्रार्थनमन्त्रः—

कमलास्नपनतीर्थ पद्माकर सुशोभने । नमस्ते सरसे तुभ्यं लक्ष्मीबुद्धयुत्सवाय च ॥
इत्यष्टभिर्जपन्मन्त्रं मज्जनाचमनै र्नमन् । लक्ष्मीवान जायते लोको धनधान्यादिभियु तः ॥६॥

ततो मोहनीस्वरूपभगवद्दर्शनप्रार्थनमन्त्रः—

मोहनीपरमाल्हाद दैत्यप्राणविनाशिने । नमस्ते विष्णवे तुभ्यं मनसेष्टप्रदायिने ॥
इत्येकादशभिर्मन्त्रं नमस्कारं समाचरेत् । जगन्मोहनतां लभ्य परिपूर्णसुखं लभेत् ॥
सार्द्धक्रोशप्रमाणेन प्रदक्षिणमथाचरेत् ॥ ७ ॥

अथ व्रजयात्राप्रसंगे विजयवनप्रदक्षिणा । भविष्योत्तरे—

वैशाखशुक्लपक्षे तु चतुर्थ्यां व्रजयात्रया । विजयाख्यवनं प्राप्य प्रार्थयेद्विधिपूर्वकं ॥

---

अनन्तर रुद्रकुण्ड है । स्नान, आचमन, मन्त्र यथा—हे रुद्र के शान्त स्वरूप रुद्रकूप ! हे उमापति ! देवता, गन्धर्व मनुष्यों की आर्त्तिको नाश करने वाले आपको नमस्कार । इस मन्त्र के आठ बार जप पूर्वक मज्जनादि करें तो मनुष्य तपोनिधि होकर रुद्रपद को प्राप्त होता है ॥३॥

अनन्तर श्रमित महादेव हैं । प्रार्थनामन्त्र—हे भूमि अर्द्धशायी लिंग स्वरूप ! हे महादेव ! आप को नमस्कार । आप मोहिनी स्वरूप को देखकर परिश्रम को प्राप्त मूर्त्ति हैं । इस मन्त्र के १३ बार पाठ पूर्वक नमस्कार करें तो विष्णुसायुज्य को प्राप्त होता है तथा उसका स्वभाव जगन्मोहनकारी होता है । २ कोश प्रमाण से वन की प्रदक्षिणा करे ॥ ४ ॥

अब व्रजयात्रा प्रसंग में मोहिनीवन की प्रदक्षिणा कहते हैं । सन्मोहनतन्त्र में—वैशाख कृष्णा एकादशी में मोहिनीवन को आकर यथा विधि प्रार्थना करें । मन्त्र यथा—हे मोहनी वेशधारी विष्णु के द्वारा उत्पन्न ! त्रैलोक्य मोह रूप मोहनीवन आपको नमस्कार । इस मन्त्र के १६ बार पाठ पूर्वक नमस्कार करने से जगन्मोहनत्व लाभ पूर्वक समस्त कामनाओं को प्राप्त होता है ॥५॥

अनन्तर कमलासरोवर है । स्नानादि मन्त्र यथा—हे कमला के स्नान तीर्थ ! हे पद्म समूह से सुशोभित कमलासरोवर ! लक्ष्मी की वुद्धि को उत्सुक करने वाले आपको नमस्कार । इस मन्त्र के ८ वार जप पूर्वक मज्जनादि करें तो मनुष्य धनधान्य से युक्त होकर लक्ष्मीवान् होता है ॥६॥

अनन्तर मोहनी स्वरूप भगवान का दर्शन है । प्रार्थनामन्त्र—हे मोहनी के परम आल्हाद ! हे

प्रा०म०—पराजयजरासन्ध कृष्णाय विजयार्थिने । त्रैलोक्यजयदायैव सदा तुभ्यं नमाम्यहं ॥
इति मन्त्रं दशावृत्या नमस्कारं समाचरेत् । सर्वदा विजयं तस्य जायते नात्र संशयः ॥८॥
ततः मायाकुण्डस्नानाचमनप्रार्थनमन्त्रः—
मायामोहनरूपाय विष्णुचेष्टाविधायिने । नमस्ते तीर्थराजाय मायाकुण्डाभिधानक ! ॥
इत्यष्टभिः पठन्मन्त्रं मज्जनाचमनैं र्नमन् । लक्ष्मीवान् पुत्रवान् लोको कलावान् जायते भुवि ॥
एकक्रोशप्रमाणेन प्रदक्षिणमथाचरेत् ॥ ९ ॥
अथ बनयात्राप्रसंगे निम्बबनप्रदक्षिणा । पाद्मे—भाद्रकृष्णचतुर्दश्यां नाम निंबवनं गतः ॥
प्रा०म०—गोपिकारमणोल्लास सौरभ्यसुखदायिने । कृष्णवैमल्यसंज्ञाय निम्बनाम्ने नमोऽस्तु ते ॥
इति द्वादशभिर्मन्त्रं नमस्कारं समाचरेत् । सर्वदा रमणोत्साहवैमल्यसुखमाप्नुयात् ॥१०॥
ततो गोपिकाकूपस्नानाचमनप्रार्थनमन्त्रः—
प्रपूर्णदुग्धतीर्थाय गोपिकातृड्प्रशान्तये । नमस्ते गोपिकाकूप देवर्षिमुनिमुक्तये ॥
इति मन्त्रं षडावृत्या मज्जनाचमनैं र्नमन् । सर्वबाधाविनिर्मुक्तो परमायुः स जीवति ॥११॥
ततो धेनुकुण्डस्नानाचमनप्रार्थनमन्त्रः—
गोक्रीडाविमलोत्साह कृष्णसौख्यप्रदायिने । नमस्ते धेनुकुण्डाय वारिशैत्यरूपिणे ॥
इति सप्तदशावृत्या मज्जनाचमनैं र्नमन् । सहस्रसंख्यकानां च गवामधिपतिर्भवेत् ॥
सपादक्रोशमात्रेण प्रदक्षिणमथाकरोत् ॥१२॥

---

दैत्यप्राण विनाशकारी ! हे मन का इष्ट देने वाले विष्णु आपको नमस्कार । इस मन्त्र के ११ बार पाठ पूर्वक नमस्कार करने से मनुष्य जगत् मोहनकारी होकर परम सुख को प्राप्त होता है । १॥ कोश प्रमाण से बन की परिक्रमा करें ॥ ७ ॥

अब व्रजयात्रा प्रसंग में विजयबन की प्रदक्षिणा कहते हैं । भविष्योत्तर में—वैशाख शुक्ल पक्ष चतुर्थी में व्रजयात्री विजय नामक बन को जावे । प्रार्थनामन्त्र—हे जरासिन्धु कर्तृक पराजित विजयार्थी श्रीकृष्ण ! हे त्रैलोक्य के जयदाता ! हे विजयबन आपको नमस्कार । इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करें तो सर्वदा निसन्देह उसकी विजय होती है ॥८॥

अनन्तर वहाँ मायाकुण्ड है । स्नानाचमन प्रार्थनामन्त्र यथा—हे मायामोहन स्वरूप ! हे विष्णु की चेष्टा विधान करने वाले तीर्थराज मायाकुण्ड ! आपको नमस्कार । इस मन्त्र के ८ बार पाठ पूर्वक मज्जनादि करें तो मनुष्य लक्ष्मीवान्, पुत्रवान्, कलावान् होता है । १ कोश प्रमाण से बन की प्रदक्षिणा करें ॥९॥

अब बनयात्रा प्रसंग में निम्बबन की प्रदक्षिणा कहते हैं । पाद्म में—भाद्र कृष्णा चतुर्दशी में निंबवन की यात्रा करें । प्रार्थनामन्त्र—हे गोपिकारमण से उल्लास प्राप्त सौभाग्य सुख के दाता ! हे कृष्ण विशुद्ध संज्ञा प्राप्त निंबबन आपको नमस्कार । इस मन्त्र के १२ बार पाठ पूर्वक नमस्कार करने से सर्वदा विमल सुख को प्राप्त होता है ॥१०॥

अनन्तर गोपिकाकूप है । स्नानाचमन प्रार्थनामन्त्र यथा—हे गोपियों की तृष्णा शान्ति के लिये दुग्ध से परिपूर्ण तीर्थराज ! हे देवर्षि, मुनियों की मुक्ति के लिये गोपिकूप आपको नमस्कार । इस मन्त्र के ६ बार पाठ पूर्वक स्नानादि करें तो समस्त बाधाओं से मुक्त होकर यावत् आयु जीता है ॥११॥

अनन्तर धेनुकुंड है । स्नानादि मन्त्र यथा—हे गौओं की विशुद्ध क्रीडा से उत्साहित ! हे श्रीकृष्ण को सुख देने वाले धेनुकुंड आपको नमस्कार । आप परम शीतल जल से युक्त हैं । इस मन्त्र के १७ बार पाठ पूर्वक मज्जनादि करें तो हजार गौओं का अधीश्वर होता है । १। कोश प्रमाण से बन की प्रदक्षिणा करें ॥१२॥

अथ व्रजयात्राप्रसंगे गोपानबनप्रदक्षिणा । ब्रह्माण्डे—अमायां ज्येष्ठकृष्णे तु गोपानबनमागतः ।
प्रा० म०—गोपानवनश्रेष्ठाय कृष्णाल्हादविधायिने । गोपालरमणक्रीडासुखधाम्ने नमो नमः ॥
इतिमन्त्रं समुच्चार्य्य शक्रावृत्या नमश्चरेत् । गोधनं परिपूर्णेन सर्वदा सुखमासते ॥१३॥
ततो यमुनायां गोपानतीर्थस्नानाच नप्रार्थनमन्त्रः—
ओं गोगोपालतृषाशान्त रम्यवारिकल्लोलिने । नमस्ते तीर्थराजाय यमुनावरदायिने ॥
इति मन्त्रं दशावृत्या मज्जनाचमनं नमन् । पुत्रपौत्रकलत्राद्यैः समस्तसुखमाप्नुयात् ॥
सार्द्धक्रोशद्वयेनैव प्रदक्षिणमथाचरेत् ॥ १४ ॥
अथाग्रवनप्रदक्षिणा । वामनपुराणे—भाद्रकृष्णचतुर्दश्यामग्रनामवनं गतः ।
प्रा०म०—गोपालविमलोल्लास कृष्णायाग्रसराय ते । अग्रनाम्ने वनायैव नमस्ते रम्यभूमये ॥
इति मन्त्रं दशावृत्या नमस्कारं समाचरेत् । संग्रामविजयी लोके जनानामधिपो भवेत् ॥१५॥
ततो नारदकुंडस्नानाचमनप्रार्थनमन्त्रः—
नारदस्नपनोद्भूत ! तीर्थराज नमोऽस्तु ते । कुण्डनारदसंज्ञाय गोपालेक्षणकांक्षिणे ॥
इति द्वादशभिर्मन्त्रं मज्जनाचमनं नमन् । परमोक्षमवाप्नोति सकलेष्टसुखैर्युतः ॥
क्रोशद्वयप्रमाणेन प्रदक्षिणमथाकरोत् ॥१६॥
अथ कामरूवनप्रदक्षिणा । कौर्म्ये—सप्तम्यां भाद्रशुक्ले तु कामरूवनमागतः ॥
प्रा० म०—गन्धर्वाप्सरसाल्हाद देवर्षिसुखवर्द्धिने । कामरूसुखधाम्ने च नमस्ते रम्यभूमये ॥
इति मन्त्रं समुच्चार्य्य सप्तभिः प्रणतिं चरेत् । सकलेष्टवरं लब्ध्वा विष्णुसायुज्यमाप्नुयात् ॥१७॥
ततो विश्वेश्वरकुण्डस्नानप्रार्थनमन्त्रः—
विश्वेश्वरहरिस्नान तीर्थसंज्ञाय ते नमः । त्रैलोक्यवरदायैवाखण्डसौख्यप्रदायिने ॥

---

अब व्रजयात्रा प्रसंग में गोपानबन की प्रदक्षिणा कहते हैं । ब्रह्माण्ड में—ज्येष्ठा अमावस्या तिथी में गोपालबन को आवें । प्रार्थनामन्त्र यथा—हे श्रेष्ठ ! हे श्रीकृष्ण को आल्हाद देने वाले गोपानबन ! आपको नमस्कार । आप गोपालरमण की क्रीडा तथा सुख के धाम हैं । इस मन्त्र के पाठ पूर्वक १४ बार नमस्कार करें तो परिपूर्ण सुख तथा गोधन को प्राप्त होता है ॥ १३ ॥

अनन्तर यमुनाजी में गोपानतीर्थ का स्नानाचमन प्रार्थनमन्त्र कहते हैं । हे गोगोपाल की तृष्णा शान्तिकारी मनोहर जलतरंग से परिपूर्ण तीर्थराज ! आपको नमस्कार । इस मन्त्र के १० बार पाठ पूर्वक स्नानादि करें तो पुत्र,पौत्र, कलत्रादि समस्त सुख मिलता है । २॥ कोश प्रमाण से बन की प्रदक्षिणा करें ॥१४

अब अग्रबन की प्रदक्षिणा कहते हैं । वामनपुराण में—भाद्र कृष्ण चतुर्दशी में अग्रबन की यात्रा करें । प्रार्थनमन्त्र यथा—हे गोपालों के विशेष उल्लासकारी श्रीकृष्ण के आगे सरने के कारण उत्पन्न अग्रनामक बन ! रम्यमूर्त्ति आपको नमस्कार । इस मन्त्र के १० बार पाठ पूर्वक नमस्कार करें । मनुष्य संग्राम में विजयी तथा लोकेश्वर होता है ॥१५॥

अनन्तर नारदकुण्ड है । स्नानादि मन्त्र यथा—हे नारदजी के स्नान से उत्पन्न तीर्थराज नारद-कुंड ! आपको नमस्कार । आप गोपालजी के दर्शनाकांक्षी हैं । इस मन्त्र के १२ बार पाठ पूर्वक मज्जनादि करें तो परम मोक्षफल तथा समस्त इष्ट को प्राप्त होता है । २ कोश प्रमाण से बन की प्रदक्षिणा करें ॥१६॥

अब कामरुबन की प्रदक्षिणा कहते हैं । कौर्म्य में—भाद्र शुक्ला सप्तमी में कामरुबन की यात्रा करें । प्रार्थनमन्त्र यथा—हे गन्धर्व,अप्सरों से आल्हाद प्राप्त ! देवर्षि सुख बढ़ाने वाले कामरु नामक सुख-धाम बन ! रम्यमूर्त्ति आपको नमस्कार । इस मन्त्र के ७ बार पाठ पूर्वक प्रणाम करें तो समस्त इष्ट लाभ पूर्वक विष्णुसायुज्य को प्राप्त होता है ॥१७॥

इत्येकादशभिर्मन्त्रमज्जनाचमनैर्नमन् । त्रैलोक्यसुखमालभ्य अन्ते विष्णुपदं लभेत् ॥
कोशत्रयप्रमाणेन प्रदक्षिणामथाचरेत् ॥ १८ ॥

इत्येवं व्रजमण्डलं शुभवरं संदायिनी शोभना, नानारण्यप्रदक्षिणासुखप्रदा कामार्थदामोदनी ।
द्वारषोडशनिर्मिताखिलसुखाल्हादा मनोर्थाभिधा, ख्याता मुक्तिप्रदायिनी हरिरतिक्रीडोत्सवा वल्लभा ॥
श्रीमन्नारदनिर्मिता व्रजवनसौख्या रमावल्लभा, श्रीनारायणभट्टनिर्मितगुणा यात्रा समस्ताभिधा ।
संख्याविश्व१३सहस्रका गुणनिधियथेष्टपूर्णार्थिनी, पत्रं षट्नवशच्चा(१६६)पूज्यमनघं श्रीरंगनाथोद्भवं॥१६

इदं गोप्यं महाग्रन्थं व्रजभक्तिविलासकं । त्रैलोक्यसुखदं श्रेष्ठं श्रीकृष्णस्य कलेवरं ॥
अतिगुह्यप्रकारेण नित्यमेव प्रपूजयेत् । रंगनाथकुलोद्भूताः व्रजमण्डलवासिनः ॥
विधिपूर्वंविधानेन षोडशावृत्त्यनुक्रमात् । सर्वदा सुखसंपद्भिर्लोकपूज्याः भवन्ति हि ॥
इदं तु पुस्तकं न्यस्य गुह्यस्थाने मनोरमे । पीयपट्टमयेनैव वाससाच्छाद्य पूजयेत् ॥२०॥

तत्रादौ ग्रन्थपूजनं नित्यमेव षोडशोपचारमन्त्रानुक्रमः—

षोडशांगहरेर्मन्त्रैर्व्रजयन्त्रं प्रपूजयेत् । उदङ् मुखोपविश्याथ संकेताभिमुखस्तथा ॥

विहारस्वरूपश्रीकृष्णध्यानं—

गोगोपालमहोत्सवादिसकलैरावेष्टितं सुन्दरं, रासक्रीडनतत्परं हरिहरब्रह्मादिभिः संस्तुतं ।
वन्दे केशवनन्दसूनुमनघं विश्वेश्वरं मोहनं, गोपीनां नयनोत्पलार्च्चितनुं रामानुजं केलिनं ॥
इत्येकपादस्थो भूत्वा ध्यायेत् ।

"ओं ह्रीं श्रीराधावल्लभाय नमः" इति मन्त्रेणार्घ्यं दद्यात् । ओं ह्रौं विहारिणे नमः इति मन्त्रं चतुर्भिःपठन् द्वौ पार्श्वौ पाद्यं दद्यात् । ओं ह्रं मदनगोपालाय नमः इति मन्त्रमुच्चार्य्य पुष्पाञ्जलिना पुष्पं दद्यात् । ओं ह्रां केशवाय नमः इति मन्त्रं पञ्चभिरुच्चरन् सघंटास्वनेन शंखोदके स्नपनं कुर्य्यात् । ओं ह्रैं व्रजोत्सवाय नमः इति मन्त्रं दशधा पठन् चन्दनेनार्चयेत् । ओं ह्र कृष्णाय नमः इति मन्त्रं पठन् शतधा प्रदक्षिणेनैकेनैकपृथक् तुलसीपत्रं समर्पयेत् । ओं क्लीं रामानुजाय नमः इति मन्त्रं शतधा पठन् धूपं दद्यात् । ओं त्रीं यशोदानन्दनाय नमः इति मन्त्रं चतुर्भिरुच्चरन् द्वयोः पार्श्वयोरुभौ दीपौ निधारयेत् । ओं त्रीं पुण्डरीकाक्षाय नमः इति मन्त्रमुच्चरन् नैवेद्यं समर्पयेत् । ओं ग्लीं पद्मनाभाय नमः इति मन्त्रं पठन् ताम्बूलं

---

वहाँ विश्वेश्वर कुंड है । स्नान, मज्जन, प्रणाम मन्त्र यथा- हे विश्वेश्वर हरि के स्नान से उत्पन्न विश्वेश्वर नामक कुंड ! आपको नमस्कार । आप तीनलोक के वर दाता तथा अखण्ड सुख को देने वाले हैं । इस मन्त्र के ११ बार पाठ पूर्वक मज्जन, आचमन, नमस्कार करें तो त्रैलोक्य सुख को प्राप्त होकर अन्त में विष्णुपद का लाभ करता है । ३ कोश प्रमाण से वन की प्रदक्षिणा करें ॥ १८ ॥

यह अत्यन्त शुभ व्रजमण्डल को बताने वाली समस्त यात्रा विधि है । जो शोहन तथा नाना अरण्य की प्रदक्षिणा द्वारा सुखप्रद है । जो काम अर्थ को देने वाली तथा मोदपरायण है, षोडश द्वार से जो निर्मिता है तथा अखिल सुख, आल्हाद, मनोर्थ देने वाली है । जो मुक्तिदातृ तथा श्रीहरि की रतिक्रीड़ा उत्सव से परम प्रिया है । जो नारदजी से निर्म्मिता है, व्रजवन सम्बन्धी सुख जिसमें है तथा जो लक्ष्मी की भी परम प्रिया है । नारायणभट्ट मुख से निर्म्मित गुण समूह जिसका, जो १३ हजार श्लोकों से तथा १६६ पत्रात्मक ग्रन्थ से परिपूर्ण है ॥ १६ ॥

यह गोप्य व्रजभक्तिविलास नामक ग्रन्थ तीन लोक में सुखद तथा श्रीकृष्ण के साक्षात् अंग हैं । रंगनाथ कुलोत्पन्न व्रजमण्डलवासी वैष्णवगण यथा विधि १६ बार ग्रन्थ की आवृत्ति करें । सर्वदा सुख सम्पत्ति लाभ पूर्वक लोकपूज्य होते हैं । पीताम्बर से ग्रन्थ को ढाककर गोपनस्थल में रखें तथा षोडशोपचार विधि से पूजन करें ॥ २० ॥

समर्पयेत्। ओं ग्लां वासुदेवाय नमः इति मन्त्रं नवभिः पठन् आचमनं दद्यात्। ओं ग्लैं किरीटिने नमः इति मन्त्रं शतधा पठन् नमस्कारं कुर्यात्। ओं ग्लैं व्रजकिशोराय नमः इतिमन्त्रमेकविंशत्या पठन्नेकवर्त्तिसंयुक्तारात्तिकं कुर्यात्। ओं क्लैं दामोदराय नमः इति मन्त्रेण विंशसंख्याकाखंडपीताक्षतान्नीत्वा पुस्तकयन्त्रं निवेद्य समर्पयेत्। "नारायण रमाकान्त त्रैलोक्याधिपते नमः। ऐश्वर्य्यविजयं देहि धनधान्यं प्रदेहि मे ॥" इति मन्त्रं शतावृत्त्या हृदये ह्यु चवरम् पृथक्। पीताक्षतं च प्रत्येकं नीत्वा शिरसि धारयेत् ॥

नमस्कृत्वा विधानेन सकलेष्टवरं लभेत्। रंगनाथकुलोद्भूतो जयश्रीं लभते सदा ॥
धनधान्यसमृद्धिं च श्रेयमांगल्यमुत्सवं। प्राप्नोति मनसेच्छाभिः रंगनाथकुलोद्भवः ॥२१॥
अनेनैव विधानेन पूजयन्ति दिने दिने। पद्मा सदा वसेद्गेहे परमायुः स जीवति ॥
अनेनैव प्रकारेण संकेटवटमर्च्चयेत्। कृष्णक्रीडास्थलं रम्यं व्रजद्वारं सुखप्रदं ॥
सर्व्वसौभाग्यसम्पत्तिं लभते नात्र संशयः। व्रजमण्डलभूगोलं व्रजभक्तिविलासकं ॥
यन्त्रं प्रपूजयन्ति स्म व्रजपूजाफलं लभेत्। इति पुस्तकपूजायाः विधानं कथितं शुभं ॥
रंगनाथकुलोद्भूते सर्वदा वरदायकं। इदं गुह्यप्रकारेण पंचमं गोप्यग्रन्थकं ॥
रक्षयेच्च प्रयत्नेन लक्ष्मीवान् जायते सदा ॥ इति पुस्तकपूजाविधानमाहात्म्यं ॥२२॥

इतीरितं भास्करनन्दनेन हरेरनुज्ञोद्भवनारदेन। पूर्णं चकारात्र मनोरमं शुभं सुगोप्यग्रन्थं व्रजभक्तिविलासं ॥
श्रीकुंडमास्थाय मनोहरस्थलं नवोत्तरं षोडशशाब्द वत्सरे। महात्म्यपूर्वं च परिक्रमं शुभं ग्रन्थःप्रपूर्णो व्रजभक्तिनाम॥

इति श्रीमद्भास्करात्मज श्रीनारदावतार श्रीनारायणभट्टगोस्वामिविरचिते व्रजभक्तिविलासे
परमहंससंहितोदाहरणे व्रजमाहात्म्यनिरूपणे वनयात्राव्रजयात्राप्रसंगिके
त्रयोदशोऽध्यायः ॥ (१३) ग्रन्थ संपूर्णं ॥

---

षोडशांग हरि के मन्त्र द्वारा व्रजयन्त्र का भी पूजन करें। संकेत किंवा उत्तर मुख होकर विहारशील श्रीकृष्ण का ध्यान करें। ध्यान यथा—महोत्सव परायण, गोपीपाल समूह से वेष्टित, सुन्दर, रास क्रीड़ा परायण, हरि हर ब्रह्मादिकों से स्तुत, विश्वेश्वर नन्दनन्दन केशव को वन्दना करता हूं। श्री गोपियों के नयन कमलों से अर्चित विग्रह, क्रीड़ा परायण, रामानुज हैं। इति यह ध्यान को ... पाद में ठहर कर करें। १६ उपचार से पूजन विधि मूलश्लोकों से देखें ॥२१॥

इस प्रकार विधि से नित्य पूजन करने से लक्ष्मी सर्वदा गृह में ठहरती है और यावत् आयु जीता है। इस प्रकार संकेत वट की भी अर्च्चना करें। जो कृष्ण के क्रीडास्थल तथा व्रज का द्वार है और सुखप्रद है। मनुष्य निःसन्देह समस्त सौभाग्य को प्राप्त होता है। व्रजमण्डल का भूगोल स्वरूप व्रजभक्तिविलास ग्रन्थ और यन्त्र का पूजन से व्रजपूजा का फल मिलता है। यह पुस्तकपूजा की विधि मैंने कही है। रंगनाथ कुल में यह सर्वदा वर का देने वाला है। यह पाँचवाँ गोप्य ग्रन्थ का यत्न पूर्वक अवैष्णवों से गुप्त रखें ॥२२॥

इति यह व्रजभक्तिविलास नामक ग्रन्थ श्रीहरि के आदेशानुसार नारायणभट्ट रूप से उत्पन्न श्रीनारदजी के द्वारा ( श्रीनारायणभट्टजी के द्वारा ) संपूर्ण हुआ है।

नारायणभट्ट में १६०९ संवत् में श्रीराधाकुण्ड के मनोहर स्थल पर ठहरकर महिमा से परिपूर्ण, परिक्रमा से शुभ, व्रजभक्तिविलास नामक यह ग्रन्थ की संपूर्त्ति करता हूँ ॥२३॥

इति श्रीमद्भास्करात्मज नारदावतार श्रीनारायणभट्ट गोस्वामी विरचित व्रजभक्तिविलास का
अनुवाद समाप्त हुआ।

समय—शुभ नृसिंहचतुर्दशी संवत् २००४। स्थान—दाऊजी का मन्दिर, कृष्णगंगा, मथुरा।

अनुवादक—कृष्णदास, कुसुमसरोवर, गोवर्द्धन।

## गौड़ीयग्रन्थगौरव:—

## ब्रजभाषा में प्रकाशित प्राचीन पुस्तकें-

१—गदाधरभट्टजी की बाणी
२—सूरदास मदनमोहनजी की बाणी
३—माधुरीबाणी ( माधुरीजी कृता )
४—वल्लभरसिकजी की बाणी
५—गीतगोविन्दपद ( श्रीरामरायजी कृत )
६—गीतगोविन्द ( रसजानिवैष्णवदासजीकृत )
७—हरिलीला ( ब्रह्मगोपालजीकृता )
८—श्रीचैतन्यचरितामृत ( श्रीसुबलश्यामजीकृत )
९—वैष्णववन्दना ( भक्तनामावली ) ( वृन्दाबनदासजीकृता )
१०—विलापकुसुमाञ्जलि ( वृन्दाबनदासजीकृता )
११—प्रेमभक्तिचन्द्रिका ( वृन्दाबनदासजीकृता )
१२—प्रियादासजी की ग्रंथावली
१३—गौराङ्गभूषणमञ्जावली ( गौरगनदासजीकृता )
१४—राधारमणरससागर ( मनोहरजीकृत )
१५—श्रीरामहरिग्रन्थावली ( श्रीरामहरिजीकृता )

## सानुवाद संस्कृतभाषा में—

१—अर्चाविधि: ( संगृहित )
२—प्रेमसम्पुट: ( श्रीविश्वनाथचक्रवर्त्तीजीकृत )
३—भक्तिरसतरंगिणी ( श्रीनारायणभट्टजीकृता )
४—गोवर्द्धनशतक ( विष्णुस्वामी संप्रदायाचार्य्य श्रीकेशवाचार्य्यकृत )
५—चैतन्यचन्द्रामृत और संगीतमाधव ( श्रीप्रबोधानन्दसरस्वतीजीकृत )
६—नित्यक्रियापद्धति ( संगृहित )
७—व्रजभक्तिविलास ( श्रीनारायणभट्टजीकृत )

# यह पुस्तक तथा प्रकाशित अन्य पुस्त[illegible]

# मिलने का पता—

१—श्रीराम-निवास खेतान का दूकान सवामनशालग्रामजी मन्दिर नीचे ( लोई बाजार ) वृन्दावन ।

२—बाबा महन्त उद्धारणदास जी, कुसुमसरोवर, गवालियर-मन्दि[illegible] राधाकुण्ड, ( मथुरा )

३—चन्द्रभान शर्मा, भारतीय पुस्तक भंडार, गुड़हाई बाजार, मथुरा ।

४—श्रीरामदास शास्त्री जी, भक्तभारत कार्य्यालय, चारसम्प्रदायआश्र[illegible] वृंदावन ।

## समर्पण-पत्रं

श्री श्री राधारमण चरणदास देवस्यानुचर प्रवरस्य, सकल देश प्रसिद्ध कीर्त्तिराशेः, प्रेम मात्र सर्वस्व कृतस्य, निरंतर सात्विक भावा-वल्या विभूषितस्य, दीनतासागरस्य, मधुर स्वरालापैः सर्वदा गौर कीर्त्तनकर्त्तुः, श्रीरामदासेति नाम्ना प्रसिद्धस्य, मदीय आराध्यदेवस्य, श्रीगुरुदेवस्य, बाबाजीमहा राजस्य प्रीत्यर्थे समर्पितेदं ग्रन्थरत्नं ।

मुद्रक—रामनारायण अग्रवाल, प्रबन्ध-निर्देशक, लोकसाहित्य प्रेस, मथुरा ।